# PART - II

## TEXT

# PART - II - TEXT

## SECTION - I
## INTRODUCTION

### NEED FOR CRITICAL EDITION OF THE KK :

The matter of food has been paid considerable importance in ancient India. The Āyurveda discusses about food and drinks at length with relation to health.

Āyurvedists emphasize upon digestibility of food. Many food stuffs in their natural state are quite unfit for consumption for human beings. They should be processed before eating. A home process is the cooking and it has been practised from time immemorial. In the Āyurveda Cookery, Dietology and Nutrition are discussed unanimously in a specialised branch named PĀKAŚĀSTRA. It was well developed and many important treatises were composed on this subject. But most of the original works are not available. In the 16th century A.D., Vaidya Kṣemaśarmā took initiative for the composition of the work KṢEMAKUTŪHALAM by compiling material from different authentic sources available in his time. The KK is an authentic work on PĀKAŚĀSTRA.

It was first published by Vaidya Jadavaji Trikamji Acharya from Nirṇayasāgara Press, Bombay in 1920. Looking to this edition, we can say that this edition is based on more than one manuscripts, as the editor has mentioned variations in the

said published text. It is not a critical edition. The editor has only corrected the language. The second publication of the KK was brought out with Hindi translation by Chokhamba Orintallia, Banārasa in 1973. In this edition, the text appears to be based on the first printed edition of Nirṇayasāgara Press. The KK is a scientific work on Cookery, Dietology and Nutrition which are considered very important sciences in ~~recent~~ modern times also. That is why its critical edition was necessary. Over and above this, the large number of Āyurvedic texts are being published everywhere in India, but very few of them are critically editted. There is paucity of critical editions of Āyurvedic classics. There is an effort to draw attention of scholars to an important work on Cookery, Dietology and Nutrition.

DESCRIPTION OF THE MSS. AND PRINTED BOOKS :

The text of the KK is constituted on the basis of three MSS and two printed books, details of which are as follows:

MS - B    Oriental Institute Library,
Baroda, Acc. No.1656.

It is written on thick unglazed paper. Some folios are worm eaten at the top side, but no letters are damaged. The condition is good. Hand writing is clear and legible. It is

written in Devanāgarī script. It is complete in twelve Utsavas, e.g. chapters.

It has 69 folios in total. The size of each folio is 23.5 cms. x 14 cms. There are approximately 12 lines to a page and about 24 to 26 letters to a line. The writing is continuous.

The entire MS. is from the pen of a single scribe. It is copied with black ink throughout. On the both sides of the page, the margins are kept; but they are not ruled. The word क्षेमकौतु or क्षेमकुतु or क्षेमकुतू and below it the number of the folio are written in the top corner of the left hand side of B side. No daṇḍas are used. There are no other marginallia.

It starts with ॥ श्री गणेशाय नमः ॥ and it ends with शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥ आरोग्यमस्तु ॥ जयास्तु ॥ श्री ॥

The stanzas are not carefully numbered. Few topics and all colophons are underlined with red ink. Single and double daṇḍas are used to demarcate the halves and quarters of a stanza. Name and number of the chapter, author's and author's father's names are written in the colophons. The post colophon entry at the end of last chapter indicates that it was copied by Dolataram belonging to Daśapura Brāhmin Caste in the place, SUNELI village. It was completed on the fourth day of the dark half of month Māgśīrṣa in V.S. 1839 on Sunday.

The MS. is almost complete. Ommissions, additions and transpositions of stanzas and lines are found. The grammatical errors and corruptions are also found. Visarga and Parusavarnaṣ are properly used. Avagraha is omitted throughout the text. The rules of Sandhis are observed. He has used sometimes the letter ख् for स् and स्थ् , त्त for त् , ष् for प् and ट् for ढ् .

This is a good MS. for reference.

<u>MS - BB</u> Oriental Institute Library, Baroda, Acc. No. 12892

It is a paper MS. written in Devanāgarī script. It is incomplete in the beginning as well as in the end. A little part of the top and bottom portions of some folios are worm-eaten, but the letters are not damaged anywhere.

The total number of folios is 38 with 11 to 16 lines to a page and about 40 to 56 letters to a line. Folios 1-A and 38-A are blank. A and B sides of folio No. 34 are left blank in half portion with a note in left margin, अत्र त्रुटितं पत्रमेकं
The size of the folio is 28 cms. x 12 cms.

It is continuously written in small legible letters. Black and red inks are used. Double lined margins are ruled with red

ink on both sides of the page. On the top corner of left hand B side of each folio, ॥ क्षेम. कृ. टे. ॥ is written. Number of folio is given below it. In the right margin of B side - bottom १। राम ॥ is written and number of folio is given below it.

Stanzas are not numbered. Double daṇḍas are used to separate the lines of stanzas in red ink. Most ofthe topics are daubed over with light red colour. Colophons remain almost same as in MS - B. Folio 38-B is blank, but there is a post colophon entry in the right margin. This post colophon remark indicates that the entire MS. was completed by a Brahmin named Jivanand, son of Krishnadeva at Kashipura on the second day of the bright half of the month Kārtika in V.S. 1887.

It begins with ॐ श्री महोमंगलमूर्तये गणेशाय नमः ॥ मल्लाकृति ॥ Invocation is not given. The text starts from the stanza thirty seventh of IInd Chapter and it ends abruptly. Last five stanzas alongwith the colophon of Chapter XIIth are omitted. The last three stanzas of Chapter XIth are written on folio 37 B and 38 A. Remaining portions of the respective pages are kept blank. Three corrupt lines are written in old Hindi and Sanskrit languages in left margin of folio 38 B. They are difficult to be understood.

Corrections, omissions and some letters which are dropped

due to over sight are inserted in the margins, but they are very few. Omissions and transpositions of stanzas, grammatical errors, corruptions etc. are found more than those in MS- B. Scribal errors are also seen frequently. श्रुमे for शुमे , इ for द , त्त for त , ल for ख , व for ब - are used at various places. Avagraha is omitted. Anusvāra is used for all Anunāsikas. Visarga and Parāsavarṇas are used properly. Rules of Sandhis are generally observed.

MS - J — Deposited in the Library of Ayurved University, Jamnagar and noted as No.175 in the Catalogue.

This collection of MSS. was purchased from Late Rajvaidya (Royal physician) Charanatirtha Maharaj, Gondal by the Govt. of Gujarat State, India.

It is a paper MS. written in Devanāgarī script. The codex is complete in 76 folios. Size of the folio is 28 cms. x 14.5 cms. Each page contains about nine lines and each line consists of 28 to 32 letters. It is from the pen of a single scribe.

The writing is clear and nice. There are no marginallia. Margins are ruled. Number of the folio is given on the A side in the margins at the top of left side and at the bottom of

right side. The word कु is written over the folio number on the left hand side. Colophons remain the same as in MS-B and MS BB, but it runs in the end of chapter XIIth as follows:

इति श्रीमन्मथात्मजविनिर्मितेप्रेमकुतोहलग्रंथसमाप्तिमगमत् ॥ The entry of the past colophon of Chapter XIIth indicates that the name of scribe was Pitamber, the son of Yagnik Visvanath. It is completed in V.S. 1885 on Monday, the first day of dark half of the month Pausa.

It begins with ॥ श्री गणेशाय नमः ॥ and ends as श्री गोपीजनवल्लभाय नमः ॥ Stanzas and Chapters are not numbered. Two dandas are used to separate the lines of stanzas. Most of the topics and all colophons are daubed over with red colour. Only black ink is used throughout.

Additions, transpositions and omissions of lines and stanzas are found. Grammatical errors and corruptions are few. The lteers, ष , ख , छ for च्छ , इ for ई , त्त for त , स for ष are written at some places. Avagraha is omitted. Anusvāra is written for all Anunāsikas. Sandhis are observed. Omitted letters are written on the same line above two connected letters.

N Printed Edition. Printed by Nirṇayasāgara Press, Bombay in Āyurvediya Granthamāla as Serial No.13 in 1920.

It was printed by Vaidya Jadavaji Trikamaji Acharya. The Sanskrit text is corrected, but it is not a critical edition. Variations are noted infoot notes at many places. So it indicates that at least two MSS. are collated. The editor does not mention any details regarding the preparation of this edition.

The index is given in detail in the beginning. Topics are noted with their pages and lines. Some explainatory notes in Sanskrit are given at the respective places in foot notes.

This is a very good effort to bring out the valuable work on Pakaśāstra to the modern world.

C Printed edition, Published and edited by Dr.Indradev Tripathi, Varanasi in 1978 with Hindi translation from Chaukhamba Orientalia, Varanasi.

The Department of Education and Social Welfare of Govt. of India financed to publish this work. It is not critically edited. The editor introduces the subject and author in the preface. The index is given in details. At the end of the text he has given alphabetical index of the stanzas.

He has used the Sanskrit text of the KK which was published by Vaidya Jadavaji Trikamaji Acharya. Some explainations are given in Hindi as well as some comparative stanzas of the BP a well known Ayurvedic treatise are cited in foot notes. Some more headings of the topics are mentioned. Hindi translation of the text in prose can help common readers to understand this work.

WRITING PECULIARITIES OF THE MSS. :

Following peculiarities of the MSS. are noted after a comparative study of them :

1. Two MSS. are complete out of three. Among them, the MS - J is written very carefully.
2. All MSS. are copied between V.S. 1839 to 1887 at different places. Post colophon entries indicating the scribe's name, date, place etc. are given at the end of the last Chapter.
3. Colophons remain almost same in all. They give (i) Author's name (ii) His father's name (iii) Appropriate name of the Chapter (iv) Number of the Chapter.
4. MS B and BB write the word श्रम in the margin of B side of each folio. An obesance of Gaṇeśa is omitted in BB.

5. All MSS are paper MSS and written in Devanāgarī script. Hand writing is clear and nice in all. Writing is continuous.
6. Single or double daṇḍas are used to separate the lines of stanzas. Folios are numbered in all MSS. The stanzas are not numbered except MS-B. Margins are kept, but they are not ruled in MS - B.
7. Avagraha is omitted, anusvāra is written in similar manner and rules of Sandhis are observed in all.

THE PRINCIPLES FOLLOWED IN CONSTITUTING THE TEXT :

For preparing a critical edition of the KK, I followed the principles and manner which are observed in the following critical editions :

| | | |
|---|---|---|
| 1. | Vālmiki Rāmāyaṇa | Oriental Institute, Baroda. |
| 2. | Mahābhārata | Bhāndārkara Oriental Research Institute, Poona. |
| 3. | Bhojanakutūhalam | University of Travancore, Trivedrum. |
| 4. | Mānasollāsa | Oriental Institute, Baroda. |
| 5. | Rupamanjarīnāmamālā | Praṇava Prakashan, Ahmedabad. |

Eventhough I mention some peculiarities as follows:

i) The collations of the MSS have been noted separating each letter of the line in squares, then variations are noted in foot notes.

ii) The text is constituted on the basis of three MSS and two printed books. The most appropriate readings therein are selected and the other variations are mentioned in foot notes.

iii) Omitted or added words, lines or stanzas are mentioned at various places in foot-notes.

iv) The method of writing anusvāra and omission of avagraha remain the same in all MSS. So they are not noted in foot notes.

श्रीक्षेमदेवविरचितम्

# क्षेमकुतूहलम् ।

## अथ प्रथमोत्सवः ।

### मङ्गलाचरणम् ।

कपोलतलनिर्गलत्प्रमदवारिधारालुठ-
भ्रमद्भ्रमरकाकलीकलितमञ्जुकोलाहलः ।
गिरीशतनयो गुरुः सकलसिद्धिवारांनिधि-
र्भिनत्तु दुरितानि नः सततमोदकादः सदा ॥ १

हृदयभुजविशालः कण्ठभव्दारमालः
समरभुवि करालः शोचिषा शोभिभालः ।
दनुजनिचयकालः सर्वलोकैकपालः
स जयति मतिशालश्छद्मगोपालबालः ॥ २

### ग्रन्थकर्तुर्वंशवर्णनम् ।

भरद्वाजकुलाम्भोधौ वल्लभः पक्षयोर्द्वयोः ।
द्विजराज इति ख्यातो निष्कलङ्कः सदाऽक्षयः ॥ ३

---

B and J begin with श्रीगणेशाय नमः, C begins with श्रीक्षेमशर्मकृतं N प्रथम उत्सवः. B, J omit मङ्गलाचरणम् BB begins from Utsav 2.37 So its variations are not recorded for Utsav 2.37

1 a J निगलित B, J धारालसः
b J, B त्वरितकुल- (for भ्रमद्भ्रमर-)
c J गिराश-
d B, J वः (for नः) J सलिल- (for सतत-). N, C a.r. वः

2 a B विर्विशालः J विचालः
b B सोचिषा सोभिभालः J -तालः (for -भालः) N, C a.r. शालभालः
d B मतिशालः, J मतिशालन् B -छम-, J -छंद- (for -श्छद्म-) B-गोपलः-

3 a B, J omit title N, C. a.r. वल्लभः श्वेतः (for वल्लभः)
b B द्विजराजेति निर्यातो नि.कलंका सदा क्षयात् ।
J द्विजराजतातिर्जाता निष्कलंका सदा क्षया ।

सन्नाहरुद्धान्वयभूषणोऽभूत्सलक्ष्मणो लक्ष्मणपूर्णगात्रः ।
भिषग्वरो राक्षसराजधान्यां विभीषणं यो विगदं व्यधत्त ॥ ४

तदन्वये धर्मधरः समजनि भिषजां शिरोरत्नम् ।
येनाद्यापि जनस्थः सुश्रुतविदुषा रुजां निचयः ॥ ५

अर्जुन तदनु रामः सत्सुहृत्पूर्णकामः
सुकृतगमितयामः पुण्यकर्मस्वधामः ।
गदनिचयविदारी वैद्यविद्याविहारी
बुधजनसुखकारी साधुमार्गप्रचारी ॥ ६

अभूद्यतिस्तस्य सुतो महौजा विशालभैषज्यकलाकलापः ।
हृषीकचक्रं प्रथमं विजित्य व्यजेष्ट यो व्याधिचयं प्रजानाम् ॥ ७

यशोराजो महाराजः प्रह्लाद कामराजकः ।
ह्रादनिस्त्रिपुरारिश्च षट् सुतास्तस्य जज्ञिरे ॥ ८

शीलचातुर्यविज्ञानकलाभैषज्यसंपदा ।
षण्णां समानां भाग्येन महाराजोऽधिको भवेत् ॥ ९

---

4 a B सन्नाह. N explains सन्नाह as सन्नाढ्य इति प्रसिद्धब्राह्मणान्वयभूषण इत्यर्थः । B, J. सालक्ष्मणो N,C another reading स लक्ष्मणो
 b राजधन्यां

5 a B भूषजो, शिरोरत्नं. J शिरत्नं
 b B येनाद्यापि J जरस्थाः B रुजोरुजां hypermetrical

6 a J दारामः
 b B सुकृतमितयामः, -स्वदामः
 c J वैद्यविद्याविहारो
 d B बुधजनत्पुत्यकारी, सधू- J -सुखाकारी, -मार्ग-

7 a B अभूत्यति- J अभूत्पति- B omits सुतो J -कलाया (for कलापः)
 b J व्याधिमयं

8 a B प्रह्लादं. J प्रहादः
 b N,C ह्रदनि or इंदनि two other readings. B ह्रदनि- J निवृदज्ञनित्रिपुरारिश्च

9 b J षस्मासं, महराजोधिको

येनाराधि शाकेश्वरो निजकलाकौशल्यमातन्वता
दिल्लीनाम्नि पुरे स्वपाटवबलैर्बन्दी च निर्मोचितः ।
नीतो ग्रामगडाजरो दशपुरैः सार्कं शकाधीशतो
धन्योऽभून्महाराज एव भिषजां चक्रैकचूडामणिः ॥ १०

ह्रादनिस्तदनुजो बहुतेजा वाग्भटं चरकसुश्रुतशास्त्रम् ।
शील्यन्ननिशमीशसादरः शर्म कस्य न ततान भूतले ॥ ११

मन्मथो जयशर्मा च वामदेवोऽथ पण्डितः ।
सूर्यदासश्च विख्यातो ह्रादनेः पञ्च सूनवः ॥ १२

आचारः पटुता विवेकविधयः कौलीनमत्यद्भुता
भैषज्याश्रितचातुरी प्रियवचः पाण्डित्यसत्सङ्गती ।
पुण्यं पापविरक्तिशक्तिमतयो दीने सदा दानिता
सर्वो मन्मथमाश्रितो गुणगणः श्रीकान्तपूजारतम् ॥ १३

क्षेमशर्ममल्लिनाथसंज्ञकौ तत्सुतावभवतां मनोरमौ ।
यौ विलोक्य न भुवं समागतौ लज्जयेव भिषजौ दिवः पुनः ॥१४

---

10 a J सकेश्वरो
b B -नाम, पुर. B,J निर्मोचिता
c B कीतो (for नीतो). J -पुरैर्सार्कं, शताधी च शतो N explains ग्रामगडाजरो as गडाजरग्राम इति अर्थः, दशपुरैः as दशग्रामैः
d C विषजां (for भिषजां). C,N महराज

11 a J ह्रदनुस्तवनुजो
b J निशशीशमादरः

12 a J वामेवोथ
b J ह्रदने. N ह्रादने.

13 a B omits विवेक-, submetrical
b J सत्संगता
c B -शक्तिमभायो. B, J. दानता
d B गुणः (for गुणगणः) J -पूजारतः

14 a B -बभूवतां. N(a)another reading मल्लिनाथ
b B यो (for यौ), भुवे

निहतनिजविपक्षस्तर्कविद्यासु दक्षः
कलितसुजनरक्षः काव्यकेलीषु दक्षः ।
विधिविहितसुकर्मा संचितानेकधर्मा
विदितसुकविमर्मा राजते क्षेमशर्मा ॥१५

क्षेमो विक्रमसेनभूपतिलकं संसेव्य विश्वग्गुणै-
र्मन्त्रक्षात्रकलावनिः समभवद्वैषज्यविद्याविभुः ।
पात्रापात्रविवेकवान् परहिताधाने सदा सादर-
स्तद्दत्ते च पुरे सुधामयजलापूर्णां व्यधाद्वापिकाम् ॥१६

सीतेव सीता जननी यदीया नेयाऽग्रेसरी पतिदेवतानाम् ।
स क्षेमशर्मा कृतपुण्यकर्मा शर्माणि धत्ते न कथं परेषाम् ॥१७

वैकुण्ठलोकमगमद्दहनं प्रविश्य
सीता सती सुकृतचारुविचारदक्षा ।
मैत्र्या सह प्रथितशीलगुणोदयेन
श्रीनिम्बशाखिकुलभूषणरत्नशोभा ॥१८

श्रीसूर्यदासगुरुपादसरोजसेवा-
हेवाकिना परहितार्थपरायणेन ।
क्षेमेण तर्कपदवाक्यविचारदक्षा
ग्रन्थस्य कर्मविषये धिषणा व्यधायि ॥१९

---

15 a J अकृत- (for निहत-). B -विद्यासुकक्ष N, C विद्यास्वकक्षः
b J -केलेक (for -केलीषु

16 a B संसे- , विसश्वग्गुणै-
b B -कलावनिं. J कलावतं
c J परहितो दाने
d B -पूर्णा J वुधाद्वापिकां

17 a B तदया (for यदीया), नेयाग्रेष . J नेयाग्रेसरा
b B पुण्यशर्मा .

18 b B, J -चार-
d B omits this line J. -शाख- (for -शाखि-).

19 a B सूर्यदासमगुरु -
... B हेवा किलाय रहितार्थपरायणेन

ग्रन्थं व्यधत सुरसं त्वमृतप्रपूर्णं
क्षेमः क्षमाजलनिधिर्द्विजदेवभक्तः ।
भूमण्डले कृतनिवासजना यदीय-
पादार्धभावरसिका न सुधां धयन्ति ॥२०

गौरीमतं चरकवाग्भटभीमसूक्ती-
र्हारीतसुश्रुतमतं सर्वसिद्धपाकम् ।
क्षेमो भिषग्वरसुधीरवलोक्य सम्य-
ग्ग्रन्थं व्यधत्त खलु क्षेमकुतूहलाख्यम् ॥२१

सन्ति यद्यपि नरा बहवोऽस्मिन् दोषदर्शनपराः क्षितिपीठे ।
अस्ति सन्नपि हि कश्चन लोके यो बहु प्रकुरुते गुणमल्पम् ॥२२

ग्रन्थानुक्रमणिका ।

इष्टदेवनमस्कारः प्रथमे वंशकीर्तनम् ।
सप्तधा द्रव्यपाकस्य परिभाषा निगद्यते ॥२३

द्वितीये कथितं गेहमन्नरक्षा महानसम् ।
पाकयोग्यानि पात्राणि तत्र योग्य उपस्करः ॥२४

तृतीयोत्सवके प्रोक्ता वैद्यसूदपतेर्गुणाः ।
विरुद्धाद्यशनं चैव विषमाहारलक्षणम् ॥२५

---

20 a B सुरत्प, J सुरस
d J सुध धमंति

21 a B,J च नल (for चरक). B सुक्तिं
b J,C हारीत- B-सुद्ध-
c B षग्वरसुखान्यवलोक्य corrupt

22 . B,J cite this stanza last but one in प्रथमोत्सवः .
a B बहवेस्मिन्
b B यो लघूनपि गुणान् गुणयंति (for the post half).

23 a J,B omit the title J इष्टदेवं नमस्कारस्ततो च वंशप्रसंशनं ।
B ततो (for प्रथमे), वंशप्रसंशनं
b J,B सगुणो (B सद्गुणो) वस्तुनिर्देश उच्यते प्रथमोत्सवे ।

24 b J योग्याः उपस्कराः

25 a J,B सुतपतिर्गुणाः

ऋतुलक्षणचर्योक्ता तृतीयोत्सवके शुभा ।
पञ्चमे प्रातरारभ्य रात्रियामार्धकावधि ॥२६
यस्य कालस्य यत्कर्म तत्सर्वं च निगद्यते ।
षष्ठे भोक्ताऽशनं वारि क्रमश्च परिवेषणे ॥२७
भोजनार्हाण्यमत्राणि पटुश्च परिवेषणे ।
दृष्टिदोषहराः श्लोका नानावर्णकरो विधिः ॥२८
मांसानां बहुधा पाकपरिचर्या निगद्यते ।
सप्तमोत्सवके प्रोक्तं मत्स्यमांसस्य रन्धनम् ॥२९
षड्विधानां तु शाकानामाचष्टेऽष्टमके विधिम् ।
नवमोत्सवके ख्याताः सन्धानवटिका वटाः ॥३०
चाणका मौद्गसंस्कारा बहुधा माषपिष्टजाः ।
दशमोत्सवके प्रोक्तः पक्वान्नस्योत्तमो विधिः ॥३१
अन्नमांसफलक्षीरकन्दमीनादिभिः कृताः ।
उत्सवैकादशे प्रोक्ताः प्रलेहाश्च सुसट्टकाः ॥३२
अभिष्यन्दनकल्काश्च सुसुप्ताग्निप्रबोधकाः ।
द्वादशोत्सवके प्रोक्तं क्षीरी क्षीरं च पानकम् ॥३३

---

26 a B चोरु- (for ऋतु-), सुसा (for शुभा) C चर्या च (for -चर्योक्ता)
b J -कामवधि

27 a B निवेद्यते (for निगद्यते)
b J भोक्तासनं C भूरि (for वारि)

28 a J भोजनं छिन्नमात्राणि पटुश्च परिवेशकः । N, C insert synonym पात्राणि for अमत्राणि

29 a J पाकः, J, B परिभाषा (for परिचर्या)

30 a J च (for तु).
b J ख्याता, वटः B-वटिका

31 a J चणका, माषनादिभिः कृतः (for माषपिष्टजाः) hypermetrical.
b B -न्नस्यात्तमो

32 a J कृतः

33 b B क्षीर (for क्षीरी). J पाचनकं

वासाधिका रसाला च सुशीतं च करम्भकम् ।
शुद्धदुग्धस्य पानं तु खाडवाचमनोदकम् ॥ ३४

इषीकोच्छिष्टदानस्य वाक्यमार्षमिहोदितम् ।
धूपचन्दनताम्बूलमजीर्णेऽपि शमौषधम् ॥ ३५

किञ्चिदुद्देशमात्रेण प्रोक्तो ग्रन्थे मया क्रमः ।

अथ भोजनप्रकाराः ।

भक्ष्यं भोज्यं लेह्यपेयमित्याहारचतुष्टयम् ॥ ३६

मधुरादिरसोपेतं क्रियते तद्विवेचनम् ।
भर्जनं तलनं स्वेदः पाचनं क्वथनं तथा ॥ ३७

तान्दूरं पुटपाकश्च पाकः सप्तविधो मतः ।
हिङ्गु तैलं च लवणं पानीयं व्यञ्जनेऽखिले ॥ ३८

अनुक्तमपि दातव्यं पारम्पर्याप्तयोगतः ।
दलितं खण्डितं कृत्तं पौलितं तु विवेचितम् ॥ ३९

वाग्दारितं शोधितं च खण्डः पर्यायवाचकाः ।
भर्जितं तापितं भ्रष्टं तान्दूरं ताविकं तथा ॥ ४०

---

34 a B सावाधिकं, C वासाधिका. B, J रसालं
  b B षाडवा-, J षडेवा- (for खाडवा-)

35 a B इक्षुकोच्छिष्ट- J छिष्टदानस्य वाकमाख्यामिहोदितम् ।
  B वाक्यमख्यामहोदितं

36 B omits stanzas from 36 upto 61. J inserts stanzas from 37b upto 61 in षट्कोत्सव without proper order

37 b J पचनं

38 b J स्नेहं (for तैलं), व्यंजनखिले

39 a J पारंपर्याच्च
  b J कृताधिकं च दातव्यं सर्वोभिर्न तु वर्जनम् ।

40 J omits this stanza.

शालिक्यं लक्षितस्त्वैते शब्दाः पर्यायवाचकाः ।

वर्णकरणम् ।

वर्णस्य करणे देयं कुङ्कुमं रक्तचन्दनम् ॥४१

ताम्बूलं यत्र यद्युक्तं तच्च तत्र प्रयोजयेत् ।

वेसवारम् ।

हिङ्वार्द्रमरिचं जीरं हरिद्रा धान्यकं तथा ॥४२

क्रमेण वर्धितं सर्वं वेसवारमिदं शुभम् ।

स्तोकेन वारिणा सर्वं वर्जितं वस्त्रगालितम् ॥४३

मात्रया व्यञ्जने देयं कासमर्दं च तत्स्मृतम् ।

तप्तस्नेहे पचेत्पूर्वं वेसवारकसंज्ञकम् ॥४४

पाकप्रापितसौरभ्यं करालं सूपकैर्मतम् ।

दाडिमीरसः ।

दाडिमे घृतसंतप्ते तक्रं तत्र विनिःक्षिपेत् ॥४५

ततः पक्वं पटे पूतमिति स्याद्दाडिमीरसः ।

उद्धूलनम् ।

एलालवङ्गकर्पूरकस्तूरीमरिचत्वचम् ॥४६

चूर्णमुद्धूलनं देयं भोज्ये क्षीरेक्षुसंभवे ।

व्यञ्जनेषु च सर्वेषु शाकजेष्वन्नजेषु च ॥४७

---

41 a J omits this line

b J title अथ वर्णकरणम्

42 b J मरीचं N(another reading जन्तुजं युक्तं (for यद्युक्तं) in 42a

43 a J मर्दितं (for वर्धितं), सर्व

b J सुर्वं, क्वथितं, वस्त्रमाक्षितम्

45 a J omits title, विनिक्षिपेत्

46 a J पूत इति

b J-title अथोद्धूलम्

47 a J चूर्णस्योद्धूलम्

मांसमत्स्यमेवेत्थवं प्रलेहतलनादिषु ।
आदावेव पचेत्स्नेहं ततो हिङ्गूदकं क्षिपेत् ॥ ४८
वेसवारं सलवणं क्षिप्त्वा तत्पिशितं पचेत् ।
अर्धस्विन्ने क्षिपेत्तक्रमथवा दाडिमीरसम् ॥ ४९
सिद्धपाके च दातव्यं चूर्णमुद्धूलनस्य च ।

सर्वमानपरिभाषा ।

श्रोणी द्रोणाढकं प्रस्थः कुडवश्च पलं पिचुः ॥ ५०
शाणको माषकश्चैव यथापूर्वं चतुर्गुणम् ।

अग्निपरिभाषा ।

प्रपाच्यं सकलं द्रव्यं वह्निना स्वल्पहेतिना ॥ ५१
विना भक्तं विना क्वाथं न क्षीरं बहुवह्निना ।

उदकपरिभाषा ।

भक्तपात्रे जलं देयं तण्डुलेभ्यश्चतुर्गुणम् ॥ ५२
सूपस्य त्रिगुणं तोयं प्रदातव्यं हि मुद्गतः ।
माषसूपे जलं किञ्चित्स्वधिकं मुद्गसूपतः ॥ ५३
कृशरायां जलं किञ्चिद्धीनं तु मुद्गसूपतः ।
व्यञ्जनानां प्रभूतानां तोयसंस्था त्वनेकधा ॥ ५४
स्वभावकठिनं किञ्चित्किञ्चिन्मृदुतरं स्मृतम् ।
कठिनं बहुतोयेन मृदु स्वल्पेन पच्यते ॥ ५५
दिक्सङ्ख्यापलमांसस्य स्नेहमात्रा पलं स्मृता ।
लवणार्धपलं देयं वेसवारं पिचु स्मृतम् ॥ ५६

---

48 b J पचेस्नेहततो corrupt.
N,C another reading हिङ्ग्वादिकं

49 a J पतत्पिशितं corrupt.
b J वेषवारं, दाडिमीरसः

50 a J चत् (for च)
b J omits stanzas from 50[b] upto 55

54 b N,C another reading तोयसंख्या

56 a J द्विपसंख्या- , स्मृतम्
b J वेषवार

टङ्कमुद्धूलनं च स्यावेतन्मानं तु रन्धने ।
सपादं मत्स्यमांसस्य द्रव्यं देयं तु मांसतः ॥ ५७

षड्विधानां तु शाकानां द्रव्यं देयं तु मांसवत् ।
अन्नजेष्वथ मेह्येषु किञ्चिद्धीनं तु मांसतः ॥ ५८

शिखरिणीपरिभाषा ।

शुभ्रशर्करया योज्यं निर्नीरं द्विगुणं दधि ।
उक्तमुद्धूलनं देयं रसालायां बुधैः स्मृतम् ॥ ५९

पानकपरिभाषा ।

मूरुहाणां फलेऽम्लत्वे स्वल्पाधिक्यं हि दृश्यते ।
तस्मात्तु शर्कराभागो नैकः पानेषु कथ्यते ॥ ६०

सामान्यतो मयाऽप्युक्ता परिभाषाऽत्र भोजने ।
न्यूनाधिका च कर्तव्या सर्वो भिन्नरुचिर्जनः ॥ ६१

अध्यायोपसंहारः ।

इष्टदेवनमस्कारः प्रथमे वंशकीर्तनम् ।
द्रव्याणां परिभाषा च पाकरसा त्वथोच्यते ॥ ६२

इति श्रीनरवैद्यमल्लभट्टात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले ग्रन्थे वंशवर्णनपरिभाषाकथनं नाम प्रथमोत्सवः ॥ १ ॥

---

57 a J शाणमु- (for टङ्कमु-), omits तु रन्धने, submetrical

59 a J title अथ शिखरिनपानकयोः परिभाषा, योज्या, निरीनीरं
 b J रसालेषु

60 a J omits title, फले चाम्ले
 b J तस्मात्शर्करयाभागो

61 J omits this stanza

62 B, J insert:
इष्टदेवं नमस्कृत्य ग्रंथारंभस्य सिद्धये ।
वर्णयित्वा निजान् वंशान् पाकरसा ततोच्यते ॥

COLOPHON : B - विनिमित्ते, - वंशप्रशंसो नाम प्रथमोत्सवः ।
J - अथ वंशप्रसंशनो नाम प्रथमोत्सवः ।

# अथ द्वितीयोत्सवः ।

## शरीररक्षणप्रशंसा ।

धर्मार्थकाममोक्षाणां शरीरं साधनं बुधैः ।
अत एवैकऋत्येन सर्वैरेवाभिधीयते ॥ १

तच्च भूतमयं तानि पच्यन्ते स्वाग्निनाऽनिशम् ।
देहे गच्छति गच्छन्ति पक्वानि च विशेषतः ॥२

तत्तत्संबंध्यमानं सवाहारं पाञ्चभौतिकम् ।
नानाविधरसं भोक्तुमात्मा धर्मार्थिकाङ्क्षति ॥३

तेन पूरितकोष्ठस्तु सौहित्ये सुखमाप्नुयात् ।
स्वादुत्वं षड्रसादीनां तेषां प्रायोऽन्नमाश्रयः ॥४

तच्च शाल्यादिविविधं मांसक्षीरफलादिकम् ।
किंतु व्यक्तरसं प्रायो बहुधैवोपजायते ॥५

अन्नपानं विधातव्यं विशेषेण महीपतेः ।
योगक्षेमौ तदायत्तौ धर्माश्च प्रभवन्ति हि ॥६

---

1 a B,J omit title line. J begins with stanza 1. B - द्वितीयोत्सवः.
b B एकसत्वेन, J वैकमत्येन N,c another reading एवैकमत्येन.

2 a J स्वाग्निनानिशिं, B स्वाग्निनानिशां, भूतयं

3 a B तत्संबंध्य
b B -कांक्षति

4 a B सोहित्यमसुचिमाप्नुयात् (for the post half). J सौहित्य
b B श्रेयो- (for प्रायो-

5 a B -फलोदिकं
b N,c another reading -पद्युज्यते

6 a J महोपतेः
b J योगक्षेमौ यतो जातौ धर्माद्याश्च भवंति हि ।
B -मोयतौ जातरे धर्माद्याश्च भवंति हि corrupt.
N,c another reading - यतो यातौ धर्माद्याश्च भवन्ति हि ।

गौरीमतादिलिखितास्थितपाकसंप-
द्व्यापारितौदनिकसंभ्रमदर्शनीयम् ।
स्वप्नेऽपि वैरिजनगोचरतामयातं
चन्द्रद्रवैः सुरभितं भुजिकर्मधाम ॥७

आग्नेयां दिशि कर्तव्यमावासस्य महानसम् ।
गवाक्षजालमार्गाढ्यमर्धभित्त्युपल्लेपितम् ॥८
चुल्ली तत्र प्रकर्तव्या पूर्वपश्चिममायता ।

पाकपात्राणि ।

मृण्मयादीनि भाण्डानि क्षालितानि च वारिणा ॥९
तेषु यत्पच्यते द्रव्यं गुणवत्सर्वसंमतम् ।
मृदभावे पचेल्लौहे चक्षुर्दोषविकारनुत् ॥१०
कांस्यजे पाचितं यद्धि तद्धितं भक्तिदं शुचि ।
यच्च ताम्रमये सिद्धं न रुच्यं त्वम्लपित्तकृत् ॥११
सौवर्णे राजते पाच्यमाढ्यभूमिभृतां गृहे ।
तत्पात्रं सर्वदोषघ्नं धिषणोत्सवदायकम् ॥१२

---

7 a B, J omit title
c J -जामयातं (for -तामयातं)
d B -कर्म्मधाम

8 a B महाननसम्. J कर्तव्यमतासस्य
b B -माजाढ्य- (for -मार्गाढ्य-). J -प्रलक्षितं (for -पल्लेपितम्)

9 b B, J omit title B मृण्मयदीनि.

10 a J -संमितं
b B पार्थाभावे, J मृदाभावे

11 a B पचितं
b J तत्सर्वं त्वम्लपित्तकृत् (for the post half).

12 a B पाच्यमढ्य-
b J -त्सवदायकं. B विशेषोत्सवदायकं N -दायकम्

रन्धितद्रव्यस्य पात्रान्तरे स्थापनम् ।

संकीर्णे पात्रसंसारे मार्गे वा ग्रामवर्जिते ।
स्थापयेद्गुणवान् सूदः सिद्धान्नं पात्रकान्तरे ॥१३

भक्तः स्वपात्रके स्थाप्यो न स्थाप्यः पात्रकान्तरे ।
घृतं काष्ठायसोः स्थाप्यं मांसं मांसमेवं रसम् ॥१४

स्थापयेद्राजतं हैमं पात्रे लोहेऽथ काष्ठजे ।
पत्रादि षड्विधं शाकं स्थाप्यं काष्ठाश्मलोहजे ॥१५

पक्वान्नं पिष्टजं भक्ष्यं स्थाप्यं कांसेऽथ दारुजे ।
धारयेत्सुशृतं क्षीरं पार्थिवे वाऽथ काष्ठजे ॥१६

पानीयं पायसं तक्रं मृन्मयेष्वेव धारयेत् ।
काचजे स्फाटिके वाऽथ वैडूर्यादिविचित्रिते ॥१७

धारयेत् सर्वदा पात्रे रागखाण्डवसट्टकान् ।
उक्तपात्रान्तरे स्थाप्यं यद्द्रव्यं तद्गुणापहम् ॥१८

---

13 a B, C omit title, J- अथ रंधितद्रव्यं पात्रांतरस्थापनं.
B, J-संभारे (for -संसारे). J मार्गो
b B स्थापये- . J -गुणवत्

14 a B, J भक्तं B स्वपाचके स्थाप्यं J स्थाप्यं
b B, J काष्ठायसे. J न स्थाप्यं. B, J मांसमेवो J रस.

15 a J -द्राजसे
b B पत्रदि-, J पात्रादि-

16 a B भक्षं, J भक्ष्मं. B कांस्यद्य
b B, J पार्थपात्रेद्य काष्टजे (for the post half)

17 b B वैडुर्यादिविचिपित्रिते

18 a B -सर्वपात्रेषु (for -सर्वदा पात्रेषु). J पत्रे B-षाडव-, J-षांडव-
b J तत्सुखावहम्
N- another reading तद्गुणावहम्

सर्वदा सुखदं ह्यमन्यथा दोषमर्हति ।

महानसोपयोग्युपकरणानि ।

वस्तूनि भोजनार्हाणि विविच्यानि पुनः पुनः ॥१९

सर्वाणि गुणयुक्तानि स्थापितानि महानसे ।

दारुपात्ता मार्जनी वाटी पूतहण्डी सुकूर्चिका ॥२०

घर्षणी वैणवं पात्रं जलपूर्णस्त्वलिञ्जरः ।

वह्निसंजननग्रावः कुद्दालं सुकुठारकः ॥२१

दारुखण्डानि शुष्काणि हस्तमात्रकृतानि च ।

अजीर्णान्यनतिस्थूलान्यजन्त्वमलानि च ॥२२

तिलउच्चालनी (?) पीठं मुसलं चाप्युलूखलम् ।

सूर्पं लोष्ठं शिला दर्वी चतुरस्रा च पट्टिका ॥२३

संदंशकं तु युगलं वस्त्रखण्डचतुष्टयम् ।

नालिका छुरिका चैव सुशूर्पं सुकटाहकम् ॥२४

वह्निसञ्चालनार्थाय दर्वी दीर्घा सुलोहजा ।

इत्यादिवस्तुजातं हि युज्यते च महानसे ॥२५

---

19 a J title अथ महानसोपयोग्योपकरणानि B, J दोषकारकं
b B विचित्राणि, J विविधानि

20 b B बाढा (for वाटी).

21 a B वैणव
b. J कुद्दालः

22 a B हस्तमात्राणि चिंधनं C हस्तमात्र- J शुष्काणि, हस्तमात्राणि वेधनं

23 a B तंतुवुच्चालीनी, J तितयुश्चालनी, मुशलं, -लुखलं
b B सर्ष्ये, दार्वी J चतुरस्ता

24 a J -खंडं
b J छुरिका, सुश्रूर्पं. B सुसुर्प्यकटाहकम्

सविषान्नपरीक्षार्थं जन्तवः ।

तस्याजिरे मृगमरालचकोरकीर-

क्रौञ्चाफलवङ्ग शिखिकुक्कुटचक्रवाश्च ।

धार्या विषस्य परिहारधिया धनेशैः

किं श्रीमतां जगति दुर्लभमस्ति किञ्चित् ॥२६

एणो रौति स्खलति गमने राजहंसश्चकोर-

स्याक्षिद्वन्द्वं विरजतितरां वान्तिकृत्कीरपत्री ।

रौति क्रौञ्चो विसृजति कपिर्मीयते नीलकण्ठः

शब्दप्रीतिं सपदि सृजतो दक्षवक्रू विषेण ॥२७

सविषान्नपरीक्षा ।

ओदनो विषवान् सान्द्रो याति वैवर्ण्यमाशु हि ।

चिरेण पच्यते पक्वो भवत्पर्युषितोपमः ॥२८

मयूरकण्ठतुल्योष्मा मोहमूर्च्छाविकारकृत् ।

हीयते वर्णगन्धाद्यैः क्लिद्यते चन्द्रिकाङ्कितः ॥२९

व्यञ्जनान्याशु शुष्यन्ति श्यामक्वाथानि तत्र च ।

हीनातिरिक्तविकृता छाया दृश्यते नैव वा ॥३०

---

26 a B omits title, J अथ विषपरीक्षार्थं जंतवः । J चकोरकी-
   b B -शिशिकुर्कटचक्रवाश्च
   c J धनेशौ
   d J किंचित्

27 a J एणो
   b B पक्षदंद्वं, -कीरपत्रः
   c J कपिः क्रीयते
   d J दक्कुक्कुटः अवक्रू विषेण (for दक्षवक्रू विषेण) corrupt and hypermetric

28 a B omits title, J अथान्नपरीक्षा B उदनो विषवा साँद्रो (for the prior half)
   J विषवाँ साँद्रो जावाति

29 a J -मूर्छा-

30 a J तस्य (for तत्र)
   b B दृश्येते
   J -रिक्ताविकृता

फेनोर्ध्वराजिसीमन्ततन्तुबुद्बुदसंभवः ।
विच्छिन्ना विरसा रागाः खाडवाः शाकमांसिषम् ॥३१
नीला राजि रसे ताम्रा क्षीरे दध्नि च दृश्यते ।
श्यावा पीता सिता तक्रे घृते पानीयसन्निभा ॥३२
मस्त्वन्यपि कपोताभा राजी कृष्णा च सूपके ।
काली गव्ये तथा क्षौद्रे हरितैलेऽरुणोपमा ॥३३
पाकः फलानामामानां पक्वानां च विशीर्णता ।
द्रव्याणामार्द्रशुष्काणां वैपरीत्यं तु जायते ॥३४
मृदूनां कठिनानां च भवेत्स्पर्शविपर्ययः ।
माल्यस्य स्फुटिताग्रत्वं म्लानिर्गन्धान्तरोद्भवः ॥३५
श्याममण्डलता वस्त्रे सादनं तन्तुपक्ष्मणाम् ।
धातुमौक्तिककाष्ठाश्मरत्नादिषु मलाकृतिः ॥३६
स्नेहे स्पर्शप्रभाहानिः सप्रभत्वं तु मृन्मये ।

विषदलक्षणानि ।

विषदः श्यावशुष्कास्यो विलक्षो वीक्षते दिशः ॥३७

---

31 a B - राजीसामंते - , J - राजीसीमांतस्तंतु - . B बुध्वरिसंभवः

b B, J त्रिछिन्न . B खाडवः , J पांडवः

32 a B, J नील राजी ; दधि निदृश्यते

b B, J सीते

33 a B, J सूदके

b B illegible line . J मद्ये (for गव्ये).

34 a B पक्वाणां

35 a B - सस्प - (for - स्पर्श - )

b B माल्लस्य J ग्लानि - (for म्लानि - ).

36 a J सेदनं

37 a BB starts from this stanza and reads Utsava आ
B, BB, J च (for तु) BB begins with ॐ श्रीमहामंगलमूर्तये गणेशाय नमः।
BB - वर्णा - (for - प्रभा - ), सप्रभुत्वं

b B, J omit title.

स्वेदवेपथुमान् स्तब्धो भीतः स्खलति जृम्भते ।
प्राप्यान्नं सविषं वह्निरेकावर्तः स्फुटत्यपि ॥ ३८
शिखिकण्ठाभ धूम्रार्चिरनर्चिश्चोग्रगन्धता ।
म्रियन्ते मक्षिकाः प्राश्य काकः क्षामस्वरो भवेत् ॥ ३९
पाकरक्षा मया प्रोक्ता तस्य स्थानं च शोभनम् ।
अथातः प्रोच्यते वैद्य सूपकारगुणागुणाः ॥ ४०

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहलग्रन्थे महानसोपयोग्योपकरणप्रशंसनो नाम द्वितीयोत्सवः ॥ २ ॥

---

38 a BB स्पनवोपथुमाँ corrupt. स्तब्धो.
b BB प्राप्यान्न
39 a B -श्चोनश्चिरोग्रगंधता corrupt
J - धूम्रार्चि-
b B मृयते
BB क्षेमस्वरो
40 a. BB तस्या, J तस्याः
b BB गुणागुणम्
J वैद्यसूपकारगुणं submetrical.

COLOPHON : B, BB -सूपकारप्रशंसो नाम द्वितीयोत्सवः ।

# अथ तृतीयोत्सवः ।

## अथ वैद्यसूपकारप्रशंसा ।

राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत् ।
सर्वदा स भवत्येवं सर्वत्रैवाप्रमादवान् ॥ १

अन्नपानं विषाद्रक्षेद्विशेषेण महीपतेः ।
यस्माच्च चेतोऽनित्यत्वमश्ववत्प्रथितं नृणाम् ।
न विश्वसेदतो राजा, कदाचिदपि कस्यचित् ॥ २

आयुर्वेदकृताभ्यासः सर्वत्र प्रियदर्शनः ।
युक्तिहेतुसमायुक्त एष वैद्यो विधीयते ॥ ३

क्रोधपारुष्यमात्सर्यमायालस्य विवर्जितम् ।
जितेन्द्रियं दयावन्तं शीलशौचक्षमान्वितम् ॥ ४

कुलीनं धार्मिकं स्निग्धं सुव्रतं सन्मते स्थितम् ।
अलुब्धमशठं भक्तं कृतज्ञं प्रियदर्शनम् ॥ ५

मेधाविनमसंभ्रान्तमनुरक्तं हितैषिणम् ।
पटुं प्रगल्भं निपुणं दक्षमालस्यवर्जितम् ॥ ६

---

Title - B - अथ वैद्याहारसूपकारप्रशंसनोत्सव कथ्यते । BB अथ वैद्याहारसूपकार-प्रशंनार्थं निवेशयेत् । J omits.

1 a B - राजगृहसन्नं, BB omits this line.

b B भवत्येव, N - भवत्यैवं (corrupt), BB सर्वदा संभवत्येव सर्वत्रैव प्रमादवान्

2 B reads - तस्माद्वैद्येन सततं विषाद्रक्ष्यो नराधिपः ।
न विश्वसेदतो राजा कदाचिदपि कस्यचित् ॥
BB - तस्माद्वैद्येन सततं विषाद्रक्षा ॥ तदपि कस्यचित् ... corrupt and incomplete
J - तस्माद्वैद्येन सततं विषाद्रक्ष्यो नराधिपः ।
न विश्वसेदतो राजा कदाचिदपि कस्यचित् ॥

3 a J - सर्वत्रप्रतिभाग्यविदर्शनः ।

b B - उक्तहेतुसमायुक्तो, वै (for वैद्यो). BB उक्त- , J विधियते.

4 a BB - लोभैर्ष्यामानमात्सर्यमायालस्य विवर्जितं ।

b B, BB, J - क्षमावंतं (for दयावन्तं). J - दयान्वितं (for - क्षमान्वितम्).

5 a BB, J - सुभृतं (for सुव्रतं).

सर्ववैद्यगुणैर्युक्तं नित्यं सन्निहितागदम् ।
महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम् ॥७
वैद्यः पुरोहितो मन्त्री दैवज्ञश्च चतुर्थकः ।
प्रातरेव हि द्रष्टव्या नित्यं स्वश्रेय इच्छता ॥८
दैवज्ञो मन्त्रविद्वैद्यश्चतुर्थश्च पुरोहितः ।
एते राज्ञा सदा पोष्याः कृच्छ्रेणापि स्त्रियो यथा ॥९
वैद्यविद्वज्जनामात्या यस्य राज्ञः प्रियंवदाः ।
आरोग्यधर्मकोशाश्च प्रहीयन्ते हि सर्वदा ॥१०
गतश्रीर्गणकान् द्वेष्टि गतायुश्च चिकित्सकान् ।
गतश्रीश्च गतायुश्च ब्राह्मणान् द्वेष्टि भारत ॥११
क्वचिद्वित्तं क्वचिन्मित्रं क्वचिद्धर्मः क्वचिद्यशः ।
क्वचिदभ्यासयोगश्च नाफलं हि चिकित्सितम् ॥१२
चिकित्सितशरीरं हि न निष्क्रीणाति यो नरः ।
तेन यत्क्रियते पुण्यं तत्फलं भिषगश्नुते ॥१३

---

7 a BB निर्स (for नित्यं).
b J प्रपूजितं (for तद्विद्यपूजितम्).(submetrical).
8 b ?, BB, J वाछता (for इच्छता). B स्वश्रेयबांब (corrupt.)
9 a B दैवज्ञै, पुरोहिः (corrupt)
b B स्वियो (for स्त्रियो)
10 a B -विद्वजना-, BB विदज्जुहिज्जनामासा----वदः incomplete and currupt
b BB कोशञ्च प्रव...ते (corrupt)
11 a N, B, BB द्वेष्टी
12 b J चिकित्सितः
13 b B वैद्यमश्नुते.
BB omits this stanza.

संचयं च प्रकोपं च प्रसरं स्थानसंश्रयम् ।
व्यक्तिं भेदं च यो वेद दोषाणां च भवेद्भिषक् ॥१४

व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥१५

कुचैलः कर्कशो दीनो ग्रामीणः स्वयमागतः ।
पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि ॥१६

सुश्रुतं न श्रुतं येन हारीतं येन हारितम् ।
नालोकि चरकं येन स वैद्यो वैद्यनिन्दितः ॥
सुश्रुतं न श्रुतं येन किमन्यैर्बहुभिः श्रुतैः ॥१७

श्रुतचरितसमृद्धे कर्मदक्षे दयालौ
भिषजि निरनुबन्धे देहभारं निवेश्य ।
भवति विपुलतेजाः स्वस्थकीर्तिप्रभावः
स्वकुशलफलभोगी भूमिपालश्चिरायुः ॥१८

---

14 a J प्रासरं स्थानमेव च , B प्रशारस्थानमेव च, BB प्रदानस्थानमेव चः (for the post half).

b J-B दोषाणां च हि यो वेद स भवेद्भिषगुत्तमः ।
BB - दोषाणां च हि यो वेद स भवि ....... incomplete

16 a J,B कुचोलः , BB कुचीलः . J,B - दीनः , स्वाधीतः (for ग्रामीणः).
BB omits दीनो , अलसो लुब्ध मत्सरी (for the post half).

17 a B सुश्रुतं सुश्रुतं येन किमन्यैर्बहुभिः श्रुतैः ।

b B,BB omit this line ... substituted

c J,BB सुश्रुतं सुश्रुतं येन (for the prior half).

18 a BB धर्मदक्षे, transposes श्रुतचरितसमृद्धे and धर्मदक्षे.

b J निरनुबंधे . BB देह (for देहभारं) submetrical

c J,B स्वच्छ- (for स्वस्थ-). B विपुलतेजः

d J श्चिरायुं च . B स्वकुलसफलभोगी

भोजनसमये राजानं प्रति वैद्यस्यानुशासनम् ।

पारंगतः सकलवैद्यकसंहितानां
सत्पाकशासनबुधो गुरुवत्प्रगल्भः ।
ब्रूयादिदं नरपतेः परिवेषकाले
धन्वन्तरिप्रतिभटो भिषजां वरेण्यः ॥ १९

देवावधारय शुभौदनसूपसर्पिः
पाटोलकं दृढफलं मृदु पर्पटं च ।
माँसं च शाकसहितं शुचि पिष्टमन्नं
पक्वान्नपानकयुतं क्वथितं पयश्च ॥ २०

मधुरमधुरमादौ मध्यतोऽम्लौकभावः
कटुकटुकमथान्ते तिक्ततिक्तं तथैव ।
यदि सुखपरिणामं वाञ्छसि त्वं हि राजन्
त्यज खलजनसङ्गं भोजनं मा कदाचित् ॥ २१

फलमादौ हि चाश्नीयाद्भोजनस्य नरोत्तम !
विना मोचफलं तद्वद्वर्जनीया च कर्कटी ॥ २२

---

19 J omits title.
c J परिवेशकाले.

20 a B- अहोदनसूपसर्पिः
b J पर्प्पटं च
c J सुचि , BB भुचि पिसूपक्व corrupt
d B कथितं

21 C reads the title - मधुरादि रसक्रमेण भोजनस्य नियन्त्रणम् ।

22 a J द्वि (for हि). B माश्नीया-,
b B तद् वर्जनीया.

याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोद्वेगो युग्मेऽतीते बलक्षयः ॥२३

मात्राशी सर्वकालं स्यान्मात्रा ह्यग्ने प्रवर्तिका ।
मात्रां द्रव्याण्यपेक्षन्ते गुरूण्यपि लघूनि च ॥२४

अर्धं गुर्वन्नमश्नीयाल्लघ्वन्नं नातितृप्तितः ।
मात्राप्रमाणमादिष्टं सुखं येन विजीर्यते ॥२५

भोजनं हीनमात्रं तु न बलोपचयौजसे ।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ॥२६

अतिमात्रं पुनः सर्वमाशु दोषं प्रकोपयेत् ।
शाकं नवान्नमुच्छिष्टं शीतमुष्णीकृतं त्यजेत् ॥२७

अनात्मवन्तः पशुवद्भुञ्जन्ते येऽप्रमाणतः ।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥२८

आहारं पचति शिखी दोषानाहारवर्जितः पचति ।
दोषक्षयेऽपि धातून् पचति च धातुक्षये प्राणान् ॥२९

---

23 b B युग्मेतीती, BB रसक्षयः
24 C reads the title मात्रापूर्वकभोजनस्य फलम् ।
a J प्रवर्त्तिका. B मात्राद्रमेः प्रवर्त्तिका (for the post half) corrupt.
b J and BB transpose $24^b$ and $25^b$.
25 a B लघूणां चाति---- illegible. J, BB omit
b B विजायते
26 b J हेतुत्वं
27 a J सर्वत्राशु
b N and C another reading शाकावराणमुच्छिष्टं BB the prior half illegible
28 C reads the title अतिभोजनस्य दोषाः
b B रोगाणां कथ्यते मूलमजीर्णमाप्नुवंति ।
29 a J omits पचति in the post half. BB हा शिखि विवर्जितः incomplete and corrupt.
b J दोषक्षयो च B दोषक्षये च धातुन्नु BB च (for अपि), धातू पचाति corrupt.

बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात् ।
मन्दो भवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥३०
अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ॥३१
भुक्तादौ सलिलं पीतं कार्श्यमन्दाग्निदोषकृत् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥ ३२
तृषितस्तु न चाश्नीयात्क्षुधितो न पिबेज्जलम् ।
तृषितस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी ॥ ३३
अत्युष्णान्नं बलं हन्ति शीतं शुष्कं च दुर्जरम् ।
अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं बलप्रदम् ॥३४
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्वास्ववस्थासु न क्वचिद्वारि वार्यते ॥३५
चयप्रकोपोपशमा वायोर्ग्रीष्मादिषु त्रिषु ।
वर्षादिषु च पित्तस्य श्लेष्मणः शिशिरादिषु ॥ ३६

---

30 a J बुभुक्षिताश्नाति तस्य अल्पाहारे बलक्षयं । B विभुक्षितो BB विभुक्षिताग्नि ..... incomplete

31 a B अत्यंबुपान्तान्न corrupt.

34 a BB सीतं

b B ग्लाग्लानिकरं B,BB च भोजनं added in the end hypermetrical

35 b J सर्वस्ववस्थासु corrupt BB वर्थते.

36 a B चयप्रकोपोपसम

BB चयप्रकोपोपशम वायात्मादिषु त्रिषु । sub-metrical

b J कफस्य (for श्लेष्मणः)

BB श्लेष्मणौ

राजन्नध्यशनं त्याज्यं त्याज्यं च विषमाशनम् ।
त्यजेद्विरुद्धमाहारं तत्सर्वं दोषकारकम् ॥ ३७

विद्याद्ध्यशनं भूयो भुक्तस्योपरि भोजनम् ।
अकाले बहु चाल्पं वा भुक्तं तु विषमाशनम् ॥ ३८

वल्लीफलैरम्लकुलत्थशाकैर्मत्स्यैः सुरामांसतिलैः करीरैः ।
पिण्याकजम्बूलवणैश्च दध्ना व्यस्तैः समस्तैश्च पयो विरोधि ॥३९

घृतं धान्यं च तक्रेण दधिमद्यैश्च कुक्कुराः ।
वरटा न हिता मद्यैः सुरा कृसरपायसैः ॥ ४०

कपिञ्जलो तित्तिरिलावकौ च गोधामयूराबुरुबूकतैलैः ।
यथाविरुद्धाश्च तथा कपोतास्तैलेन भृष्टा अपि सार्षपेण ॥४१

एकद्व्यं बहुमांसानि विरुद्ध्यन्ते परस्परम् ।
मधुसर्पिर्वसातैलपानीयानि यथाक्रमम् ॥ ४२

---

37 a J omits त्याज्यं from the prior half. B राजान्नंध्यशनं corrupt
BB राजन्नत्वशनं

38 a J विद्यत-, B विंद्यद-
b BB कमल्प (for चाल्पं)

39 a B-मात्स्यैः. BB -फलैरर्जुनम (?) शाकैः
b J विरोधिभिः, B विरोधिः. BB पयोभिः (for पयो).

40 a BB omits the prior half.
b J वररटानाहिता corrupt, कृतिर-(for कृसर-)
B कृसिरपायल्कै corrupt

41 a J कपिंजलिस्ति corrupt, मयूराम्बरबूकतैलैः
B मयूराबुरु...illegible BB कपिंजरः लैः तित्तिरणवलेश्च ....corrupt and incomplete
b B सार्षपेन BB तैले न भ्रष्टापि च सार्षपे ग्णाः (for the post half) hypermetrical

42 a J एकस्य
b J यथाभेसा (for यथाक्रमम्).
BB मधुसर्पितथातुल्यं पानीयानि यथाभेसं ।

अशीतेनाम्भसा स्नानं पयःपानं नवाः स्त्रियः ।
एतद्धि मानवाः पथ्यं स्वल्पं स्निग्धं च भोजनम् ॥४३

भोजनं बलकृत्सद्यः प्राणिनां देहधारणम् ।
आयुस्तेजःस्वरोत्साहधृतिस्मृतिसुखप्रदम् ॥४४

भुक्त्वोपविशतस्तुन्दं बलमुत्तानशायिनः ।
आयुर्वामकटिस्थस्य मृत्युर्धावति धावतः ॥४५

उपयुक्ता यत्र वयं तत्ते राजन् कदाचिदपि माभूत् ।
जितशत्रोरपि नृपतेर्वद कस्य न वल्लभाः करिणः ॥४६

अथ सूपकारप्रशंसा—

पितृपैतामहो दक्षः शास्त्रज्ञो मिष्टपाचकः ।
शौचयुक्तोऽथ भक्तश्च सूपकारः स शस्यते ॥४७

---

43 a J स्नानेः , नवा B स्त्रियं
b J, BB एतद्वै . J, B, BB स्निग्धमल्पं तु भोजनम् (for the post half)

44 a B भोजनं बल्सद्यः प्राणीर्नेदेहधारणं corrupt.
J, BB प्रीणनं (for प्राणिनां)

45 a J भुक्तासं विषतस्तुंदं बलं चोत्तानशायिनः ।
B, BB भुक्त्वा संविशतस्तुदं बलं चोत्तानशायिनः ।
b BB धावताम् (for धावतः).

46 a B, BB तत्तो
b J वल्लभाल्करिणः repeatedly written

47 BB omits the title.
a B पितृपैतामहो
b J, B, BB उच्यते (for शस्यते)
N, C another reading सूदकारः

भवेयुर्धार्मिकाः स्निग्धाः सूपकाराः क्रमागताः ।
कृतोष्णीषाश्च शुचयस्तथा वैद्यवशास्थिताः ॥ ४८
अन्येऽपि तत्र ये केचिच्चरन्ति परिचारकाः ।
तेऽपि चैवंविधा एव तदध्यक्षोऽपि तादृशः ॥ ४९
सूदकारपतिस्तत्र प्रायो वैद्यगुणान्वितः ।
तत्रत्यजनतत्त्वज्ञस्तत्प्रशासनतत्परः ॥ ५०
जीवनं जीविनामन्नमृतूक्तं विधिपाचितम् ।
तदेवाविधिना भुक्तं परिणामे विषोपमम् ॥ ५१
ऋतूनां लक्षणं ज्ञात्वा ततस्तद्विधिमाचरेत् ।
अत एव प्रवक्तव्यं तच्चिह्नं तद्धिताहितम् ॥ ५२

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेम-कुतूहले ग्रन्थे वैद्याहारसूदकारप्रशंसनो नाम तृतीयोत्सवः ।

---

४८ b J -वशे स्थिताः

४९ a B चारकाः

50 a J, B, BB सूपकार-
b B omits this line
J -शासन- (for -प्रशासन-)

51 a J जीवानामन्नमृतूक्तं
b J तदेवाधिनाभुक्तं
BB तच्चाव विधिना
B विषोपमं

52 b BB प्रशंसंति वसाज्ञान मनीषिणः ..... incomplete.

COLOPHON: B and N transpose ग्रन्थे and क्षेमकुतूहले
J श्रीक्षेमशर्मविनिर्मिते.

## अथ चतुर्थोत्सवः ।

### ऋतुभेदाः ।

शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः ।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादिमे ॥१
उत्तरायणमाद्यैस्तैरन्त्यैः स्याद्दक्षिणायनम् ।
आद्यमुष्णं बलहरं तत्रान्यद्बलदं हिमम् ॥२

### हेमन्तलक्षणचर्ये ।

तुषारजालैः पिहितानि यत्र सबाष्पनीराणि मुखानि भानुः ।
प्रातः प्रसन्नानि करैः करोति दिशां वधूनामिव खण्डितानाम् ॥३
प्रियङ्गुपुन्नागकरोध्ररेणुर्भ्रजैर्नभो वाति हिमाद्रिवायुः ।
आच्छादयन् धूमवितानलीढं विद्यादृतुं तं हिमनामधेयम् ॥४
शीतानिलसंस्पर्शाद्बलवान् मारुतो यतः ।
अतो हेमन्तसमये सेव्या शुण्ठ्या हरीतकी ॥५
तिलतैलेन शिरसो गात्रस्याभ्यङ्गमाचरेत् ।
सेवेतादित्यकिरणान्निर्धूमकहुताशनम् ॥६

---

1 a Title J अथ ऋतुचर्या। B, BB अथ ऋतुलक्षणचर्या । J ग्रीष्म
b BB -युग्मो स्यात्तथैव दक्षिणायनं

2 a J -स्तैस्त्रिभिः, B -तैस्त्रिभिश्च, BB -तैस्त्रिभि·
b J हिम

3 a Title J अथ हेमतः B, BB हेमंतः J -जाला, B -जाल, BB -जालहितानि
b J खण्डितानं

4 a J -भ्रजै-, हिमद्रिवायुः. B हिमाद्रिवायुः
b J -धुम-, विद्यादतुं. BB -वितानजीढं

5 a B मरुतो. BB -स्पर्शाल्लिदीन corrupt.
b B युक्तहरीतकी hypermetrical.

6 a J तिलतैलं
b J निर्धूमं च हुताशनं (for the post half).

आच्छादयेच्च कौशेयं प्रावारं चित्रमम्बरम् ।
कार्पासकं नव्यं सेव्यं गृहं चागुरुधूपितम् ॥ ७

हेमन्ते कटुतिक्तोष्णमम्लक्षारघृतं दधि ।
गोधूमतिलमाषेक्षुविकारान् भक्षयेद्बहून् ॥ ८

औदकानूपमांसानि कौलश्रद्गलप्रलोहितान् ।
हेमन्ते सेवयेन्नित्यमाशु शीतार्तिशान्तये ॥ ९

कस्तूरिकागरुविमिश्रितकुङ्कुमार्द्र-
देहां निषेव्य रमणीं रतिस्वेदस्विन्नः ।
शेते कृती हिमविशालनिशागमेषु
तारुण्यपीनकुचयोगनिरस्तशीतः ॥ १०

अथ शिशिरलक्षणचर्ये ।

यत्रामृतद्युतिकरव्रजसन्निकाशै-
र्व्याप्ता दिशश्च विदिशश्च तुषारजालैः ।
रुक्षं नभश्च हिमपीडितवच्च वह्ने-
राशामुपैति तपनः शिशिरः स कालः ॥ ११

---

7 a J आछादयेच्च
b B कूर्पासकं

8 a J -क्षारं- BB लिक्तोम्लमम्लमक्षारं स्वादयेच्च घृतं दधिः ।

9 a B उदका-, कोलश्रप्रलोहितान्. BB कोप- (for कौल-). J -श्रद्गो-
b BB शीतस्य शांतये

10 a J, B -गुरु-
b J -स्विन्ना. B देहं BB देहो
d B -शीर्षः (for -शीतः

11 J reads इति हेमंतः Title J, B, BB अथ शिशिरः ।
a B यत्वामृत-
b B दिदिशश्च (for विदिशश्च), तुरषा- (for तुषार-)

हिमोक्तचर्या शिशिरेऽपि कार्या पथ्या च सेव्या सह पिप्पलीभिः ।
पिष्टान्नकं सूरणशृङ्गवेरमिश्रं सदा सँवटिकादिसेव्यम् ॥१२

वसंतलक्षणचर्ये ।

यत्रागस्त्यहरित्प्रवृत्तपवनव्याधूतचूतव्रजा-
रामोदारपरागपुञ्जपिहितं व्योमापि संराजते ।
छिन्नं रेणुचयैरिव स्मरविभोर्यत्रोद्भ्रतैरिच्छतो
जेतुं सर्वजगन्ति स स्मरसखो ज्ञेयो वसन्तोदयः ॥१३

तत्र श्लेष्मा बाल्योपेतो रुणद्धि जठरानलम् ।
रोगान् करोति बहुशस्तेन पूर्वं कफं जयेत् ॥१४

हरीतकी क्षौद्रयुता च सेव्या श्रमो विधेयश्च बलानुरूपः ।
भृङ्गावलीकोकिलनादरम्याः रामाः सुरामासहितैर्निषेव्याः ॥१५

तीक्ष्णं रूक्षं च कटुकं कषायं तिक्तकं लघु ।
सेव्यं पुराणगोधूममुद्गशालियवादिकम् ॥१६

---

12 a BB पिष्टातकं (for पिप्पलीभिः)
b J सव्रटकादिभोज्यं, B संवटकादिभोज्यं, BB सवारव्ररकासभोज्यं corrupt.

13 J reads इति शिशिरः Title J, B, BB अथ वसंतः ।
a J -वज्राः . B -नूतव्रजाः BB -व्रजामासो
b J, BB व्योमानि शंराजते . B व्योमानि
c J छन्नं (for छिन्नं), -यत्रोद्भतैश्चरीते corrupt B -यत्रो- . BB -छन्नं
d B येतुं (for जेतुं), स्मरसखे

14 b B बहुन् स्तेन

15 a J विधोवयश्च
b J -रामास्वरामा B, BB श्वरामा-

16 a J तीक्ष्ण . BB रवास (for कषायं)
b BB -शाली

पलं मार्गं च शाशं च लावतित्तिरकादिकम् ।
सेव्यं सर्वरसोपेतं सुष्ठूपस्करपाचितम् ॥१७

उद्वर्तनं चरेन्नित्यं दिवास्वप्नं तु नाचरेत् ।
गुरु स्निग्धं च मधुरं शीतमम्लं च वर्जयेत् ॥१८

श्यामां प्रसन्नशशिबिम्बमुखीं विनिद्र-
पङ्केरुहाकृतिदृशं धृतचारुवेषाम् ।
आलिङ्ग्य मारुतचयं, परिचुम्ब्य पित्तं,
भुक्त्वा जयेत्कफचयं स्मरमित्रकाले ॥१९

ग्रीष्मलक्षणचर्या ।

यत्र प्रचण्डतरचण्डकरप्रताप-
संशोषितद्रुमलतातृणवारिपूरः ।
उज्जृम्भते पवनवेगविकीर्णरेणु-
च्छन्ना भवन्ति च दिशः स निदाघकालः ॥२०

---

17 a J मार्गं, शाकं शीं, B शाकं (for शाशं) BB शोर्पां च वत्वावर्तितित्तिरादिकं corrupt
b B सुष्ठो- (for सुष्ठू-)

18 a J दिवा सुप्तं BB दिवोप्तुं

19 a B विनिद्रा (for विनिद्र-)
b B -वेषम्
d J जयेककफरुजं. B-कफरुजं BB जयेत्कल-

20 J reads इति वसंतः । Title B, BB, J अथ ग्रीष्मः ।
a J -प्रतापः- B -करप्रतापः-
b BB -लता ..... incomplete
c J विजृंभते . B पवनवेग- BB omits उज्जृम्भ-
d J छन्ना

स्निग्धच्छायं गृहं सेव्यं सेव्या पथ्या गुणान्विता ।
सुधौतानि च वस्त्राणि सेव्यान्यातपशान्तये ॥२१

आराममूरुहनिरस्तरविप्रतापा
वाप्यः प्रसन्नकमलाः कमलाकराश्च ।
नद्यश्च चन्दनरसो घनसारमिश्रः
सेव्याः स्रजो विधुरुचश्च निदाघकाले ॥२२

भोज्यं शीतं च मधुरं फलं तृष्णाहरं मधु ।
स्निग्धं द्रवं रसालादि पानकं शीतलं पिबेत् ॥२३
सक्तूनालोडितान् शीतवारिणा शर्करान्वितान् ।
भक्षयेच्छीतलं वारि पिबेत्कर्पूरवासितम् ॥२४
त्यजेत् कटुकतिक्तोष्णलवणाम्लविदाहकृत् ।
व्यायामं सीधुपानं च भास्करस्य च दीधितिम् ॥२५

---

21 a J,BB read/ निदाघे भास्करः प्राणितेजः क्षियते भानुभिः ।
B reads three lines including J[a]
B ˆ – छायां
b J omits this line and reads 21[a] in its place.
B तेजः क्षिपशांतये submetrical.
BB omits this line and reads स्निग्धं हंसेव्येसे व्यास पथ्या गुणान्विताः ॥

22 a J, BB omit
b J omits. B omits प्रसन्नकमला- submetrical BB कमलाकरश्च
c J, B मिश्राः
d BB सेव्या सरोज विधुरश्च निराधकाले । submetrical

23 a J पलं, मृदु, B मृदुः BB omits च, परं (for फलं), मृदु.
b BB दिव्यं (for द्रवं)

25 a BB – तिक्तोम्ल –, – म्ल – (for – म्ल –)
b J, B भस्करस्य
B दधितं
BB व्यायामासो च (for the prior half) corrupt.

वर्षाlलक्षणचर्या ।

यत्रेन्द्रनीलनिभवारिधरैर्निरुद्धाः
काष्ठा नभश्च विमलाः कुरुते न भानुः ।
अम्भः समीकृतमरुस्थलनिम्नगाभिः
श्यामैस्तृणैरभिनवैः खलु सा च वर्षा ॥ २६

सशीकरमरुत्स्पर्शधरणीबाष्पयोगतः
सविषाविलतोयैश्च दोषाः स्युस्तत्र कोपिनः ॥ २७

पथ्या सैन्धवसंयुक्ता सेव्या गेहं समुन्नतम् ।
शुष्कं प्रकाशवच्चित्रं सर्वतोऽगुरुधूपितम् ॥ २८

स्निग्धमम्लं सलवणं फलं शालियवादिकम् ।
मस्तुसैन्धवसंयुक्तं पञ्चकोलावचूर्णितम् ॥ २९

ववर्षितं च निषेवेत दिव्यं कौपं जलं पिबेत् ।
भवेद्यानैकगमनः शुष्कधूपितवस्त्रवान् ॥ ३०

---

26 J reads इति ग्रीष्मः. J, B, BB अथ वर्षा ।
b BB विमलाँ
c J शमीकृत- . B मरुश्चलनिम्नगाति
d J,B,BB श्यामातृणै- , ता स्म (for सा च)

27 a J शशीकर-
b J -निल- (for -विल-). BB -विषजिल- , कोपित:

28 a B समुन्नतिं
b B, BB सर्वतोगुरुधूपितं

29 b BB पंचकोलं ----- incomplete.

30 a B, BB कूपं
b BB भवेपानैकगमनः

सरोनद्यादिसलिलं स्नानपाने विवर्जयेत् ।
दिवास्वप्नं श्रमं धर्मं प्रावृट्काले न सेवयेत् ॥३१

अथ शरल्लक्षणचर्या ।

यत्रोज्ज्वला जलमुचो विकचेन्दुबिम्ब-
ताराँ नभो विकचनीरजकैरवाणि ।
नीराणि मानसनिभानि सतां विभान्ति
काशानि कीर्तिसदृशानि च सा शरत्स्यात् ॥३२

पित्तं प्रावृट्समुत्पन्नं शरत्काले प्रकुप्यति ।
तेन शर्करया सार्धं सेवनीया हरीतकी ॥३३

कषायं मधुरं तिक्तं शीतलं जाङ्गलं पलम् ।
शालिमुद्गान्नमश्नीयात्पिबेद्दुग्धं सशर्करम् ॥३४

---

31 a BB सरोनद्याद्य
b B दिवास्वापं, विवर्जयेत् (for न सेवयेत्)

32 a J reads इति वर्षा J, B, BB reads the title अथ शरत्
J विकसेंदु- . B करो ? बिंब illegible.
b BB mixes $32^{a}$ and $32^{b}$:
यत्र प्रशेंदुविवतारनभो विकचनीरजकैरवाणि corrupt and hypermetrical
d - B शाछरत्स्यात्

33 a J प्रावृड्

34 a BB शीतलो चापि यत्फलं (for the post half)
b B सशर्क्कर

धात्री पटोलं गव्याज्यं सर्वमिक्षुविकारजम् ।
सेव्यं नदीसरोवारि करजालं च शीतगोः ॥ ३५
तीक्ष्णमम्लं च लवणं दधि तैलासवातपम् ।
दिवास्वप्नं पुरोवातं शरत्काले विवर्जयेत् ॥ ३६
सर्वर्तुप्रान्त्यसप्ताहाङ्गाविनो विधिमाचरेत् ।
ऋतोर्लक्षणसंयोगादृतुसन्धिर्यतो भवेत् ॥ ३७
स्थानं मयोक्तमृतुसेव्ययोग्यं सर्वस्य द्रव्यस्य गुणागुणाश्च ।
ऋतूक्तभोज्यमृतुलक्षणं च त्वथोच्यते प्रत्यहकृत्यकर्म ॥ ३८

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते
क्षेमकुतूहले ग्रन्थे ऋतुलक्षणचर्याप्रशंसनो नाम चतुर्थोत्सवः ॥ ४ ॥

---

35 a J पटोल

36 b B दिवासुप्तं
J reads इति शरत्

37 a J पूर्वं तु (for सर्वर्तु-). B, BB पूर्वन्तु

38 a J मयोक्तं ऋतु-
BB सम्प्रयोग्यं
J गुणागुणं च
b J भोज्यं ऋतु-

COLOPHON : J reads ऋतुचर्या (for ऋतुलक्षणचर्या)

# अथ पञ्चमोत्सव ।

## अथ दिनचर्या ।

प्रातःकाले समुत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः ।
शरीरशुद्धिं निर्वर्त्य कृतशौचविधिर्नरः ॥१
केशपाशे प्रकुर्वीत प्रसाधन्यादिशोधनम् ।
मुखस्यालोकनं कुर्याद्दर्पणेन विचक्षणः ॥२
ततो हि दन्तनिर्लेखं प्रकुर्याद्विधिना नरः ।
क्षीरितिक्तकषायाणां द्वादशाङ्गुलमायतम् ॥३
कनिष्ठाग्रसमस्थौल्यं ख्यातवृक्षस्य शोभनम् ।
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥४
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ।
इत्यादिस्तुतिवाक्येन यद्गृहीतं वनस्पतेः ॥५

---

J begins with अथ दिनचर्या ।

1 BB omits this verse

2 a B प्रशान्यादि विशोधनं BB प्रसाधनविशोधनं

b J, B, BB omit this line

3 a J स्मृतम् (for नरः).

C reads the title दन्तधावनविधिः ।

b J -कषायानां; -मानतः, BB -सम्मितं (for-मायतम्)

4 a B ज्ञात- (for ख्यात-). J -समं-

C reads the title दन्तकाष्ठग्रहणकाले वनस्पतेः स्तुतिः ।

b J आयुर्बलं, प्रजा B प्रजोवसुषश्रूनि च ।

5 a J त्वं, वनस्पतेः

b J omits this line

B श्रुतिवाक्येन BB स्तुतिवाक्येन, ये गृह्णंति वनस्पतिं

N, C another reading श्रुतिवाक्येन.

प्रयच्छति भृशं कर्तुरायुः श्रीधीयशःस्थितीः ।
दशाङ्गुलं क्षत्रियाणां विप्राणां द्वादशाङ्गुलम् ॥ ६
अष्टाङ्गुलं तु वैश्यानां शूद्राणां तु षडङ्गुलम् ।
दन्तकाष्ठं हि गृह्णीयात् स्त्रीणां तु चतुरङ्गुलम् ॥ ७
भक्षयेद्दन्तकाष्ठाग्रं दन्तमांसान्यपीडयन् ।
जिह्वानिर्लेखनं कुर्यात् प्राङ्मुखो वा ह्युदङ्मुखः ॥ ८
अलाभे दन्तकाष्ठस्य निषिद्धदिवसेषु च ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥ ९
रसनादन्तजा रोगा वैरस्यं मलसंभवः ।
न भवन्ति मुखे, तेन वैशद्यं लाघवं भवेत् ॥ १०
ततो गण्डूषकरणं कफकण्डूमलापहम् ।
मुखप्रक्षालनं कार्यं पयसा शीतलेन च ॥ ११
रक्तपित्तास्यसंशोषनीलिकाव्यङ्गनाशनम् ।
कुर्याद्वाऽपि कदुष्णेन पयसाऽऽस्यविशोधनम् ॥ १२

---

6 C reads the title वर्णानुसारेण दन्तकाष्ठस्य प्रमाणम् ।
a J प्रयातुलद्वशं कर्तुरायुः प्रीतिर्यशः स्थितिः ।
B यत्प्रयच्छे भृशं कुर्तुरायुश्रीधीयशस्थितं ।
BB त एव वक्षंति संकर्तुमायु.
b J, B, BB read द्वादशांगुलं विप्राणां क्षत्रियाणां दशांगुलं ।
7 a B षडांगुलं
b BB तु, J च (for हि)
J तत् (for तु)
B काष्टाग्रं (for दन्तकाष्ठं), चरं गुलं.
8 a J -काष्ठाग्रं
9 a C reads the title दन्तकाष्ठस्याभावे दन्तधावनविधिः ।
J अलाभे
B, BB अभावे.
11 a C reads the title गण्डूषधारणस्य फलम् । b C title- मुखप्रक्षालनविधिस्तस्य फलञ्च

कफवातहरं स्निग्धं मुखदोषविनाशनम् ।
औषधं चात्र सेवेत सद्वैद्यप्रतिपादितम् ॥१३
जातरोगनिवृत्त्यर्थमाज्नेयं बलवर्धनम् ।
ताम्बूलं भक्षयेत्पश्चाद्द्विजशेषं तु शोभनम् ॥१४
तीक्ष्णोष्णं कफवातघ्नं मुखवैशद्यकारकम् ।
ततोऽधिकारिणः सर्वेष्वधिकारेषु योजिताः ॥१५
ततश्चोद्वर्तनाभ्यङ्गं कारयेच्च यथेप्सितम् ।
उद्वर्तनं कफहरं मेदःशुक्रविवर्धनम् ॥१६
श्रेष्ठं शोणितदं बल्यं कान्तिकृद्दोषनाशनम् ।
अभ्यङ्गमाचरेद्यस्तु स जराश्रमवर्जितः ॥१७
दृष्टिप्रसादपुष्ट्यायुःस्वास्थ्यत्वक्पाददार्ढ्यवान् ।
अद्भिः संसिक्तमूलानां तरूणां पल्लवादयः ॥१८

---

13 a J स्निग्धं, मुखरोग-
b J सध- illegible
14 b C - title ताम्बूलभक्षणविधिस्तस्य फलञ्च
J सोभनम्
15 b J सर्वस्वाधिकार्येषु योजयेत् ...
16 J title - उद्वर्तनाभ्यङ्गयोर्विधिः फलञ्च ।
17 a J शोणितद, -कृद्रोगनाशनं sub-metrical
b B सदाजश्रमंविवर्जितः (for the post half) hypermetrical
18 a J पुष्ट्ययायुस्वास्थ्यत्वक्पदादार्ढ्यवात्
B स्वास्थ्यत्वक -

वर्धन्ते हि तथा नृणां स्नेहसंसिक्तधातवः ।
ततः स्नानं प्रकुर्वीत सुखोष्णेनैव वारिणा ॥१९
तेन गात्राभिषेकस्तु भवत्येव बलावहः ।
अत्युष्णेनोत्तमाऽङ्गस्य बलहृत्केशचक्षुषाम् ॥२०
स्नानस्यानन्तरं सम्यग्वस्त्रेण तनुमर्दनम् ।
कान्तिप्रदं शरीरस्य कण्डुत्वग्दोषनाशनम् ॥२१
शीतकाले तु कौशेयं काषायं घर्मवासरे ।
वर्षासु श्वेतवस्त्रं स्यादेवं वस्त्राणि धारयेत् ॥२२
कौशेयं चित्रवस्त्रं वा रक्तवस्त्रं तथैव च ।
वातश्लेष्महरं नृणां शीतकाले प्रधारयेत् ॥२३
मेध्यं सुशीतं पित्तघ्नं काषायं वस्त्रमुष्णकाले ।
तद्धारयेद्घर्मकाले काषायं वस्त्रमुत्तमम् ॥२४

---

19 a J वर्धते (for वर्धन्ते).
B, J यथा (for तथा)
b C title - स्नानविधिस्तस्य फलञ्च

20 a J गात्रनिषेकस्तु

21 b J कान्तिदं

22 a C title ऋतुक्रमेणवस्त्रधारणविधिस्तस्य फलञ्च ।

24 b J, B, BB कषायं
J, B, BB उच्यते (for उत्तमम् )

शुक्लं च सुखदं वस्त्रं शीतातपनिवारणम् ।
न चोष्णं न च वा शीतं शुक्लं वस्त्रं च धारयेत् ॥२५

गन्धेनोद्वर्तनं चादौ ततो लेपं प्रकारयेत् ।
कुङ्कुमं चन्दनं चैव कृष्णागुरुविमिश्रितम् ॥२६

उष्णभावमिदं श्रेष्ठं शीतकाले तु शोभनम् ।
चन्दनं चाम्बुना युक्तं कर्पूरेण विमिश्रितम् ॥२७

सुगन्धं च सुशीतं च घर्मकाले सुशोभनम् ।
चन्दनं घुसृणोपेतं मृगनाभिसमायुतम् ॥२८

न चोष्णं न च वा शीतं वर्षाकाले प्रशस्यते ।
कुलाचारं तु कुर्वीत सन्ध्योपासनमादितः ॥२९

सूर्योपास्तिं ततः कुर्यादिष्टदेवस्य चार्चनम् ।
दत्त्वा दानं च विप्रेभ्यो गृह्णीयात्तेभ्य आशिषः ॥३०

---

25 a J, B शुक्लं च सुखदं चैव (for the prior half).
BB भुक्तं च सुखदं चैव

b B, BB नं वा (for न च वा)

26 a C title - चन्दनादिलेपनविधिस्तस्य गुणाः ।

28 a J सुगंधिं B सुशोभकं

b J मगनाभि -

29 b J, B omit तु
J प्रकुर्वीत, B प्रकुर्व्वीत
J -मादत, B, BB -मादृतः (for -मादितः).
C title - सन्ध्योपासनविधिः ।

30 a J सूर्य्यो- , साधनम् (for चार्चनम्)
b B तु (for च)
J आशिषम्, B, BB आशिषं

केशानां निचये कुर्यात्कस्तूर्याद्यनुलेपनम् ।
सुपुष्पाणि सुगन्धीनि नित्यं शीर्षे प्रधारयेत् ॥ ३१
क्लेदायाससमुद्भूतस्वेददुर्गन्धनाशनम् ।
चक्षुष्यं दाहशमनं सौमनस्यं च जायते ॥ ३२
तीक्ष्णाग्रक्लृप्तकेतक्याः कोमलं धारयेद्दलम् ।
जातीपुष्पं च नैपालं सेवन्तीं कुटजं तथा ॥ ३३
पाटलं च बृहत्पुष्पं बकुलं चम्पकं तथा ।
श्रीखण्डं चैव गौलालं कस्तूर्या सह धारयेत् ॥ ३४
मन्दारं मरुवं चैव कुमुदं नीलमुत्पलम् ।
रक्तोत्पलं पूतिपुष्पं कर्पूरैः सह धारयेत् ॥ ३५
अस्नातैर्मल्लिका धार्या सुस्नातैर्जातिबिल्वजम् ।
अभ्यङ्गे केतकी धार्या धार्यं चोत्पलकं सदा ॥ ३६

---

31 a C title केशप्रसाधनानुलेपनपुष्पधारणादिविधिः ।
J केशांन निचये, -लोपनम्
b J हर्षेण (for शीर्षे), धारयेत्
BB सुपुष्पानि . B सुगंधानि

32 a B, BB दुर्गंधिनाशनम्
b B चक्षुष्यं, BB चक्षुष्य . B, BB दाहसमनं

33 a C title पुष्पधारणस्य नियमाः । J -लुप्त- (for -क्लृप्त-).
B यथाग्रलुप्तकेतक्या (for the prior half).
b J नैपामालं (for नैपालं), सेवती . B जीतीपुष्पं

34 b J कस्तूर्यासिह धारवेत् (for the post half) corrupt. B श्रीपर्णं

35 a J नीलोत्पलकुमुदकम् , B नीलोत्पलकुमुदकम् BB नीलोत्पलकुमुदलं
b J पुषिपुष्पं, B युथिपुष्पं . B थि ? ना सह- illegible BB यूथिका च (for कर्पूरैः)

36 a J अस्नासै- (for अस्नातै-), B सुस्नाति . J, B वैल्वजम्
BB सुश्रांतेर्जीतिबिल्वजं (for the post half) corrupt
b B, BB omit धार्यं . J तदा (for सदा)

जातीं कुन्दं च नैपालं श्रीखण्डं बिल्वमल्लिके ।
मकरन्देन संयुक्तं शिरसा धारयेन्नरः ॥३७
सर्वाण्येतानि तुल्यानि रसतो वीर्यतस्तथा ।
त्रिदोषशमनीयानि सर्वकाले प्रधारयेत् ॥३८
कैतकं बाकुलं पुष्पं श्रीखण्डं शतपत्रकम् ।
गौलालं चम्पकं पुष्पं वातश्लेष्महरं परम् ॥३९
उष्णवीर्यं च तत्प्रोक्तं शीतकाले प्रधारयेत् ।
श्रीवकं मरुबं चैव नीलोत्पलकवत्सकौ ॥४०
कुब्जकं पाटलं चैव श्रीखण्डं च तथैव च ।
नात्युष्णं न च वा शीतं सर्वदोषनिबर्हणम् ॥४१
निर्मलं नेत्ररोगघ्नं वर्षाकाले प्रधारयेत् ।
षड्यामं जातिकुसुमं नैपालं द्विमुहूर्तकम् ॥४२

---

37 a J जातीकदं . B, BB मल्लिका .

38 a C title पुष्पाणां गुणाः ।
b सर्वाण्येतानि रसनोवीतयस्तथा । corrupt and sub metrical.
b J -शमनार्थे , B, BB -समनार्थेव .

39 a J, B, BB बकुलं
b B श्रीकैवचं चकं पुष्पं वातश्लेष्महरं corrupt and sub-metrical. BB चैव (for पुष्पं)

40 a BB प्रधार्यते
b J -सवत्सकौ , B,BB -सवत्सकैः (for कवत्सकौ).

41 a J कुब्वकं , B कुरुबं BB सर्वदोषनिवर्हणः (for the post half).
b BB omits this line.

42 b B मुहूर्तं (for षड्यामं)

त्रिरात्रमुत्पलं चैव पञ्चरात्रं तु कैतकम् ।
द्विरात्रं शतपत्रं तु अर्धरात्रं तु मल्लिका ॥४३
अहोरात्रं चम्पकं तु पूतीपुष्पं मुहूर्तकम् ।
श्रीखण्डमेकरात्रं तु बकुलं माधवी तथा ॥४४
श्रीपर्णं यावदाहारं तावत्कालं तु धारयेत् ।
मन्दारं मरुबं चैव दामनं चैव पाटलम् ॥४५
यावत्कालं भजेद्गन्धं तावत्कालं प्रधारयेत् ।
त्रिदोषशमनी जाती महादाहविनाशिनी ॥४६
सुगन्धं दोषशमनं गौल्लालं पुष्पमुच्यते ।
पित्तहृद्विशदं चैव चक्षुष्यं चोत्पलं स्मृतम् ॥४७
श्लेष्मवातप्रशमनमुष्णवीर्यं च निर्मलम् ।
पुष्पाणां प्रवरं चैव केतकीपुष्पमुच्यते ॥४८

---

43 a J, B, BB केतकी:

44 a J अत्र चंपकं तु यूथीपुष्पं मुहूर्त्तकम् । sub-metrical
B यूथीपुष्पं तथैव च (for the post half)
BB यूथिकादि (for पूतीपुष्पं)

45 b J,BB च सुपाटलम् BB मुकुलं (for मरुबं) B वसु (for चैव)

46 a C title दोषानुसारेण पुष्पाणां प्रयोगः । B तु धारयेत्

b J त्रिदोषमशनी, B त्रिदोषसमनी. J जातो B -दाय- (for -दाह-)

47 a N explains गौल्लालं गुलाब इति प्रसिद्धं पुष्पम् ।
B दोषसमनं कौटजं पुष्पमुत्पलं
BB गौल्लावं

b J transposes 47b and 49a

48 a J transposes 48a and 49b

b J omits this line

ईषदुष्णं सुगन्धं च सुशीतं दृष्टिदायकम् ।
शिरोक्लेमविनाशार्हं शतपत्रं तु शोभनम् ॥४९

अधार्यं मल्लिकापुष्पं दृष्टिहानिकरं परम् ।
चम्पकं वातशमनं चक्षुष्यं विशदं शुभम् ॥५०

पाटलं च महच्छीतं श्लेष्मवातविवर्धनम् ।
मन्दाग्निपित्तदोषघ्नं कर्णव्याधिविनाशनम् ॥५१

पाटलं धारयेद्यस्तु सम्यग्ज्वाससमन्वितम् ।
ज्वरमूर्च्छापिपासाघ्नमायुष्यं दाहनाशनम् ॥५२

हेमन्ते शिशिरे चैव शतपत्रं तु शोभनम् ।
वसन्ते केतकी धार्या घर्मे नैपालमालती ॥५३

प्रावृट्सु पाटलं धार्यं चम्पकं शरदि स्मृतम् ।
भूषणैर्भूषयेदङ्गं यथाविभवसारतः ॥ ५४

---

49 a B सुगं (for सुगन्धं)

b BB शिरोरोगविनाशार्हं

50 a J अधार्यं.

b J,B चाक्षुष्यं. B वायुशमनं, सुचि (for शुभम्) . BB भुमं

51 a J reads this stanza after 44.

BB महाशीतं J, B, BB प्रवर्धनम्.

52 b B दाघनाशनं

BB पिपासघ्नं पुष्पदाघविनाशनं । submetrical

53 a C title ऋतुक्रमेण पुष्पधारणविधिः B सतपत्रं तु शोभनं (for the post half)

b J नैबाल-, B नेपाल-

54 a J प्रावृट्स्युत्पलकं धार्यं

BB प्राविट्सु... omits the remaining and reads चैव शतपत्रं तु शोभनं repeated

b C title आभूषणधारणविधिस्तस्य फलञ्च ।

B - भूषयेदंगं BB - भूषयेदेव

शुचि सौभाग्यसन्तोषदायकं काञ्चनं स्मृतम् ।
रत्नानां भूषणानां च धारणं ग्रहतुष्टिकृत् ॥५५
धर्मसंग्रहणं कार्यं दीनदानोपवासकैः ।
स्वबन्धुपितृदेवानां ब्राह्मणानां च तर्पणम् ॥५६
कार्यं यशस्यमायुष्यं स्वर्ग्यं पापहरं परम् ।
ततो भोजनवेलायां कृताचारः सहात्मवान् ॥५७
देवान् पितृन् समभ्यर्च्य कुर्यान्मङ्गलवीक्षणम् ।
लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ॥५८
हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः ।
एतानि सततं पश्येन्नमस्येदर्चयेत्तथा ॥५९
प्रदक्षिणं सदा नित्यमायुर्वर्धनमुत्तमम् ।
पत्नीविहितशृङ्गारं प्राप्य भोजनमण्डपम् ॥६०

---

55 a B सुचि . N, C another reading सुख्यं (for शुचि)
b J भूषणं चापि धारयणं ग्रहतुष्टिकृत् । submetrical
B रत्नानि भूषणं चापि समस्तग्रहतुष्टिकृत् ।
BB रत्नविभूषणं चापि धारणं ग्रहतुष्टिकृत् ।

56 a C title धार्मिककार्यविधिस्तस्य फलञ्च ।
J -दानोपचारकैः

57 a B यशसमायुष्यं
b C title भोजनकालिकविधिः ।

58 b C title अष्टौ मंगलवस्तूनि ।
B -ध्यष्टा

59 a J सर्पि-
b B आपो

60 a C title प्रदक्षिणायाः फलम् ।
b C title भोजनविधिः ।

तथा चाग्निवर्तं वीक्ष्य कुर्याद्भोजनकं नरः ।
एक एव न भुञ्जीत यदीच्छेत्सिद्धिमात्मनः ॥६१
द्वित्रिभिर्बहुभिः सार्धं भोजनं तु दिवानिशम् ।
ततश्चाभीष्टसिद्धिः दिष्टकामं तु संपदः ॥६२
ताम्बूलं भक्षयेत्पश्चाद्दत्वा विप्राय शोभनम् ।
मनसो हर्षदं श्रेष्ठं रतिदं मदकारकम् ॥६३
मुखरोगकृमिहरं ताम्बूलं रुचिकारकम् ।
दिवा स्वप्नं न कुर्वीत संयतो हि कफावहम् ॥६४
दिवा स्त्रीगमनं नृणामायुःक्षयकरं भवेत् ।
धर्मशास्त्राणि सततं पुराणश्रवणं तथा ॥६५
कारयेद्विधिना सम्यगात्मतत्त्वविवेचनम् ।
सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः ॥६६

---

61 a J, BB यथा (for तथा) ; वीक्ष्य , पुनः (for नरः)
b J यदिच्छे-

62 b J स्यात्तुष्टिः काम्यं तु संपदः ।
B काम्यं

63 a C title ताम्बूलभक्षणगुणाः ।
J भक्षये B भोजनं (for शोभनम्) N, C another reading भोजनम्
b J, B BB हर्षणं N, C another reading मतिदं सुखकारकम् ।

64 b C title भोजनान्तरं कर्माणि N, C another reading स्वपतो
J सयतो, कफावहः .

65 a J -मायु-

66 a BB सम्यक्- , -विवेकनं
b C title अथ सद्वृत्तम् ।
B माता , BB संतः (for मताः)

सुखं च न विना धर्मं तस्माद्धर्मपरो भवेत् ।
हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृतम् ॥६७
दुर्गोष्ट्यहितचिन्ता च परद्रव्यस्य चिन्तनम् ।
पापकर्मेति दशधा कायवाङ्मानसैस्त्यजेत् ॥६८
अवृत्तिव्याधिशोकार्ताननुवर्तेत शक्तितः ।
भक्त्या सेवेत मित्राणि, न सेवेताहिताञ्जनान् ॥६९
आत्मवत्सततं पश्येत्सर्वजन्त्वापिपीलिकम् ।
उपकारप्रधानः स्यादपकारपरेऽप्यरौ ॥७०
काले हितं मितं ब्रूयान्नाहितं तु कदाचन ।
हिताभिलाषी सुमुखो भवेच्च करुणो मृदुः ॥७१
नैकः सुखी न सर्वत्र विश्रब्धो न च शङ्कितः ।
न कञ्चिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुम् ॥७२

---

67 a B सुखं न च धर्मं (for the prior half).
b B पैशून्यं

68 b J पापं

69 a J -शोकार्त्ता-, -वर्त्तेत. B -सोकार्ता-, चाक्तितः
BB -वक्लेति (for -वर्तेत
b B भक्त्यासेवेत
BB न सेव्यान्नाहिते?तान् (for the post half).

70 a B पश्य सर्वजन्तुपिपीलिकं
b J -प्रधान B स्यादपकारःपरेप्यरा

71 a J कुर्यान्ना- (for ब्रूयान्ना-)
b B हिताविभाषी

72 a J विचेष्टो (for विश्रब्धो).
B संक्षितः (for शङ्कितः)
b BB शत्रुः

प्रकाशयेन्नापमानं न च निःस्नेहतां व्रजेत् ।
न पीडयेदिन्द्रियाणि नात्यर्थं लालयेद्बुधः ॥७३
परस्पराविरुद्धो यस्त्रिवर्गस्तं समाचरेत् ।
अनुयायात्प्रतिदिनं सर्वधर्मेषु मध्यमाम् ॥७४
कृत्तरोमनखश्मश्रुः शुद्धवेशधरो भवेत् ।
चैत्यपूज्यध्वजाशस्तच्छायाभस्मतुषाशुचीन् ॥७५
नाक्रामेच्छर्करालोष्ठबलिस्नानभुवोऽपि च ।
नदीं तरेन्न बाहुभ्यां नाग्निस्कन्धमभिव्रजेत् ॥७६
सन्दिग्धनावं वृक्षं च नारोहेद्दुष्टयानकम् ।
नासंवृतमुखः कुर्यात् क्षुतं हास्यं विजृम्भणम् ॥७७
अङ्गानि मोटयेन्नैव नासीतोत्कटुकश्चिरम् ।
नोर्ध्वजानुश्चिरं तिष्ठेन्नक्तं सेवेत न द्रुमम् ॥७८

---

73 a J न चा चातिस्नेहतां व्रजेत् (for the post half) hypermetrical
b J लाडयेद्बुधः

74 a J -वर्ग्ग-
b J, B, BB प्रतिपदं
J, B, BB मध्यमम्

75 a J, B -श्मश्रु
b B - सत्त्वत्सायामेस्मरुषासुचीन् corrupt.

76 a B नाक्रमेच्छर्वशलोष्टा- corrupt
b J बाहुभ्यं, -स्तम्भ- (for -स्कन्ध-)
B -स्कन्धरमपि व्रजेत्

77 a B च व्यक्षं नारोहेद्दुःखजानकं corrupt
b J क्षुत BB न संवृत-
BB न शंवृतमुखः कुक्षुतस्य विजृंभणं तथा corrupt

78 a J -कटक- B मोटयेन्नैव
BB मोटयेन्नेव नाशीनो.... illegible
b J -श्चिरे B नु (for न)

तथा चत्वरचैत्यं च चतुष्पथसुरालयान् ।
शून्याटवीं शून्यगृहं श्मशानानि दिवाऽपि च ॥७९

त्यजेद्दुष्टातपरजस्तुषारपरुषानिलान् ।
कु(कू)लच्छायानृपद्वेषिव्यालदंष्ट्रिविषाणिनः ॥८०

सन्ध्यासु भोजनं स्वप्नं मैथुनाध्ययने त्यजेत् ।
गात्रवक्त्रनखैर्वाद्यं हस्तकेशावधूननम् ॥८१

मद्यातिसक्तिं विश्रम्भं स्वातन्त्र्यं स्त्रीषु च त्यजेत् ।
शास्त्रं नृत्यं च गीतं च वाद्यं सेवेद्विचक्षणात् ॥८२

अत्यर्थं व्यसनं त्याज्यं कायवाक्चेतसां दमः ।
स्वार्थबुद्धिः परार्थेषु पर्याप्तमिति सक्रतम् ॥८३

रात्रिचर्या ।

निशि स्वस्थमनास्तिष्ठेन्मौनी दण्डी सहायवान् ।
एवं दिनानि मे यान्तु चिन्तयेदिति सर्वदा ॥८४

---

79 a B तथा तत्वरचैचित्यं चतुर्थं च सुरालयं
b J शून्याटवी
B शून्यसंगृश्मसाजेनि corrupt

80 a J, BB - रजो-
b J - व्यालदंष्ट्री - B - द्वेषी - , - दंष्ट्र -
BB जलछाया नृपद्रोहं (for the prior half)

81 a J, B, BB मैथुनाध्ययनं

82 a BB मद्यातिशक्ति
b J सेवेत चक्षात् , B शेवेत् च क्षणात् BB सेवेत् वीक्षणात्
N, C वाक्यं (for वाद्यं).

83 a B कायावान् केतशांतमत् corrupt.
BB कायवाकेतसां दमः
b J, B स्वार्थतुष्टिः BB स्वार्थतुष्ट

84 a J omits the title
b J चिन्तयेहिति B चिन्तयेतिति.

दुःस्वमोऽ भवत्येवं नित्यं सन्निहितस्मृतिः ।
एवं कृत्स्नं दिनं नीत्वा रात्रिंयामार्धिकावधिम् ॥८५

दिवासन्ध्यं वर्जयित्वा सदा पर्वदिनानि च ।
रात्रौ व्यवायं कुर्वीत योषिता निजया सह ॥८६

कुचेलां च कुशीलां च विधवां च परस्त्रियम् ।
नारीं नीचकुलोद्भूतां त्यजेत्सम्यग्विचक्षणः ॥८७

वयोधिकां स्त्रियं गत्वा तरुणः स्थविरायते ।
वृद्धोऽपि तरुणीं गत्वा यौवनत्वमवाप्नुयात् ॥८८

ऋतुकाले तु सुरतमवश्यं कारयेद्बुधः ।
स्त्रीनिःश्वासहतो ना हि दुर्भगत्वमवाप्नुयात् ॥८९

---

85 a B दुःस्वप्नभग्न J सन्निहितं BB-स्मृतिं
b J रात्रिर्यामार्धिकावधि (for the post half)
B, BB यामार्धिकावधिः

86 a C title व्यवायस्य विधिः निषिद्धविधिश्च ।
B पर्वदिनेन च

87 a J कुचीलां, B कुचीलां (for कुचेलां) C कुचैलां
BB कुचीलां विधवां चैव नीचजापरस्त्रियं ।
b J -विचक्षणः

89 b J, B स्त्रीणांश्वासहतः पुंसो दुर्भगत्वं च जायते ।
BB -हतेः
हि (for च)

ऋते वै षोडशाद्वर्षात्तथाऽतिक्रान्तसप्ततेः ।
स्त्रियं कामयमानस्य जायते हि बलक्षयः ॥९०
>यहाद्वसन्तशरदोः पश्चाद्वृष्टिनिदाघयोः ।
प्रकामं तु निषेवेत मैथुनं शिशिरागमे ॥९१
शीते रात्रौ, दिवा ग्रीष्मे, प्रावृट्सु घनगर्जिते ।
वसन्ते च दिवा रात्रौ शरत्सु सरसः स्मरः ॥९२
वामशायी द्विभुक्तान्नो षण्मूत्री द्विपुरीषकः ।
स्वल्पमैथुनकारी च शतं वर्षाणि जीवति ॥९३
दिनचर्या समाप्ताऽथ भोक्ता च परिवेषकः ।
पानीयं भोजनं चाथ इन्धनस्योच्यते विधिः ॥९४

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले ग्रन्थे दिनचर्याप्रशंसनो नाम पञ्चमोत्सवः ॥

---

90 a J न ऋतौ षोडशाब्दवर्षान्तथाविक्रांतसप्ततौ: corrupt - submetrical
B न हि षोडशावर्षात्तथतिक्रांत सप्ततु corrupt
BB न ऋते (for ऋते)
b B र (for हि)

91 a J पश्चाद् B शरदैः
C title ऋतुक्रमेण व्यवायस्य नियमाः ।
b BB न प्रकामं (for प्रकामं)

92 a J प्रावृष्यासारवर्जिते
B प्रवृट्वासारगर्जिते BB सारगर्जिते (for घनगर्जिते)
b BB सुरतः

93 a J एकपाचि (for वामशायी), षराम्रूत्रीपुरीशकः
B एकशायाँ, त्रिपुरीषयोः
BB एकशायी, त्रिपुरीषकः
C title स्वास्थ्याय विशेषकर्तव्यानि C, N another reading एकशायी
b BB जीवती

94 a C title उपसंहारः । J दिनचर्यसमाँसाद्य, परिवेशकः
b J भोजनामत्र (for भोजनं चाथ)

# अथ षष्ठोत्सवः ।

अथ भोजनप्रकारः- तत्र भोक्ता ।

स्नातः सुधौतमृदुसुन्दरशुक्लवासा -

स्तत्कालधौतचरणः प्रियपुत्रमित्रैः ।

आढ्यो प्रसन्नहृदयो रसपाकवेद्याँ

भोक्ता प्रविश्य हितसात्म्यसमानवैद्यैः ॥ १

अथासनम् ।

मृदुतूलमये स्थूले चारुवस्त्रावगुण्ठिते ।

आसने प्राङ्मुखो भोक्तोपविशेद्वाऽप्युदङ्मुखः ॥ २

अथ भोजनपात्राणि ।

तिष्ठन्ति यत्र नवकाञ्चननिर्मितानि

श्रेणीकृतानि परितस्तु कचोलकानि ।

राकाशशाङ्कनवमण्डलभास्वरं यत्

श्रेणीभृतां रजतनिर्मितपात्रकं स्यात् ॥ ३

---

1 a Title J अथ भोजनप्रकरणं । अथ भोक्ता ।
C भोक्तुः स्वरूपम् । अथ भोजनप्रकारस्तत्र भोक्ता ।
B अथ भोजनप्रकारः अथ भोक्ता ।
BB अथ भोजनप्रकारः ।
B - शुक्लवा -

b J तत्काल- . J, B, BB सहपुत्रमित्रैः

c B रंशपाकवेद्याँ

d N, C प्रविश्य . J, B प्रविष्ट BB स्थित. (for प्रविश्य) B हिमात्म्य-
BB खलु सहात्मसमानवैद्यैः hypermetrical J सहात्मसमानवैद्यैः.

2 a Title C अथासनम् भोक्तुरासनम् ।

b J भुक्ताप्रविशो- N, C another reading भुक्त्वा (for भोक्तो)

3 a Title J अथ भोजनमंत्राणि ।

b J omits this line

c J omits this line. B - भास्करं

d B, BB - स्थालकं, J - थालकं (for - पात्रकं)
J भोजने च प्रशस्तं च स्वोणामत्यंतदुर्लभम् ।

अर्घार्घप्रतिमादर्शि कांस्यमादर्शवच्छुचि ।
कांस्यं बुद्धिप्रदं भव्यं पात्राशं रुचिकृद्वरम् ॥ ४

अथाचमनोदकम् ।

उषितं पटसंपूतं सौवर्णे भाजने स्थितम् ।
सव्यभागे जलं भोक्तुः स्थापितं चन्द्रवासितम् ॥ ५
हेमन्ते शिशिरे चैव सरोजं वा तडागजम् ।
सुशीतं स्वलपितद्वं तृष्णादाहरुजापहम् ॥ ६

---

4 a J अर्धोर्ध- , कास्यमादरवासशा J reads this line in stanza 3c. B, BB omit.
b B, BB, J omit.
B, J, BB insert :

पत्रावली भवति वा नृपभोजनाय
निर्जन्तुजालरहितामलवारिधौता ।
पात्राशभूरुहदलैर्रचितामनोज्ञा
ताद्दग्विधपर्णकजालैः परिवेष्टिता च ॥

BB inserts

अर्धार्धं प्रतिमादर्शि कांस्येवापि भवेच्छुचि ।
पात्रद्वंद्वं सुविस्तीर्णं नृणामत्यन्तदुर्लभः ॥

5. a Title C अथाचमनोदकम् भोजनकाले पेयजलम् ।
B भाजन
b B -वासितं
BB inserts

हैमं त्रिदोषहरणं चाक्षुषं राजतं भुवि ।
कास्यं बुद्धिप्रदं भव्यं पात्राशं रुचिकृन्मतं ॥

6 b J सुशीत
B -दाघ- (for -दाह-).

वसन्तग्रीष्मयोः कौपं वाप्यं नैर्झरमेव च ।
सक्षारं पित्तलं कौपं दोषघ्नं चारु नैर्झरम् ॥ ७

प्रावृट्सु कौपं दिव्यं वा क्वथितं चैन्द्रसंभवम् ।
कौपं वातहरं प्रोक्तं दिव्यं दोषत्रयापहम् ॥ ८

शरत्प्रसन्नमुदयादगस्त्यस्याखिलं हितम् ।
तत्तोयं गुणवज्ज्ञेयं वान्यं दोषत्रयापहम् ॥ ९

पुरस्तान्निर्मलं पात्रं सुविस्तीर्णं मनोरमम् ।
स्थापितं पीठके शुभ्रे नाभिदेशसमुन्नते ॥ १०

तत्र भक्तं परिन्यस्तं मध्यभागे सुसंयतम् ।
सूपः सर्पिः फलं शाकं पिष्टमन्नं तु मत्स्यकम् ॥ ११

स्थापयेद्दक्षिणे पार्श्वे भुञ्जानस्य यथाक्रमम् ।
फलेहाद्या द्रवाः सर्वे पानीयं पानकं पयः ॥ १२

चोष्यं सन्धानकं लेह्यं सव्ये पार्श्वे प्रदापयेत् ।
सर्वं इक्षुविकाराश्च पक्वान्नं पायसं दधि ॥ १३

---

7 b J क्षारं , कापं (for कौपं)
B वाप्य (for चारु) , नैर्जरं ,

8 a J दिव्य . J transposes दिव्य and कौपं . B कोपा
BB प्रावृट्कालेसु , मेघ- (for चैन्द्र-).
b J कौप .

9 a J omits अखिलं J, BB -मुदयेअगत्स्य- B omits.
b B omits.

10 a Title C स्थालीपात्रे परिवेषस्य नियमाः
b B पीठकं .

11 a B परं न्यस्तं J सुसंयते , B सुसंजितं . BB न्वत्वं (for न्यस्तं), सुसंस्कृतं
b J सूप , B सुपिः , BB सुपं B पच्यमानं (for पिष्टमन्नं)

13 a B चोक्षं , सर्वे (for सव्ये)
b BB सर्वानिक्षुविकारांश्च (for the prior half)

पुरतः स्थापयेद्भोक्तुर्द्वयोः पङ्क्त्योश्च मध्यत. ।
एवं विज्ञाय मतिमान् परिवेषप्रकल्पनम् ।.
ततोऽर्हो भवति प्राज्ञः सम्यक्च परिवेषितुम् ॥१४

अथ परिवेषकलक्षणम् ।

स्नातश्चन्दनचर्चितः सुवसनः स्रग्वी प्रसन्नाननः
स्पष्टात्मा सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः ।
स्वामिस्नेहपरः सुपाकनिपुणः प्रौढो वदान्यः शुचि-
र्विप्रो वा परिवेषकः सुकुलजश्चान्योऽपि वा भूपते: ॥१५

स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभमुखी नयनाभिरामा ।.
बिम्बाधरा शिरसि बद्धसुगन्धिपुष्पा
मन्दस्मिता क्षितिभृतां परिवेषिका स्यात् ॥१६

अथ भक्तम् ।

भक्तादेः पत्रशाकादेरन्नानां मत्स्यमांसयोः ।
क्षीरादेर्गोधुमादेश्च प्रकारा एवमादयः ॥१७
वक्ष्यन्ते तत्र भक्तस्य रन्धने विधिरुच्यते ।
वारिणा बहुशः शालितण्डुलान् क्षालितान् बहून् ॥१८
तक्रे संसिच्य तान् तप्ते स्थाल्यम्भसि विनिक्षिपेत् ।
ततः पयो घृतं क्षिप्त्वा स्विन्नानाश्रावयेदिमान् ॥१९

---

14 a J भोक्तुं BB पुरस्ता
b J परिवेश-
c J तथार्हो भवति प्रज्ञा संपन्ना परिवेषितुम् । BB प्रज्ञः
15 a Title J परिवेकलक्षणम् ।
c J स्वपाकनिपुणः .
16 c J बिंबाधरां B बिंबाधरा
d B परिकामन (for परिवेषिका ).
17 a Title C अथ भक्तम् भोजनस्य प्रकारा: । J रत्नानां (for अन्नानां )
b J omits. B -गोत्यमादेश्च BB क्षाराद्यैर्भक्ष्यिकादेश्च
18 a J omits. B रंधने
b C reads title भक्तनिर्माणविधि: BB आक्षिता
19 a J तक्रेणासिंच्य, स्थाल्यांभसि BB तक्रेण सिच्यतान् तप्ते (for the prior half)

राजाहँ तन्दुलेऽप्युक्तं गन्धवर्णरसान्वितम् ।
एवं हि धान्यजातीनां रन्धनस्य त्वयं क्रमः ॥ २०

स्वेद्यं शाल्यन्नमन्नं शशिकरनिकरप्रोज्ज्वलं सिक्थसारं
ग्राम्यक्ष्मापच्छलेन त्रिदशपुरसुधाधैर्यमाधुर्यतत्त्वम् ।
अन्योन्यं नैवं लग्नं परिमलभरिताऽगारवेदीविभागं
स प्राप्नोति प्रसन्नः प्रमथपरिवृढो यस्य पुंसः सदा स्यात् ॥ २१

भक्तं वह्निकरं पथ्यं तर्पणं मूत्रलं लघु ।
सुधौतं स्रावितं चोष्णं विशदं गुणवन्मतम् ॥ २२

रन्धनस्य प्रकारोक्तो भक्तस्य च गुणोत्तमः ।
यस्य धान्यस्य यत्प्रोक्तं तस्य तद्गुणमावहेत् ॥ २३

अथ सूपः ।

तां कण्डितां दधिविमर्दितमुद्गदालिं
संसाधितां लवणगन्धसमावृतां च ।
ते भुञ्जते कुमुदहासकरार्धमूर्धा
येषां सदा हृदयचारुगृहे निषण्णः ॥ २४

---

20 b B त्वनुक्रमः (for त्वयं क्रमः)

21 a J सद्यं, B सत्वं, BB सद्यः (for स्वेद्यं). N, C another reading सद्यो

b J -बुलेन (for -च्छलेन), -पुरुष- (for -पुर-), -माधुर्यवत्वम्

BB ग्राम्यक्ष्मासृतिच्छलेन त्रिदशपुरुषसुधासद्यजतिमाधुर्यतर्जितः । hypermetrical.

B -सुधासद्य-

c J, BB -भरितागार-

d J प्रथमपरिवृढो च

22 a Title C भक्तस्य गुणाः ।

b J, BB स्रावितं . J गुणन्मेवेतम्

23 a BB रसस्य (for भक्तस्य)

b J तद्गुणमाहरेत्, B तणमाहरेत्, BB गुणमाहहेत्

24 a J, B-मुद्गदालिं. B कोडिकां.

b J लवणरामहगंधगर्भाम् (B-गर्भो, BB-गर्भा) N, C another reading लवणरामगन्धगर्भो

d B निषन्नः . BB निषस्मः

अथ मुद्गकुल्माषाः ।

अर्धं विकसितं स्विन्नाः कुल्माषाः मुद्गमाषजाः ।
सैन्धवेन सबाल्हीकाः स्वान्नस्य तु गुणावहाः ॥ २५

मुद्गसूपो लघुर्ग्राही कफपित्तहरो हिमः ।
स्वादुर्नैत्योऽनिलहरः कुल्माषः शुक्रवर्धनः ॥ २६

अथ माषाः ।

माषसूपोऽथ कुल्माषः स्निग्धो वृष्योऽनिलापहः ।
उष्णः संतर्पणो बल्यः सुस्वादू रुचिकारकः ॥ २७

अथ घृतम् ।

करीषवह्निना तप्तं क्षीरं तद्दुषितं दधि ।
तज्जमाज्यं न तत्त्वाज्यं नवीननवनीतजम् ॥ २८

मञ्जिष्ठवारिरुचिसारि तनूत्पधारि
सौरभ्यचारि रुचिकारि विलोभिहारि ।
भुङ्क्ते नरः स खलु सर्पिरिदं नवीनं
यः पार्वतीचरणमौलिविलोलमौलिः ॥ २९

अथ सामान्यं घृतम् ।

घृतं रसायनं स्वादु पित्तानिलविषापहम् ।
आयुष्यं वृहणं शीतं पापालक्ष्मीविनाशकम् ॥ ३०

---

25 a J विकशितं, स्विन्ना, B स्विन्नां, BB स्विन्नं
b J सबाल्हीकास्तन्नस्य BB सैन्धवेनसहिऽगुका ----- incomplete
26 a N, C another reading मुद्गयूषो
b J -निलं हरः
27 a Title-J अथ माषः । B वृष्णो-(for वृष्यो-), BB गाढमलापहः
b J सुस्वादु
28 a J करोष-, B कारीष-, BB कारीषं- J तद्दुषित
b J, B तत्त्वाज्यं. BB तन्योज्य
29 a J, B, BB मांजिष्ठ-. B तनूत्म-
b J -वारि (for -चारि).
d J, B --चरणमूल- BB पार्वतीचरणपूजितमौलिनित्यं.
30 a Title J अथ सामान्यघृतम् ।
b J आयुष्यं B, BB -विनाशनं. BB पापलक्ष्मी-

अथ गव्यम् ।

गव्यमग्निकरं सर्पिः कफपित्तानिलापहम् ।
चक्षुष्यं बृहणं शीतं विपाके मधुरं स्मृतम् ॥ ३१

अथ माहिषम् ।

माहिषं मधुरं पाके रक्तपित्तानिलापहम् ।
सुशीतं बृहणं वृष्यं चक्षुष्यं रुचिकारकम् ॥ ३२

अथाजम् ।

आज्यमाजं हि चक्षुष्यं दीपनं बलवर्धनम् ।
श्वासे कासे क्षये पथ्यं लघु गव्यादृगुणावहम् ॥ ३३

अथान्नदृग्दोषपरिहारकश्लोकाः ।

अन्नं ब्रह्मा रसो विष्णुर्भोक्ता चैव महेश्वरः ।
ध्यात्वा नारायणं देवमन्नदोषैर्न बाध्यते ॥ ३४

या दृष्टिः सर्वलोकेषु दृष्टिर्या च स्वभावतः ।
आत्मदृग्दोषनाशाय संस्मरेन्नारदं मुनिम् ॥ ३५

अञ्जनीगर्भसंभूतं कुमारं ब्रह्मचारिणम् ।
दुष्टदृष्टिविनाशाय हनुमन्तं स्मराम्यहम् ॥ ३६

पठतीत्यादिकं वाक्यं भोजनादौ भिषग्वरः ।
सर्वदोषविनाशाय भुक्तं शीघ्रं यथा पचेत् ॥ ३७

पञ्चग्रासं तु मौनेन प्राणापानादिकाग्नितम् ।
अन्यथैव सहायैः कर्तव्यं भोजनं नृपैः ॥ ३८

---

31 a Title C अथ गव्यं घृतम् ।
b J चाक्षुष्यं N, C another reading आयुष्यं (for चक्षुष्यं)

32 a Title C अथ माहिषं घृतम् । J पाके
b J चाक्षुष्यं

33 a Title C अथाजं घृतम् । J आज्यमाजं
b B गव्यगुणावहं N, C another reading गव्यगुणावहं .

34 a Title J -परिहारश्लोकः B ब्रह्म , देव (for चैव)

35 b J आत्मदग्दोष-

36 b J दृष्टिविनाशार्थाय , हनुमंत B दृष्टिदोष-

37 a B omits , BB पठतीत्यादि वाक्यं वा (for the prior half)
b B omits J सर्वदोषस्य कर्तव्यं भोजनं करणं नृपैः
BB सर्वदोषहरं चैव कर्तव्यं भोजनं नृपैः ।

38 J, BB omit this stanza.

अथ पर्पटः ।

मुद्गजीरकबाह्लीकस्वर्जिकामरिचान्विताः ।
अरोचकजिगीषूणां पर्पटाः पुरतो भटाः ॥३९
अङ्गारभृष्टास्ते श्रेष्ठा न तु स्नेहविपाचिताः ।
पर्पटा लघवो रुच्या मुद्गजा विधिपाचिताः ॥४०

अथ पटोलफलम् ।

फलं पटोलं विहितद्विखण्डं विशुद्धदर्व्याहतशुष्कपाकम् ।
वाघारितं हिङ्गुकणे सहाज्ये ससैन्धवं बोधयति क्षुधां च ॥४१
पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनम् ।
स्निग्धोष्णं हन्ति कासार्शोज्वरदोषत्रयक्रमीन् ॥४२

अथ ताहडी ।

निरस्थिवेसवाराढ्यं पात्रं पक्वं सतण्डुलैः ।
घृताद्रमार्द्रकैर्युक्तं नाम्ना तत्ताहडी स्मृता ॥४३
वातपित्तहरा गुर्वी शुक्रपुष्टिप्रदा भृशम् ।
गुणानां यो विशेषोऽत्र मांसभेदात्स जायते ॥४४

अथ कृशरा ।

तन्दुलैः षष्टिसंभूतैः कण्डितैर्न च खण्डितैः ।
अष्टभागयुतैर्मुद्गैः संयुक्तैर्द्वादशांशकैः ॥४५

---

39 a B मरिचं चिताः BB चारु-(for मुद्ग-), स्वर्जिता मरिचं तथा (for the post half).
J चातुजीरकबाह्लीकस्वर्जिकामरिचं चिताः ।
b J आरोपितजिगीषूणां.
40 a J स्नेहादि पाचिताः, B स्नेहा-
b J पर्पटा.
41 a J विहितं N, C another reading विशुद्धद्व्याहितशुष्कपाकं.
b J वाऽधारितं B ससैन्धव, क्षुधा
42 a J पाचन B लघ्वग्निबोधनं BB पाचितं.
b J -दोषत्रयं-. B क्रमान्, BB क्रमात् (for क्रमीन्).
43 a Title BB अथ ताहरीतकी. B वेषवाराढ्यं. J सतण्डुलैः.
b J तत्ताहरी BB तारी स्मृत.
44 a J वातपित्ताहरा
b B: जयते
45 a Title B अथ क्रांशरा. B खण्डितैर्न
B J अष्टभागयुता मुद्गसंयुक्तैर्द्वादिशांशकैः ।

सार्द्रा नार्द्रा सुसन्धाना सबाह्लीका वराञ्चिता ।
सस्नेहा कामिनीचेयं कृशरा शिशिरे हिता ॥ ४६

कृशरा दुर्जरा बल्या गुर्वी वातविनाशिनी ।
बलपुष्टिमलश्लेष्मपित्तविष्टम्भकृत सरा ॥ ४७

अथ कर्चरी ।

आराम्लकृतसंस्कारा शुष्का स्नेहविपाचिता ।
अरोचकादिरोगाणां कर्चरी कण्ठकर्तरी ॥ ४८

कर्चरी रुचिकृद्बल्या सुस्वाद्वी त्वतिलेखनी ।
उष्णा पित्तकरा प्रोक्ता कफकृत्सारका स्मृता ॥ ४९

अथ मूलकम् ।

सुकल्पितमतिसूक्ष्मं बालमूलस्य मूलं
लवणमथितमुच्चैः पीडितं पाणियुग्मे ।
सुरभितमति निम्बूहिङ्गुधूपेन युक्तं
भवति जठरवह्नेस्तूर्णमुद्दीपनाय ॥ ५०

मूलकं वातलं रुच्यं वीर्योष्णं पाचनं लघु ।
हन्ति दोषत्रयं श्वासं सुह्रद्योगाच्च पीनसान् ॥ ५१

महत्तदेव विष्टम्भि रूक्षं दोषत्रयप्रदम् ।
स्निग्धसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ॥ ५२

---

46 a B omits नार्द्रा BB रार्द्रा (for नार्द्रा).
b B क्रिशिरा.
47 a B क्रिशिरा, वातविनाशि
b B -श्लेष्मबृंहणं पित्तहा सरा
48 a Title J अथ कच्चरम्, B अथ कर्चरं, BB अथ कर्चरः. J शुष्के. B विपाचितः (BB -ता:)
b J कच्चरी कण्ठकत्तरी (for the post half) BB आरोचके-, कर्चरी कर्तरी वसा.
49 a J कच्चरी, सुस्वादुस्त्वतिलेखनी. B स्वादुकृत्यतिलेखनी BB सुस्वादुत्तं तिलेखनी.
b B पित्तधरा B, J मता (for स्मृता).
50 a J सुकर्त्तित-, BB सुकतिल-
b J -युग्मैः
c B हिंगन -
51 a BB वीर्योष्णं
b J चाश्रु (for श्वासं) BB दोषमयी.
52 a J विष्टंभी B दोषत्रयाप्रदं
b J स्यात् दोष-

तत्पुष्पं श्लेष्मपित्तघ्नं फलं वातकफापहम् ॥ ५३

अथार्द्रकम् ।

भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अग्निसंजननं श्रेष्ठं लवणार्द्रकभक्षणम् ॥ ५४

मृत्त्वचारहितमङ्कुरवच्च आलितं सुविमलैर्बहुतोयैः ।
मिश्रितं लवणनिम्बुपयोभिर्बालमार्द्रकमुमापतिवोच्यम् ॥ ५५

तैलासुरीरजनिसिन्धुजपङ्कसङ्गि-
प्रस्यन्दमाननवनिम्बुरसप्रसिक्तम् ।
स्वादूत्तरं शिशिरवासरभोजनेषु
कस्येति वर्णनपथं खलु शृङ्गवेरम् ॥ ५६

एके वदन्त्यमृतमस्ति पुरेऽसुराणा-
मन्येऽपि चारुवनिताधरपल्लवेषु ।
ब्रूमो वयं सकलवैद्यमतानुसारं
जम्बीरनीरपरिपूरितशृङ्गवेरे ॥ ५७

शुण्ठ्योष्णं दीपनं हृद्यं सस्नेहं लघु पाचनम् ।
रोचनं प्रीणनं बल्यमार्द्रकं परिकीर्तितम् ॥ ५८

---

53 a J तत्फलं, BB तत्वकं (for तत्पुष्पं)

55 a B, BB विमलकैर्बहु-
 b B -वात- (for -बाल-)

56 a J -संगी
 b J -निंबुरसा-. B -प्रसक्तं
 c B स्वादूक्तंरसशिरवासरभोजनेषु । submetrical.

57 a B omits this verse.
 c J -मतानुसार
 d BB शृंगवेरं.

58 a J पथ्यं (for हृद्यं).
 b J परिकीर्त्तितम् .

अथ हरीसा ।

कृत्तं निरस्थि संपक्वमाज्ये स्वोपस्करान्वितम् ।
मांसं गोधूमसंयुक्तं हरीसेत्याह सूदकः ॥५९

बल्या सुमधुरा गुर्वी शीतोष्णाऽनिलपित्तहा ।
स्निग्धा शुक्रप्रदा हृद्या सरा सन्धानकारिणी ॥६०

अथ मांसरन्धनविधिः ।

ग्रामस्यानूपपजस्यापि जाङ्गलस्याण्डजस्य च ।
बिलौकसश्च मांसानां रन्धनस्योच्यते विधिः ॥६१

तलितं भृष्टकं स्विन्नं शुष्कं बहुरसं स्मृतम् । ।
तान्दूरं वटितं चैवं शूल्यं च पुटपाकजम् ॥६२

तलितं त्रिविधं प्रोक्तं भृष्टकं द्विविधं स्मृतम् ।
सुस्विन्नमस्थिगलितं शुष्कं तद्रसवर्जितम् ॥६३

---

59 a J कृत्तं, सोपस्करा-
b B गोधसमं युक्तं, सूदकैः

60 a N,C समधुरा corrupt. BB शीतोष्णोनिल-
b B सारा, BB सार (for सरा)

61 a Title J, BB अथ मांसरंधनम् । B. जांगलस्यापियस्य च BB ग्रामसा-
b J, BB विलोकस्य च B विलोकमस्य.

Additional stanzas in MSS.

1 J पाकेष्व गुरुणा धूपो गौल्वजे क्षीरजेषु च ।
शेषेषु पाकयोगेषु धूपयेद् हिंगु सर्पिषा ॥

2 B, BB दिवसंस्थापलमांसस्य स्नेहमात्रस्पचसं स्मृतं ।
लवणार्द्रपलं देयं वेषवारेपि च स्मृतं ॥
BB स्नेहमात्राफलं स्मृतं for the post half in a

3 B, BB शाणमुद्गलनं च स्यादितन्मानं तु रंधने ।
सपादं मत्स्यमांसः स्याद्द्रव्यं देयं तु मांसतः ॥
BB वा for च in a ; सामतः for मांसतः in b.

4 B, BB ऊनाधिकं च दातव्यं सर्वे भिन्नरुचिर्जनः ।
हिंगुस्नेहं च लवणं पानीयं व्यंजनेष्विह ॥

5 B, BB अनुक्तमपि दातव्यं पारंपर्याच्च योगतः ।

6 BB षड्विधानां तु शाकानां द्रव्यं देयं तु मांसवत् ।
अत्र जेष्वथ भक्तेषु किंचिज्जलं तु मांसतः ॥

62 a J बहरसं
b J शल्यं B विर्कटितं BB वटित पटपाकज N,C another reading वटिलपाचितं (for पटपाकजं)

सरसं रसवज्ज्ञेयं ताण्डूरं वह्निपाचितम् ।
वर्तितं तु शिलापिष्टं तत्पाको बहुधा स्मृतः ॥६४
शूलेन पक्वं मांसं यत्तज्ज्ञेयं शूलपाचितम् ।
गर्तयन्त्रेण यत्पक्वं तज्ज्ञेयं पुटपाकजम् ॥६५
एवं बहुविधः पाकः सूपकारविधौ कृतः ।
यस्य जन्तोर्हि यन्मांसं तन्मांसं तद्गुणावहम् ॥६६
विशेषोऽत्र यदुद्दिष्टः स ज्ञेयः सुष्ठुपाकतः ।
एवं बहुविधं मांसं प्रत्यङ्गं च पृथक्कृतम् ॥६७
स्थूलातिस्थूलविहितं सूक्ष्मात्सूक्ष्मतरं च तत् ।
खण्डशः कलितं मांसं धान्यहिङ्ग्वम्बुना क्रमात् ॥६८
क्षालयित्वा पुनर्हिङ्गुतोयमिश्रं पचेत्ततः ।
इति प्रक्षालनम् ।
हिङ्ग्वार्द्रजीरमरिचैर्युक्तं वेसवारकम् ॥६९
तच्च तैले पचेत्पूर्वमाज्ये वा सात्म्ययोगतः ।
अर्धस्विन्ने क्षिपेत्तक्रमथवा दाडिमीरसम् ॥७०

---

64 a J बहरसं

b B वर्टितं, बधाहु (for बहुधा) corrupt.

65 a B पुटपाकजं (for शूलपाचितम्)

b J गर्त्तायंत्रण B omits this line BB गर्त्तायंतेतु

66 a BB बहुविधं, पाकं

b M, C another reading तस्य तत्तद्गुणावहम् (for the post half) J omits तन्मांसं

67 a B, BB, J यथोद्दिष्टः

b J पृथे कृतम्, B पृथक् पृथक् BB प्रसंज्ञं. C Title - मांसप्रक्षालन विधि ।

68 a J सक्ष्म, B, BB सूक्ष्मं (for सूक्ष्मात्)

b B, J हिंग्वांबुना BB खण्डतः

69 a B तोयं मिश्रितं पचेत् (for the post half)

b Title C इति प्रक्षालनम् अथ मांसपाचनविधिः । B इति प्रक्षालनं
B मरिचै युक्तं वत् । BB मरिचैप्रयुक्तं

70 a J तच्चे BB omits M, C another reading सर्वमाज्ये

b J, B, BB omit.

सिद्धे पाके च दातव्यं चूर्णमुद्धूलनस्य यत् ।
मांसं तैलेन यत्सिद्धं तन्मांसं गुरु पित्तलम् ॥ ७१
वीर्योष्णं रुचिदं वृष्यं वातघ्नं पुष्टिकारकम् ।
मांसमाज्येन यत्सिद्धं लघु रुच्यमपित्तलम् ॥ ७२
अनुष्णवीर्यं बलदं हृद्यं दृष्टिप्रसादनम् ।
अथ सुस्विन्नमांसरन्धनम् ।
सर्वेसबारपानीये हिङ्गुधान्यजले ऽथवा ॥ ७३
केवले वा जले स्वेद्यं मांसं सुस्विन्नको विधिः ।
पश्चाद्वाघारितं तप्ते स्नेहे सम्यक्कराल्लिते ॥ ७४
चमत्कारस्तथा कार्यो रुचिः स्यात्प्रतिवेशिनाम् ।
तत उद्धूलनं देयं शुद्धमांसमिति स्मृतम् ॥ ७५
सुस्विन्नं कोमलं हृद्यं बल्यं वृष्यं रुचिप्रदम् ।
त्रिदोषशमनं चेति श्रेष्ठमग्निकरं परम् ॥ ७६
अथ कोमलसुगन्धम् ।
कुठेरपृथुकर्चूरगुञ्जापामार्जनस्तथा ।
कुठेरकादिजक्षारवारिणा चाशुकारिणा ॥ ७७.

---

71 a J, B, BB omit
b Title C तैलपक्वमांसस्य गुणाः । . BB, J omit . B यस्सिद्धं
72 a, J वातघ्नो BB omits
b Title C घृतपक्वमांसस्य गुणाः । BB तत्सिद्धं . J रुच्यं (for गुरु), अपित्तमलम् .
73 a B हृद्य.
b J-जलेश्चवा corrupt. BB सेर्वप्रतप्तपानीये .
74 a B स्वाद्यममांसं संस्वस्विन्नकं BB मांस
b J, B – चाघारितं .
75 a J प्रवेशिनम् , B प्रतिवेशितं , BB प्रतिवेशिनी
76 a Title C सुस्विन्नमांसस्य गुणाः J वृष्य B बल्य , हृद्यं (for वृष्यं)
b B त्रिदोषसमनं.
77 a C B, BB अथ कोमलसुगन्धः .
J – गुजा – . B कुबेर- (for कुठेर-), BB कुटेर , -गंजा –
BB – कर्चूरगुजा –
B J चासुकारिणा
B चाशुकारिणां

पाचितं धूपितं मांसं सुगन्धमतिकोमलम् ।
सुगन्धं रुचिकृन्मांसं बल्यं वृष्यं रुजापहम् ।
अग्निसंजननं श्रेष्ठं ग्राम्यं वा जाङ्गलोद्भवम् ॥ ७८



अथाजमांसम् ।

तिलजतैलसुपाकपाचितं कासमर्दसुरसं विमर्दितम् ।
सूपधूपमवधूमधूपितं मणिमन्थमथितं त्वजापलम् ॥ ७९

यादृशाः धातवो नॄणां अजानामपि तादृशाः ।
अतो धातुविवृद्ध्यर्थमाजं मांसं प्रशस्यते ॥ ८०

अथ बर्करः ।

सहिङ्गुनाऽऽज्येन युतं सुपक्वमजासुतस्यामिषमल्पकस्य ।
एलालवङ्गोषणयोगयोगात् करोति पुष्टिं जठरानलस्य ॥ ८१

अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं मृदुतरं श्रेष्ठं सुस्वादु बलदं मृशम् ॥ ८२

अथ बर्करी ।

सिद्धार्थसंभवे तैले घृते चोपस्कराविन्ते ।
साधितं त्वप्रसूतायाः पलमाजं गुणोत्तमम् ॥ ८३

---

78 a B सुपगंधम्-.

b J सुगंध. BB हृद्यं (for वृष्यं)

B inserts सैंधवं त्रिकटुधान्यजीरकैवाऽमीरजजीरामडान्वितैः ।
पाचनोछजवराग्निदीपनं वेसवारकथितो मुनी ॥
द्विभिः---- damaged.

79 a Title अथ अजामांसं BB अथोजामांसं. J -विपाचितं. सेवितम् (for विमर्दितम्).
B तिलजतैलजलेन सुपाचितं (for the prior half), तसमर्द-
MC another reading तैलजले सुपाचितं.

b J माणिमथमपितं B त्वजापलं BB -लव- (for -मथ-), माणिमंथमपितजलापहः

80 b B अतो धातुविवध्यर्थं आजं मांसं प्रशस्यते ॥

81 a J सुहिंगुनाज्येन, पुनः (for युतं). B सहिंगुमाज्येन, -माल्पकं स्यात् ।

82 a B लस्य (for बालस्य) M, C गुरुतरं (for लघुतरं), another reading लघुतरं

b BB मदुतरं, सुस्वादि.

83 a B चोपस्कराविन्ता

b B, BB -त्वप्रसूताया. BB फलमाजं.

अप्रसूताजसंभूतं मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥८४

अथ पटोरा ।

अप्रसूतस्य पीनस्य यौवनस्थस्य साधितम् ।
घृतरामठसिन्धूत्थोपस्करै रसवत्पलम् ॥८५
वातपित्तहरं बल्यं सुस्वादु रुचिकारकम् ।
हृद्यं पीनसकासार्शोशोषघ्नं पुष्टिकृत्परम् ॥८६

अथ छिलौधिया ।

शूलनिष्काशिताण्डस्य मांसं कृत्तमजस्य च ।
रन्धितं बहुधा सूदैरास्वुराद्यं च मस्तकम् ॥८७
तन्मांसं मांसदं बल्यं रुच्यं पित्तानिलापहम् ।
सुस्वादु मधुरं पाके किञ्चित्कफकरं सरम् ॥८८

अथ मेषमांसम् ।

मेषस्य मांसं बहुधा निकृत्तं सुपाचितं रामठयुक्ततैले ।
सुयोजितं वल्लिज-सैन्धवाभ्यां रुचिं विधत्ते भुवि सर्वकाले ॥८९
मेषमांसं गुरु स्निग्धं बल्यं पित्तकफप्रदम् ।
मेदःपुच्छामिषं वृष्यं कफपित्तकरं गुरु ॥९०

---

८४ b J, B, BB शुष्ककासारुचौ, C शुष्कश्वासे B हिममग्नप्रदीपनं

८५ a Title J अथ पटोरा, BB अथ पटोर, C omits. J पीतस्य. B यौवनं तस्य.
b BB -सिंधूस्थो-, N.C another reading सिन्धुस्थोपस्करै.

८६ a B सुस्वाद
b J, B, BB -कासार्शशोषघ्नं N, C another reading कासार्शशोफघ्नं.

८७ a Title J अथ छिलौधिया, N, C another reading छैलौधिया.
J, B, BB स्थूला- (for शूल-) B कृमजस्य BB आँसं कृत्तिम्- N, C another reading स्थूल-
b B सूदं रास्वुराद्य N, C another reading स्वैदं- BB सूपैरंस्वुरासाद्य.

८८ b परं (for सरम्)

८९ a J रामठतैलयुक्ते B निकृत्वं
b J, B, BB भुजि (for भुवि) BB मर्चमु- (for वल्लिज-).

९० a B स्निदं (for स्निग्धं)
b J. B, BB मेदपुछामिषं

अथ गाडरम् ।

कृत्तं संपाचितं तैले घृते चोपस्कराञ्चिते ।
मधुरं पाचनं बल्यं कटूष्णं गाडरं पलम् ॥ ९१

अथ मृगी ।

मृगमातृफलं सुकोमलं शतखण्डीकृतमाज्यभृष्टकम् ।
दधिसैन्धवहिङ्गुकोषणैररुचिं शीघ्रमपोहति श्रुतम् ॥ ९२

मृगस्य जननी शीता असृक्पित्तविनाशिनी ।
सन्निपातज्वरश्वासहरा मधुरपाकिनी ॥ ९३

अथ मृगमांसम् ।

मांसं मार्गं बहुशकलितं स्विन्नमीषच्च तोये
तप्ते स्नेहे जरणसहिते पाचितं शब्दमुच्चैः ।
सार्द्रं सान्द्रं लवणसहितं दाडिमेनातिचुक्रं
स्वादन् वादन् कलयति शिरश्चन्द्रचुडोऽपि नूनम् ॥ ९४

एणमांसं हिमं ग्राहि रुच्यं दोषत्रयापहम् ।
षड्रसं बलदं पथ्यं लघु हृद्यं ज्वरापहम् ॥ ९५

अथ छिक्कारः ।

मांसं छिक्कारजं कृत्तमाज्ये तप्ते सुभृष्टकम् ।
दधिसैन्धवहिङ्ग्वाढ्यं सुधूपेनावधूलितम् ॥ ९६

---

91 a Title C, B अथ गाडरमांसम् , J,BB अथ गडुरं, J,BB गव्ये (for तैले), सोपस्करा- J संपादितं

b J पित्तकृत् (for पाचनं), कटूष्णं, गरुडं B पाचितं, गाडुलं.
BB मधुरं चापि तद्बल्यं कटूष्णं गारपाचितं ॥

92 a Title C, J, BB अथ मृगीमांसम्, B अथ शृंगीमृग मातृफलं J -भव्य - BB -मांसपकं

b J, B, BB -कोषणैः साधितं त्वरुचिमाशु निहंति ॥

93 a J, BB शीतासृक्पित्तशमनी मृगस्य जननी स्मृता ।

b J -श्वासकासहिक्कारुचिप्रणुत् । hypermetrical B -श्वासवृष्या मधुरपाकिनी ।
BB सन्निपातज्वरं श्वासकासहिक्कारुचि प्रशमेत् । hypermetrical

94 a J, B तोयै. J मार्गी. B बहुसुकलितं

b J, B स्वाप्ते. J तोये (for स्नेहे) B शब्दमुच्चै

c J, B नार्द्रं (for सान्द्रं). BB सार्द्रं रार्द्रं N, C another reading युक्तम् (for चुक्रं)

d B स्वादन् BB स्वादत् स्वदित् B. शिरश्चडिकाचंद्रचूड० (for the post half) submetrical.

95 a J एणं मांसं हि संग्राहि (for the prior half) B ग्राही

96 a Title J, B अथ छिकरा, Omits., BB अथ छित्करा. B छेक्कारजं, BB छित्कारजं

b N. C another reading सुधूपेनावधूपितम्

छिक्कारं मधुरं स्वादु कफपित्तानिलापहम् ।
विपाके कटुकं प्रोक्तं विशेषेणाग्निवर्धनम् ॥ ९७

अथ शशकः ।

निरस्थिकृत्तं पलमेव शाशं सहिङ्गुनाऽऽज्येन कृतं सुपाकम् ।
ससैन्धवं धूलनदत्तवासं करोति कोष्ठाग्निमतिप्रकाशम् ॥ ९८
शशः शीतो लघुः स्वादुर्ग्राही पथ्योऽग्निदीपनः ।
सन्निपातज्वरश्वासरक्तपित्तकफापहः ॥ ९९

अथ पाठीमांसम् ।

पाठीमांसं बहुतरघृते स्वल्पवह्नौ विपक्वं
त्र्यैकं चूर्णं लवणसहितं शृङ्गवेरप्रभूतम् ।
मध्ये तस्मिन् क्षिपति सुतरां कर्कशे हिङ्गुनाऽऽढ्यं
तेन घ्रातं नयति सुतरामाश्रयां संप्रकाशम् ॥ १००
पाठी सुशीतमधुरा बल्या पित्तविनाशिनी ।
वातहृत्कफदाऽत्यर्थं शुक्रदा रुचिकृद्धरा ॥ १०१

अथ साम्बरमांसम् ।

मांसं साम्बरसंभूतं पाचितं बहुधा घृते ।
वेसवारोपणाकीर्णे हिङ्गुसैन्धवसंभृते ॥ १०२

---

97 a J कषायं (for छिक्कारं), B छेक्कार, B, BB -पित्तनिलापहं

b C विपाकं J विशेषेणाग्निवर्द्धनम्

98 a Title C अथ शशकस्य मांसम् J पलमेलमेव (for पलमेव) hypermetrical

J, B सुहिंगुनाज्ये हि कृतं सुपाकम् BB सुहिंगुनाज्यो हि कृतं सुपाकं (for the post half)

100 a Title अथ पाटीमांसम् (J, B, BB) J, B, BB पाटी- J -ल्पवह्नौ J, BB विपाके

BB पाटीमांस विपाक बहुतरघृते स्वाल्पवह्नौ

b J -प्रसृतम् B शृंगवेर्गं-

c J, B, BB क्षपति B कर्कशो

d B तेन घ्रातं मनयति सुतरां श्रायासं प्रकाशं । BB तेना.

101 a B सुशोन- B, BB, J पाटी

102 a Title J अथ सावरं मांसम् B अथ शंवरमांसं BB अथ सावरमांसं

J शाबर, B शंबर, BB सांवर. J याचित

b BB -संयुते

बलपुष्टिकरं रुच्यं विष्टम्भि गुरु पाचनम् ।
साम्बरं बलदं शीतं सुस्वादु पललं मतम् ॥१०३
रसे पाके च मधुरं रक्तपित्तनिबर्हणम् ॥१०४

अथ चित्तलः ।

असिततिलोद्भवतैलविपक्वं लवणयुतं जपहिङ्गुरसाढ्यम् ।
त्रिकटुकयुक्तनिशार्द्रकमिश्रं बहुगुणचित्तलमांसमनर्घ्यम् ॥१०५
विचित्रशम्बरौ शीतौ गुरुस्निग्धौ कफावहौ ।
रसे पाके च मधुरौ रक्तपित्तविनाशनौ ॥१०६

अथ रोजः ।

तैले संपाचितं तप्ते हिङ्गुसैन्धवसंयुते ।
मांसं गवयसंभूतं सुस्विन्नं भूरिवारिणा ॥१०७
गवयो मधुरो वृष्यः स्निग्धोष्णः कफपित्तलः ।
गुरुर्विदाही विष्टम्भकारको विरसः सदा ॥१०८

अथ वराहः ।

वराहस्य तनुं तप्ततोयैः प्रक्षालितां मुहुः ।
तृणाग्निनाऽथवा दग्धां किञ्चित्तोयेन सेचिताम् ॥१०९

---

103 J, BB omit this stanza. B inserts:
शंबरमांससंदोषं कफानिलविदर्धनं ।
अग्निसंदीपनं हृद्य विपाके मधुरं स्मृतम् ॥

104 J, B, BB omit this stanza.

105 a Title J, BB omit. C अथ चित्तलस्य मांसम् । B अथ त्तिचलः
B -नेल- (for -तैल-), लवणयुनं.
b B, BB - द्रव - (-द्रेक-). B -मांसमजस्म BB मांसमनार्घ्यं

106 a J गुरुस्निग्ध. J, B, BB कफप्रदौ
b BB the price half illegible

107 a Title C अथ रोजस्य मांसम्, B अथ रोकः, BB अथ सेम.
BB तैलं B संपाचिते
b BB भूत - (for भूरि-)

108 a B वृष्यो BB स्निग्धोष्णः
b B गुरुविदाह

109 a Title J, B अथ वाराहः J, B, BB वाराहस्य BB, B तप्ततोये
B बक्षालितं BB बहु (for मुहुः)
b J सेकितं (for सेचिताम्) J, BB तृणाग्निनाथ च दग्ध किंचित्तोयेन सेकितं ।

शस्त्रेण दंशयेत्तत्र यथा निर्लोमता भवेत् ।
ततस्तत्तीक्ष्णशस्त्रेण पाटयित्वा यथोचितम् ॥ ११०

गृह्णीयादामिषं तस्य पृथगङ्गविभागतः ।
रन्धयेद्बहुधा श्रद्धं प्रलेहतलनादिकम् ॥ १११

स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरु ।
श्रमानिलहरं स्निग्धं वाराहं बलवर्धनम् ॥ ११२

अथ गोधा ।

गोधामुष्णजलैर्भूयः क्षालितां खण्डशः कृताम् ।
स्विन्नां च तोयतक्राभ्यां क्षालितां सूक्ष्मखण्डिताम् ॥ ११३

तलयेद्वेसवारावैः प्रलेहो वा विधानतः ।
विपाके मधुरा गोधा वातपित्तप्रणाशिनी ॥ ११४

कषाया कटुका प्रोक्ता कफघ्नी बलवर्धिनी ।

अथ कच्छपः ।

तप्ततोये परिक्षिप्तं सम्यगानीय कच्छपम् ॥ ११५

तन्मांसं कर्परादुग्राह्यं खण्डितं स्वल्पकण्डितम् ।
पाचितं सार्षपे तैले हिङ्गुसैन्धवसंयुते ॥ ११६

वेसवारसमायुक्ते दाडिमेन सहाम्लिते ।
कच्छपो बलकृद्वीर्यं वातजिच्छुक्रकारकः ॥ ११७

---

110 a J यतो (for यथा)
b BB ततस्तीक्ष्ण- , ययोचितं
111 a B पृथगंगविभेगतः ।
b B व्रध्रं.
112 a J स्वदनं BB गुरुः
b N another reading नराहं.
113 a Title BB अथ तत्र गोधा BB -मम्ल- (for -मुष्ण-). भूयात् ,आलिता.
b J transposes तोय and तक्र B खंडिता.
114 b J -प्रनाशिनी BB विनाशिनी.
115 b Title J,B,BB अथ कच्छपः. J सम्यक् स्विन्नं तु कछपं. BB सम्याक्लिन्नं च कछपं. B कछपं
116 a J,BB-खंडकं, B-खंडितं (for -कण्डितम्). B कर्परा ग्राह्यं, BB कर्परागाद्यं N,C another r. कर्परग्राह्यं
b J पचितं BB शार्षपे.
117 a B वेवषवार -
b J,B वातजिच्छुक्रकारकः B बलकृद्वीर्यं BB कछपो.

स्निग्धोष्णः प्रीणनः सद्यो विपाके कटुकः सरः ।

अथ प्रलेहः ।

स्थूलानि मांसखण्डानि क्षालितानि च वारिणा ॥ ११८

तातस्नेहे विनिक्षिप्य दर्व्या संचालयन् पचेत् ।

ततस्तत्र विनिक्षिप्य लवणं जलमल्पकम् ॥ ११९

पचेत्पटपटाशब्दं तस्मिन्मांसे प्रकुर्वति ।

प्रक्षिपेद्दाडिमीनीरं बहु तेन पचेत्पुनः ॥ १२०

मांसपिण्डेषु सिद्धेषु देया शुण्ठी सजीरका ।

तत उत्तार्य तन्मांसं पृथक्कुर्यात्प्रलेहतः ॥ १२१

प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ।

हिङ्गुना घृतयुक्तेन धूपं तत्रैव दापयेत् ॥ १२२

इति गौरीमते गौरप्रलेहः ।

अथ पत्तलप्रलेहः ।

स एवाल्पाम्लिमस्नेहः साधितः पत्तलः पुन. ।

तथैव वाससा पूतो धूपितोऽपि च पत्तलः ॥ १२३

अथ धनञ्जयप्रलेहः ।

मांसकूष्माण्डकदलीशृङ्गवेराणि साधयेत् ।

प्रलेहविधिना सम्यक् प्रलेहोऽयं धनञ्जय. ॥ १२४

---

118 a J सद्य B स्य: (for सरः) BB स्निग्धोष्ण:

b Title B अथ प्रलेहः, BB अथ प्रलेह

119 a BB दर्वी J विनिःक्षिप्य B संचालयेत्

120 a J -शब्द BB मांस

b B -जीर N, C another reading बहुलेन (for बहु)

121 b J प्रलेहयेत्, B प्रलेहता

122 a B पूत

b J, B धूपस्तत्रैव धूपिते (for the post half). B घृततप्तेन

BB धूपितं (for दापयेत्)

123 a Title C इति गौरीमते प्रलेह J इति गौडीगौर प्रलेहः, omits अथ पत्तलप्रलेहः

B इतिति गौर प्रलेहः BB अथ गौरीगौर प्रलेहः. J पित्तलः

b J पित्तलः N, C another reading पित्तलः

124 a J omits the title BB -शृंगवैरं

b J, B, BB चार्यं (for सम्यक्)

अथ गौडदेशीयप्रलेहः ।

हिङ्ग्वार्द्रबीजपूरैस्तालवणैः संभृतेन च ।
कुट्टितामिषपिष्टेन तक्रदाडिमबीजतः ॥१२५
सोष्णावेसवाराभ्यां प्रलेहो गौडदेशजः ।
प्रलेहो रुचिरो हृद्यः कफानिलरुजापहः ॥१२६
संग्राही पित्तकृत्किञ्चिच्छूलाध्मानगदाञ्जयेत् ।

अथ पूरणम् ।

हिङ्गुधान्यजले मांसं सुस्विन्नं सूक्ष्मकुट्टितम् ॥१२७
संयुक्तं हिङ्गुजीरार्द्रबीजपूरैस्तसैन्धवैः ।
घृते तप्ते परिभृष्टं धूपितं मांसपूरणम् ॥१२८
मांसस्य पूरणं रुच्यं हृद्यं पुष्टिकरं परम् ।
वातपित्तहरं बल्यं मन्दाग्निकफनाशनम् ॥१२९

अथ समोसा ।

मण्डकस्य कृता पट्टी पूरणेन प्रपूरिता ।
वेष्ट्या शृङ्गाटकाकारं सन्धिं लिप्त्वोत्कणिष्टया ॥१३०
घृते भृष्टा समोसेति नाम्ना ख्याते हि सूपकैः ।
सुरुच्या वातजिद्बल्या वृष्या पित्तापहा गुरुः ॥१३१

---

125 a Title अथ गौडदेशी प्रलेहः J, BB लवणैः. J, B, BB तु (for च) B संभृतेव.
b B तत्र दाडिबीजतः BB कुट्टितापिषं.
126 a B सोष्मणा–
b J, B, BB रुचिदो.
127 b J –पले (for –जले) BB सुस्विन्नः, –कुट्टिमं
128 a J, BB –बीजपुरैः, –ससैन्धवैः B –पुरे–
b B परिभ्रष्टं, धूपितं BB नप्ते (for तप्ते), परिभृष्टं
129 a B, BB वरम् (for परम्).
b BB वातपित्तकरं
130 a Title J अथमोसा B मंडपस्य BB मंडनस्य
b J –कनिकाया B भृंगाटकारासंधिप्पाकणिकया corrupt and submetric
BB शृंगाटिकाकारं संधिलिप्येकत्तिकया सा submetric
131 a J तप्त्या (for भृष्टा). J, BB सूपकः B भ्रष्टा, नम्ना
b J, B, BB read all adjectives in neuter gender.

विशेषोऽत्र गुणे यो हि मांसमेदाद्विविच्यते ।

अथ पूरणप्रलेहः ।

मांसपूरणयोगेन लोष्ठाकारं विधाय च ॥१३२

स्विन्नं कृत्तं घृते भृष्टं प्रलेहविधिना पचेत् ।

पूरणस्य प्रलेहो यः स ज्ञेयो वातनाशनः ॥१३३

श्लेष्मप्रकारकश्चैव मुखवैरस्यहृद्धरः ।

अथ शुक्लवर्णप्रलेहः ।

घृतवेसनधान्याकहिङ्गुभृङ्गचिसंयुते ॥१३४

वस्त्रपूतेऽर्धसंपक्वं स्विन्नं मांसं विनिक्षिपेत् ।

लवणं हिङ्गु निक्षिप्य शुण्ठीं क्षिप्त्वा सुपाचयेत् ॥१३५

एलां क्षिप्त्वाऽवतार्यैत पटपूतं च धूपयेत् ।

अथ पीतवर्णप्रलेहः ।

प्रलेहः पीतवर्णोऽपि कार्यः शुक्लप्रलेहवत् ॥१३६

विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ।

तप्तस्नेहे क्षिपेद्धिङ्गुसंयुक्तं कासमर्दनम् ॥१३७

धान्यं च लवणाजाजी धौतं मांसं ततः क्षिपेत् ।

ततोऽर्धस्फुटिते मांसे दाडिमीबीजसंयुतम् ॥१३८

---

132 a J गुणो

b B, BB लोष्टाकारं.

133 a J, B, BB कृतं B, BB भृष्टं

b B यं, BB हः (for यः).

134 a J, B, BB श्लेष्मांतकारकश्चैव (for the prior half). N, C another r.-कृद्गुरुः (for हृद्धरः)

b B -वेसण-

135 a J -संपक्व B -पूरे- (for -पूते-), स्विन्नां.

b J मरिचं (for शुण्ठीं) निक्षिपेत्ततः (for the post half)

B निक्षेप्य, शुंठी, विपाचयेत् BB शुंठि°, वतारयेत् (for सुपाचयेत्).

136 a J शुंठी° (for एलां), धूपये. B क्षिव- (for क्षिप्त्वाऽव-). corrupt.

BB श्वेतप्रलेहकं चैव (for the prior half)

137 a J संसर्जौः B च (for वा) BB हरिद्रायाः ---the post half is damaged

b J क्षिपयं- (for क्षिपे-), कासमर्दकं, B कासमर्दकं, BB काशमर्दकं

138 a B धौत BB -जाति (for -जाजी), मांस, विनिक्षिपेत् (for ततः क्षिपेत्)

b J, BB -जांचितं (for -संयुतम्) B ततोर्द्ध-, BB ततोद्ध-

तक्रं शुण्ठीं विनिक्षिप्य सिद्धे हिङ्गु विनिक्षिपेत् ।
तत उत्तार्य वस्त्रेण गालयेच्छूपयेदपि ॥१३९

अथ हरितवर्णप्रलेहः ।

मेथिका कासमर्दाम्लकल्केन च कराक्षिते ।
घृते मांसं विनिक्षिप्य पचेच्छुक्लप्रलेहवत् ॥१४०
सिद्धं च गालयेद्वस्त्रैः कृत्वा वर्णप्रयोजनम् ।
ताम्बूलं काष्ठजागारं देयं हरितहेतुना ॥१४१

अथ रक्तवर्णप्रलेहः ।

रक्तवर्णप्रलेहस्य संसिद्ध्यर्थं विनिक्षिपेत् ।
करमर्दं दाडिमस्य स्थाने शेषं तु पूर्ववत् ॥१४२
अरुचौ रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित्पित्तकरः स्मृतः ॥१४३

अथ भृष्टमांसम् ।

अङ्गारकर्पराभ्यां च शूलयंत्रे पुरेऽथवा ।
भर्जनं विविधं प्रोक्तं सूपकारविशारदैः ॥१४४
जलेन स्वेदयेत्पूर्वं प्रोतं शूलेऽन्तरान्तरम् ।
दध्याद्रं हिङ्गुलवणैर्लिप्ताऽङ्गाराग्निना पचेत् ॥१४५
तच्चूर्ण्यं तु सुधातुल्यं रुच्यं वह्निप्रदं लघु ।
तदेवाङ्गारपक्वं तु प्रतप्तं वातनाशनम् ॥१४६

---

139 a B, BB शुंठी
140 a J, BB मिथिका, B मत्सिका, कासमर्द्दाद्यकल्केन, करक्षिते.
b J विनिःक्षिप्य, BB संनिविक्षिप्य. J -छुक्ल-
141 a J, B, BB वस्त्रे, वर्णयोजनम् . B -प्रयोजिनी.
b J तांकूतं (for ताम्बूलं), गंधर्वागारं B हतुना BB तांपूलं गंधर्वागारं देवे.
142 a J विनिःक्षिपेत्
b J करमर्द्दं. B स्थान.
143 a BB सद्यौ.
144 a J शूलपत्रे पुटेथवा (for the post half) B पुटेतथा BB यंत्रे.
b J विधिदं (for विविधं)
145 a J शून्यतरांतरं B शूलेंतरांतरं, BB पोतं शून्यतरांतरं (for the post half).
b BB -र्लिप्त्वाङ्गाराग्निना पचेत् (for the post half).

अथ यकृद्गृष्टम् ।



स्विन्नं यकृद्धृते तप्ते दध्नाऽऽलोड्य च भर्जितम् ।
मात्रया दधिसिन्धूत्थरामठैलापरिप्लुतम् ॥१४७
मरिचार्द्रकसंयुक्तं सुगन्धिद्रव्यवासितम् ।
गतद्रवं सुधातुल्यं परिशुष्कं तदुच्यते ॥१४८
परिशुष्कं स्थिरं स्निग्धं रोचनं तर्पणं लघु ।
बलमेधाग्निमांसौजः शुक्रवृद्धिकरं परम् ॥१४९

अथ ताम्दूरम् ।

अङ्गारपूर्णगर्तायामलग्नमवलम्बितम् ।
विहितं संभृतैर्मांसं पक्वं ताम्दूरमुच्यते ॥१५०

अथ सुस्वादुताम्दूरम् ।

पचेद्गर्तान्तरिक्षस्थं लम्बि संसारसंभृतम् ।
चतुर्दिङ्मण्डलाकारे पार्श्वप्रज्वलितानले ॥१५१
विपक्वं सुरभि स्वादु ताम्दूरमिति कीर्त्यते ।

अथ शूलपक्वताम्दूरम् ।

कोष्ठिकायां ससंभारमलग्नमवलम्बितम् ॥१५२
मांसं विधाय बाह्याग्निज्वालया स्वेदितं वरम् ।
ताम्दूरं रुचिरं मांसं मृदु पथ्यतमं स्मृतम् ॥१५३

---

147 a Title J अथ यकृद्भृष्टं, BB अथ कृद्भृष्टं. J तप्ते (for तप्ते), दध्यालोड्य
BB स्विन्नं कद्कृतघृते तप्ते दध्यालोड्य च वर्जितं ।

b BB मत्रीय (for मात्रया) corrupted

148 b B जतद्रव्यं BB परं शुष्कातदुच्यते (for the post half)

149 a J, B, BB तर्पणं BB परंशुष्क।

b BB -मांसौज, श्रुक्र-

150 a Title B, BB अथ तांदुरं. J -गत- (for -गर्ता-) B Post half is damaged

151 a Title B अथ सुस्वादुतांदू. J -गर्त्तौत-. B -तौतरिक्ष. BB -पचेद्गर्तैन्तरिक्ष,
सँतार- (for संसार-)

b B, BB मंडलाकारैः, -प्रज्वालिता-

152 a B कीर्त्तितं BB सुरभिः

b Title अथ शूलपक्वं तंदूरं BB अथ कुशूलपक्वं तांदूरं B, BB सुसंभार-
-वलंबितं J कोष्टिकारेयां

153 a J -ज्वालये. B शूलया (for ज्वालया)

b B पथ्यतरं, BB पथ्यांतमं.

सद्योहतं नवं स्थूलमन्यथा दोषकारकम् ।

अथ पुटपाकः ।

सूक्ष्मं यत्कुट्टितं मांसं संभृतं वेसवारकैः ॥१५४

छन्नं पत्रैर्मुदा सर्वं वेष्टितं वर्तुलाकृति ।

पचेत्प्रज्वलिते गर्ते कणिकयान्तिलवेष्टितम् ॥१५५

पचेदेवं बीजपूर नारङ्गदल वेष्टयपि ।

अथ फलपुटपाकः ।

पिष्टं साफलमजक्तं वा संभृतं कोरितं फले ॥१५६

पूर्ववत्पुटितं वह्नौ विपचेत्फलसंज्ञकम् ।

पुटपाकेन यन्मांसं पाचितं पाचकं हि तत् ॥१५७

सोष्मं तद्गुणवच्ज्ञेयं शीतं शुष्कं तु दुर्जरम् ।

मांसस्य पिष्टिकां कृत्वा वेसवारेण योजिताम् ॥१५८

बहुधा क्रियते तस्या वटिकावटकादिकम् ।

आम्रचिञ्चीफलाकारं लड्डुकावटकादिकम् ॥१५९

शृङ्गाटकफलाकारं यथाबुद्धिप्रकारजम् ।

कृत्वाऽपि बहुधाकारं स्वेदितं घृतभर्जितम् ॥१६०

---

154 a J वंन (for नवं).

155 a J, BB पत्रमुदा, B पत्रेमुदा. B वर्त्तुलाकृतिं, BB वर्त्तुलाकृतिः.

b J -को पचेत् (for -वेष्टितम्) B -वैष्टितं

BB वह्नौ वर्त्तप्यां न को पचेत् । submetric

156 a J, BB omit पचेत् ; नारंगवेष्टेपि submetric

BB पचेत् बीजपूरकदलैरेवं नारंगदलवेष्टयपि ।.

157 a J-पुटित B पूर्ववत्पाचितं

b B पाकजं (for पाचकं).

158 a J -गुणवद्ध्यं BB सोष्म

b Title ( अथ राजिकमांसम् । J, B अथ वंटनप्रभेदः । BB अथ वटिकाप्रभेदः ।

B पिष्टिका BB विषवारेण B, BB योजिता.

159 a B, BB कुर्यते B वटका....कं (with hiatus).

b J omits this line BB-विंची- (for-चिञ्ची-)

160 b J, B कृत्वा हि, BB कृत्वा तु. B बहुधारेस्वं, BB बहुधाऔरस corrupt.

B स्वेदित घृतर्जितं (for the post half). submetric.

वेसवारयुते तक्रे क्वथिते च मनोरमे ।
निक्षिप्य चालयेद्दीर्घकुन्तार्धैर्लाद्दिवासिते ॥१६१

एवं नु बहुधा कार्यो मांसमुद्गप्रलेहकः ।
प्रलेहो वातजिद्बल्यस्तक्रमांसभवो रसः ॥१६२

प्रीणनो व्रणयुक्तानां शुक्रदः क्षीणरेतसाम् ।

अथ मांसेण्डरी ।

पिष्टे मांसेण्डरीं स्विन्नां मासूरे पर्णवेष्टिताम् ॥१६३

मरिचैः स्नेहलवणैः संस्कुर्याद्धूपयेत्ततः ।
मांसस्येण्डरिका प्रोक्ता गुर्वी वृष्याऽनिलापहा ॥१६४

विशेषोऽत्र गुणानां यः स ज्ञेयो मांसभेदतः ।

अथ कुट्टितं मांसम् ।

मांसमस्नायु संगृह्य सूक्ष्मं कृत्वा तु कुट्टितम् ॥१६५
वेसवारसुगन्धं तत्स्वेदितं पाचितं भवेत् ।

कुट्टितं पाचितं मांसं तन्मांसं लघु वीर्यनम् ॥१६६
तत्रापि जाङ्गलं श्रेष्ठं जाङ्गलेष्वपि पक्षिणाम् ।

अथ मधुरमांसपाकः (क्षीरामृतम्) ।

घृताम्बुस्वेदिते मांसे शुण्ठिचूर्णं विनिक्षिपेत् ॥१६७
कुन्धं च शर्करोपेतं पश्चात्सौगन्धिकं न्यसेत् ।
नातिसान्द्रं नातिशुष्कमिदं क्षीरामृतं स्मृतम् ॥१६८

---

161 a BB,J सवेषवारजे, B सवेषवारेण. BB तक्रेण
b BB ल्पाचियासिते

162 a J हे (for नु) B omits नु, बहुविधा
b BB - मांसरसोऽपि:

163 b Title J मांसेंडरी. J,B,BB पिष्ट, स्विन्ना J,B - वेष्टितं, BB-वेष्टिते

165 b J,B अथ कुट्टितमांसं, BB अथ कुक्कुटिमांसं B - स्नायुतं गृह्यं, BB - मस्वाय.

166 a J,B - सुगन्धयं, BB सुगन्धये J तस्वेदितं, B तत्स्नेहितं.

167 a J श्रेष्ठ, The post half is damaged.
b Title J,B,BB omit क्षीरामृतम् B शुंठीचूर्ण

क्षीरामृतं बहुरसं न चोष्णं नातिशीतलम् ।
वातपित्तहरं वृष्यं सुस्निग्धमतिकोमलम् ॥१६९

अथ मुण्डरन्धनम् ।

समग्रं विदहेन्मुण्डमग्निना स्थूलहेतिना ।
प्रक्षाल्य तप्तपानीयैर्लोमनाशाय घर्षयेत् ॥१७०
खण्डयित्वा पचेत्तैले घृते चोपस्करान्विते ।
मुण्डामिषं वातहरं स्निग्धं गुरुतरं स्मृतम् ॥१७१
पशोर्यस्य हि यन्मुण्डं तन्मांसैकगुणावहम् ।
मुण्डस्य विधिना पाद्यं चरणं तु प्रलेहितम् ॥१७२
चरणं वातहृद्बल्यं वृष्यं पित्तहरं गुरु ।

अथान्त्ररन्धनम् ।

अन्त्रिकां छिद्रमात्रेण धौतां निर्मलवारिणा ।
शृङ्खलासंज्ञिकां कृत्वा स्वेदयेद्धिङ्गुवारिणा ॥१७३
कर्तितां वेसवारार्द्रैस्तलयेद्वा प्रलेहयेत् ।
अन्त्रिका गुर्विकाऽरुच्या वातहृच्छ्लेष्मकारिणी ॥१७४
निःसारा विरसोऽसारा तद्वज्ज्ञेया तु घण्टिका ॥१७५

अथ राजिकामांसम् ।

स्विन्नं तक्राम्बुना मांसं घृतभृष्टं सुवासितम् ।
सुचूर्णं सैन्धवोपेतं दधिराजिकया युतम् ॥१७६

---

169 a J, BB च (for न). J रोचकं, BB रोचनं (for चोष्णं).
b BB omits this line
170 a B दहेन्मंड- (for विदहेन्मुण्ड-)
172 a B यन्मास (for -यन्मुण्डं), तन्मुंडैक (for तन्मांसैक-) BB च (for हि)
173 b BB अन्त्रिका, धौते.
c J, B -संज्ञतां BB शृंगाला-
174 a BB कर्त्तिता, -तालयेद्वा
b B वातकृत्, BB वातला.
175 a J त्रिका (for घण्टिका) B निःसा, BB निसारा B उर्त्रिका, BB उर्मिका (for घण्टिका)
176 a Title in अथ राजिकमांसम्, J, B अथ रातिकमांसं BB राजिकामांसः
J सुवासितातं
b B सचूर्णं, BB सुचूर्णं B दधिकया युतं (for the past half). submetric
BB धाधि- (for दधि-).

मांसासुरी तु वातघ्नी लध्वी रुच्या बलप्रदा ।
कफघ्नी पित्तला किञ्चित्सर्वाहारस्य पाचनी ॥१७७

अथ मांसपूरितवार्ताकम् ।

वृन्तमुत्सार्य वार्ताकं कोरितं पूरयेदिदम् ।
कुट्टिताख्येन मांसेन पूरितं पूरणेन वा ॥१७८
ततस्तेनैव वृन्तेन तच्छिद्रं मुद्रितं पुनः ।
सन्धिं कणिक्यया लिप्य प्रलेहविधिना पचेत् ॥१७९
मांसवृन्ताकसंभूतः प्रलेहो वातनाशनः ।
रुचिपुष्टिकरश्चैव बल्यो वृष्यो रुजापहः ॥१८०

अथ पक्षिमांसप्रकारः ।

त्वक्पक्षरहितं मांसं स्विन्नं तक्रेण वा जले ।
अथवा पुटपाकेन स्वेदितं वाऽथ दार्विके ॥१८१
शलाकास्थं पचेदग्नौ दधिसैन्धवहिङ्गुभिः ।
संस्कृतं मरिचैर्वाभिरेतत्पक्वतमं स्मृतम् ॥१८२
अथवा स्वेदितं मांसं पाचितं वैसवारिकम् ।
घृते द्रवे वा पिष्टे प्रलेहविधिवत्पचेत् ॥१८३

---

177 b पाचिनी
178 a Title B अथ मांसपूरित...वार्ताकं J,B,BB वृन्तमुत्सार्थ BB कोरितं
b J कुट्टिताख्येन BB च (for वा)
179 a B,BB तच्छिद्रं, पूरितं (for मुद्रितं) BB-स्तेनेव.
b J कनिकयया BB संधितं लिप्ताया (for सन्धिं कणिक्यया).
180 a J -वृन्ताक-
b BB वात्यो (for बल्यो)
181 a Title B अथ पक्षिमां प्रकारः । B -पक्षि- BB जलं
b J,BB दार्विके, B दार्विकं.
182 a J,B शलाकस्थं, BB शलाकस्य B -सैंधवहिङ्गुभिः.
b J,B -पक्वतरं BB-पतत्-(for -रेतत्-); पाकक्वमि (for पक्वतमं)
183 a B स्विदितं, वेसवारिकं J वेसकरितं BB वैसवारितं
b J घने, B यन (for घृते)
BB घृते तैले ध्यथविर (for the prior half) Corrupt.

अथ महाबालपाकः ।

कृत्वा पक्षविहीनं तु बीजपूरार्द्रसैन्धवैः ।
लवङ्गैलायुतं पेट्यां लोष्टीकृत्य सुस्वेदितम् ॥१८४
ततः कृत्तं शलाकास्थं भृष्टकं स्यान्महाबालम् ।

अथ बालभूतिपाकः ।

त्वक्पक्षरहितं स्विन्नं गुम्फितं चान्तरान्तरम् ॥१८५
शलाकायां च संपाच्यं भृष्टोपस्करसंयुतम् ।
शूल्यं सर्वोत्तमं मांसं लघु रुच्यमपित्तलम् ॥१८६
कफवातहरं श्रेष्ठं सर्वपाकोत्तमोत्तमम् ।

अथानूपजम् ।

स्वाद्यमानूपजं मांसं लुञ्चितं मर्जितं मनाक् ॥१८७
आलितं वारिणाऽत्यर्थं वेसवारेण संयुतम् ।
रन्धितं बहुधा भुक्तौ स्वेदितं वारिणा भृशम् ॥१८८
सुस्विन्नं खण्डितं सर्वमङ्गाङ्गेऽस्थिविवर्जितम् ।
तप्तमाज्ये सबालीके वेसवारसमन्विते ॥१८९
मर्जितं पाचितं तोयैः पूर्ववत्स्वेदसंभवैः ।
प्रलेहतालने चाथ शूल्ये वा बहुधा पचेत् ॥१९०

---

184 a Title N, C another reading महाबलभूरिपाकः, J अथा महाबुलपाकः
BB अथामलपाकः B पक्षी-, BB पक्षि- BB -सैंधवं
b BB लंकोलायुतं corrupt.

185 a J शलाकस्थं. BB कृत्तां. B ततः भृष्टकं स्यान्महाबलं submetric.
b Title N, C another reading महाबलभूरिपाकः J अथ बालभूतिपाकः
B महाबालभूरिपाकः B -पक्षि- J चान्तरान्तरा. BB त्वकाक्षिरहितं.

186 b B रुच्यं सापित्तलं

187 a BB श्लोत्मं (for श्रेष्ठं) B पाको-त्तमं त्तमं
b Title अथनूपजं. BB लुचितं.

188 a B, BB वारिणात्यर्थं
b B रोषितं, BB रोषेतं, N, C another reading रोषितं (for रन्धितं). BB बहु (for बहुधा)
B श्रुतौ, N, C another reading शुक्तं (for भुक्तौ)

189 a B डितं (for खण्डितं) BB सिस्विन्नं.
b J तप्तमाज्येन बालीके (for the prior half.), - समन्वितं.

190 a BB तोयै N, C another reading पूर्वं तत्

आनूपं बलकृन्मांसं स्निग्धं गुरुतरं स्मृतम् ।
धान्याऽङ्कुरचरा येऽत्र तेषां मांसं लघूत्तमम् ॥ १९१
विपाचितास्तित्तिरिवर्तिकाद्याः कपिञ्जला लावकपोतकाश्च ।
एकैकशो द्रव्यवयानुयोगान्मण्डूकरूपा कथिता सुधानाम् ॥ १९२
उदकस्थलजातानां विधिरुक्तस्तु रन्धने ।
पक्षिणो यस्य यन्मांसं तन्मांसं तद्गुणावहम् ॥ १९३

अथ तित्तिरिः ।

तित्तिरिर्वर्णदो ग्राही हिक्कादोषत्रयापहः ।
श्वासकासहरः कृष्णस्तस्माद्गौरोऽधिको गुणैः ॥ १९४

अथ वर्तीरः ।

वर्तीरोऽग्निकरः शीतो ज्वरदोषत्रयापहः ।
सुरुच्यः शुक्रदो बल्यस्ततोऽल्पा वर्तिका स्मृता ॥ १९५

अथ लावकः ।

लावो रूक्षो हिमः स्निग्धो ग्राही वह्निप्रदीपनः ।
पांसुलः श्लेष्मलस्तेषामुष्णवीर्योऽनिलापहः ॥ १९६
गौरकः कफवातघ्नो रूक्षो वह्निप्रदः परम् ।
पौण्ड्रकः पित्तकृत्किञ्चिल्लघु श्लेष्मश्रमापहः ॥ १९७

---

191 a BB अनूपं
b J -धरा (for -चरा) B धान्यैंकुरुवरा, यत्र, रेखां (for तेषां). BB येत्र B,BB लघुतमं.
192 a J, B -वर्त्तिकाद्याः. B,BB -स्तित्तिर-
b J -मंजू- (for -मण्डू-), कथिताः B -मडूक- (for -मण्डूक-) BB -मंजूकरूपा
M, C another reading द्रव्यवयोऽनुयोगात् .
193 a J मौदकस्थलजानां B औदकस्थजलीनां तु BB अंदकस्य जलानां तु.
194 a Title J अथ तित्तिरः, BB अथ तित्तिरिं B -र्णलदो (for -र्णदो) BB तित्तिरो-
195 a Title J, BB अथ वटेरो B अथ वटेरः M, C another reading वटेर.
J वत्तारो-, B वार्त्तारो-, BB वात्तारो-
b J बान्यस्तलुल्या वर्त्तिका स्मृताः BB बल्यः स्यतोल्मा वर्त्तिका
196 a B हिम, याही (for ग्राही) J -प्रदीपः
b J inserts (after 196b) रूक्षो वह्निप्रदः परं इति वा पावनः पांसुल.
197 a J ग्राही वह्नीप्रदीपनः (for the post half) BB वह्निप्रदीपकः B omits this line.
b BB पौड्रक B omits this line.

दर्भिरो रक्तपित्तघ्नो हृदामयहरो हि सः ।
शीतलो रुचिकृद्बल्यः पथ्यदः शीघ्रपाचकः ॥ १९८

अथ कपोतः ।

कपोतको गुरुः स्निग्धो रक्तपित्तानिलापहः ।
संग्राही शुक्रलः शीतः सुस्वादू रुचिकारकः ॥ १९९

अथ मयूरः ।

मायूरं पाचितं मांसं घृते स्वोपस्करान्विते ।
ईषल्लवणसंयुक्तं मरिचैलासमन्वितम् ॥ २००
मायूरमुष्णं काषायं कफानिलहरं गुरुः ।
वर्षाकाले न तत्सेव्यं दुष्टकीटादि भक्षणात् ॥ २०१

अथ हिताहितम् ।

सद्योहतं भवेन्मांसं व्याधिहारि सदाऽमृतम् ।
वयःस्थमकृशं सात्म्यमन्यथा परिवर्जयेत् ॥ २०२
वृद्धानां दोषलं मांसं बालानां बलदं गुरु ।
च्युतगर्भा गुरुर्योषिद्गर्भा गर्भवती तथा ॥ २०३
स्वयं मृतमबाल्यं स्यादतीसारकरं गुरु ।
विषान्मृतानां मांसं तु दोषत्रयरुजावहम् ॥ २०४
विहङ्गेषु पुमाञ्छ्रेष्ठः श्रेष्ठा स्त्री पशुयोनिषु ।
पश्चिमार्धो लघुः पुंसां स्त्रीणां पूर्वार्धमादिशेत् ॥ २०५
तुल्यजातिस्वल्पदेहा महादेहेषु पूजिताः ।
अल्पदेहेषु शस्यन्ते ये स्युर्विपिनचारिणः ॥ २०६

---

198 a J बलदो (for दर्भिरो), हीमः (for हि सः)
b N, C शीघ्रपाचनः, BB पथ्यादेः, B पथ्यदो.

199 a Title J, B अथ कपोतकः. J, B, BB गुरु
b J, BB सुस्वादु, B सुस्वादुः

200 a J मायूर, मांस J, BB सोपस्करा-, B चोपस्करा B मयूरं
201 a J, B, BB मयूरोष्णो कषायश्च कफानिलहरो गुरु. ।
b J सेव्य BB दुष्टाकीरा, भक्षके
202 a J, B व्याधिवारि विषामृतं, BB व्याधिचार विषामृतं (for the post half)
b J वयस्थ- BB वयःस्थमत्कृशं BB पयमकृशं शात्स्यमथवा corrupt.
203 a J, BB दोषदं. BB वहदं (for बलदं). B omits this line
b BB omits this line
204 a J स्वादति-, B स्यादाती- B गुरुः BB omits this line.
b J विषांबुरुङ्मृतानां तु. B, BB विषावुरुङ्मृतानां तु (for the prior half)
B दोषचरुगावहं BB दोषत्रयं तु पोवह

चेष्टावतां वरं मांसं हृद्यं रुच्यं लघु स्मृतम् ।
देहमध्यं गुरु प्रायः सर्वेषां प्राणिनां मतम् ॥२०७

पक्षक्षेपाद्विहङ्गानां तदेव वरमुच्यते ।
गुरूण्यण्डानि सर्वेषां गुर्वी ग्रीवा च पक्षिणाम् ॥२०८

ये मृगा विहगास्तोय दूरावासप्रचारकाः ।
तेऽनभिष्यन्दिनः सर्वे विपरीता अतोऽन्यथा ॥२०९

जलानूपभवाः सर्वे जलानूपचराश्च ये ।
गुरुभक्ष्या गुरुतरं तेषां मांसमुदीरितम् ॥२१०

धान्योत्पत्तिप्रचाराणां लघु स्याल्लघुपक्षिणाम् ।
उरुस्कन्धोदरं मूर्धा पादौ पाणी कटी तथा ।
हृष्टित्वग्यकृदन्त्राणि गुरूण्याहुर्यथोत्तरम् ॥२११

ग्राम्यं मांसं वनजमथवाऽनूपजं वा विलौकं
श्वेतं पीतं हरितमरुणं पाचितं सूपकारैः ।
तप्तं शून्यं सरसमधुरं स्वेदितं वारितं वा
यस्य प्रायो यदभिरुचितं स्तूयते तेन तद्धि ॥२१२

भवतादिमांसपर्यन्तं सर्वमुक्तं मया भृशम् ।
अथ मत्स्यभवा भक्ष्या उच्यन्ते सप्तमोत्सवे ॥२१३

इति श्रीमन्नरवैद्यमल्लयात्मजक्षेमशर्माविनिर्मिते क्षेमकुतूहले ग्रन्थे
मांसप्रशंसनो नाम षष्ठोत्सवः ॥ ६ ॥

---

२०७ a B चेष्टावता. B, BB परं (for वरं).
२०८ b BB गुरुण्यंडानि.
२०९ a J ये मृगा ये विहंगास्तेयदूरा वा प्रचारकाः । B -स्तेय-, BB -स्तोया
b B, BB तेवाभिष्यंदिनः B ततो- (for अतो-).
२१० a J याः (for ये). B जल-
b J -भक्षा B -भक्षामक्षतरं
२११ a B -विचाराणां (for -प्रचाराणां)
b B पदौ. B, BB पाणि
c BB यकृदं त्राणि. J, B, BB गुरुणोह यथोत्तरं (for the post half)
२१२ a B -जन- (for -जम-) BB निजं वा (for विलौकं)
b B हरितरुणं, सुपकाकैः
c B, BB तप्तं, IV, C another reading तप्तं (for तप्यं) BB, सूतं, B भून्यं.
B, वेदितं, BB वदितं IV, C another reading वर्णितं (for वारितं)
d J, B प्रायं, BB प्राये BB मुच्चि-, IV, C another reading सिद्धि (for तद्धि)
२१३ b B मत्स्यभवाः भक्षानुच्यंते J सप्तमोत्से

## अथ सप्तमोत्सवः ।

### अथ मत्स्यमांसप्रकारः ।

मत्स्यखण्डानि संगृह्य क्षालयेत्प्रथमं जले ।
ततो वेसनतक्राभ्यां बहुशः क्षालयेत्पुनः ॥ १

### अथ गन्धनाशनम् ।

हरिद्राशुण्ठिधान्याककटुतैलैर्विमर्दयेत् ।
प्रक्षाल्य हिङ्गुना लिम्पेद् गन्धस्तेनोपशाम्यति ॥ २

### अथ मत्स्योत्तमरन्धनम् ।

तप्ततैले क्षिपेत्क्षाल्यं कासमर्दं सहिङ्गुकम् ।
भृष्टं मत्स्यं सलवणं तक्रं क्षिप्त्वा पुनः पचेत् ॥ ३
अर्धपक्वे क्षिपेदाम्रसिद्धचूर्णं सनागरम् ।
दग्धं हिङ्गु विनिक्षिप्य साधयेन्मत्स्यमुत्तमम् ॥ ४

### अथ मत्स्यप्रलेहः ।

मांसप्रलेहवत्कार्यैः प्रलेहो मत्स्यसंभवः ।
आदौ तैले खरे पक्वं सर्वमन्यद्धि पूर्ववत् ॥ ५
वर्णस्य करणे देयं पूर्वोक्तं द्रव्यकं हि यत् ।
उद्धूलनं सुगन्धाढ्यं दातव्यं पूर्वमीरितम् ॥ ६

### अथ मत्स्यखण्डप्रलेहः ।

सम्यक्प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम् ।
तप्ततैले क्षिपेत्खण्डं हिङ्गुसैन्धवमिश्रितम् ॥ ७

---

1 a Title BB मत्स्यमांसप्रकारः । J संगृह्य B -खंडनि- BB जलैः
b B वेशन- , ततः (for पुनः)
2 a J, B -धान्याकं , B, BB तैलं विमर्दयेत्
b BB -शामयेत्
3 a J तप्त (for तप्त-)
b B भ्रष्टं BB ततः (for पुनः)
4 a J चनागरं BB अक्ष-(for अर्ध-), क्षिपेदर्ल- N, C another reading क्षिपेदाम्लसिद्धं-
b J, B दग्धा हिंगुं N, C another reading दधि (for दग्धं).
5 a Title J, B, BB अथ प्रलेहः , B -कार्यैः
b BB -पक्वं
6 a J द्रव्यजं B तत् (for यत्) BB वर्णप्रकरणो देयं (for the prior half).
b J पूर्वसंभवं, B, BB पूर्वसंभवः, N पूर्वमीरितम् .

प्रलेहविधिवत्साध्यो मत्स्यखण्डप्रलेहकः ।

अथ मत्स्यपिष्टिका ।

गतत्वक्कण्टको मत्स्यो वेसवारेण संयुतः ॥८
शिलायां पेषितो भूयः प्रोच्यते मत्स्यपिष्टिका ।
तैले विपाचयेत्पश्चाच्चतुर्थांशाम्लसंयुतम् ॥९
वेसवारेण च युतं शिलायां पेषयेत्पुनः ।
अनया पूर्ववत्कार्या मांसस्येव प्रकारकाः ॥१०
वटिका वटकाद्याश्च सूपकारधियोचिताः ।

अथ मत्स्यपूरणम् ।

तक्रेण स्विन्नं मत्स्यस्य खण्डं प्रक्षाल्य पेषयेत् ॥११
बीजपूरार्द्रमरिचहिङ्गुसैन्धवजीरकैः ।
संयुक्तं कटुतैलाढ्ये घृते पक्वाऽथ चूर्णयेत् ॥१२

अथ मत्स्यपुटपाकः ।

गतत्वक्क्षालितं मत्स्यं कदलीपत्रवेष्टितम् ।
मृदा लिप्तं पुटे पक्वं संस्कृतं दाडिमादिना ॥१३
वरो मत्स्यः पुटे पक्वो क्षीरतण्डुललेपितः ।
तविकायां पुनः पक्त्वा संमिश्रो मरिचादिना ॥१४

अथ मरगालमत्स्यः ।

करालविधिना भृष्टं मुद्गपिष्टेन लेपितम् ।
बृहन्मत्स्योदरात्खण्डं रन्धयेत्तलनादिना ॥१५

---

8 a B-सद्यो
9 a B मत्स्यः (for भूयः)
10 b J प्रकारका BB अनया illegible, कार्याः, प्रकारिकाः
11 a J-धियोतृषाः, B-धियोचिताः
 b Title B अथत्स्यपूरणं. J omits this line B, B स्विन्न.
12 a J-मरिचैर्हिंगु-
 b J तैलाढ्यै B पक्वोथ, BB पक्वेथ
13 a Title B अथ मत्स्यबुटपाकः
14 a J, B, BB यच्च मत्स्यं पुटे पक्वं (for the prior half), J, B, BB लेपितं
 b J तापिकाया, BB ताविकायां. J, BB संमिश्रं, B मिश्रितं. BB पक्वा.
15 a Title J अथ मगालमत्स्यः। B अथ मरगालमत्स्यं J कराल- B भ्रष्टं.
 b J, BB-दरं-(for-दरात्-) J, B, BB-तलनादिकं.

अथ रोहितः ।

रोहितोदरखण्डाश्च कासमर्दैन मर्दिताः ।
कटुतैलपरिमृष्टा हिङ्गुसैन्धवयोजिताः ॥१६
शकलं पिष्टसंभूतं रोहितं दधिमर्दितम् ।
वेसवाराञ्वितं पाच्यं प्रलेहविधिना भृशम् ॥१७

अथ गुणाः ।

रोहितस्योत्तमं देहं प्रलेहेनावलेहितम् ।
सोऽश्नातीह नरः पूर्वजन्मवैनायको ध्रुवम् ॥१८
रोहितः प्रवरो मत्स्यो नातिपित्तकरो गुरुः ।
वातहा पुष्टिदो हृद्यः स्निग्धः पथ्यो समीरिणाम् ॥१९

अथ पालाशिमत्स्यः ।

पालाशिखण्डं तिलतैलयुक्तं विपाचितं सैन्धवकासमर्दैः ।
हिङ्ग्वार्द्रधात्रीफलचूर्णकीर्णं नवं नवं रोचकमातनोति ॥२०
पालाशिर्बलदा वृष्या वातहा पित्तकृत्सरा ।
गुर्वी कफकरा चोष्णा मेदःशुक्रविवर्धिनी ॥२१

अथ पाठीनः ।

पाठीनः खण्डितः शक्लैर्वेसवारसमन्वितः ।
कटुतैले परिमृष्टो हिङ्गुतक्रेण योजितः ॥२२
पाठीनः कफकृद्बल्यो निद्रालुर्वातनाशनः ।
मांसाशी वातरक्तस्य कारकः शुक्रधारकः ॥२३

---

16 a Title J, B अथ रोहीतः (BB ता). BB काशमर्दैन B खंडानि, अर्दिता
b J कटुतैलं. BB -मृष्टाः J, BB -संयुताः (for -योजिताः).
17 b J -न्वित
18 a Title J अथ मुंडः, B, BB अथ मुंडं improper. B, BB देह.
b J -नायक B सर्वजन्म-
19 a J omits this line. B प्रवलो BB रोहीताद्यवरो.
b B, BB स्निग्ध. B समीरणं BB बलहा (for वातहा), पथ्य. J omits this line
20 a Title J अथ पालाशी (B सि) मत्स्यः BB अथ वालासमत्स्यः B पालासि, BB वालाशि
b J रोचने- (for रोचक-)
21 a J पालाशीबलदा, B पालाशि बलदो BB पावाशि B वृष्यो, -सरः.
b J -विवर्धनी. B, BB मेद. BB चोष्ला (for चोष्णा).
22 a B खंडिता, शक्ले वेस-
22 b J रक्तपित्तस्य, शुक्रकारकः. B कारको, BB कारका BB मांसाशं.

अथ मङ्गूरिका ।

मङ्गूरी मुण्डरहिता कटुतैले सुभर्जिता ।
मणिमन्थनिशायुक्ता हिङ्गुना धूपिता च सा ॥२४

मङ्गूरी वातहा पथ्या रुच्या वृष्या बलप्रदा ।
अग्निसन्जननी हृद्या तद्वद्युक्ता च मृङ्गिका ॥२५

अथ गुण्डी ।

पुच्छशीर्षेण रहिता कासमर्दविमर्दिता ।
हिङ्गुतैले च संतप्ता गुण्डीमत्स्यस्य खण्डकाः ॥२६

गुण्डी वातहरा बल्या वृष्या पथ्याऽग्निवर्धिनी ।
सुरुच्या शुक्रदाऽत्यर्थं किञ्चित्कफकरा सरा ॥२७

अथ मत्स्यमण्डकम् ।

मत्स्यस्य पिष्टिकां कृत्वा पर्णस्थां मण्डकाकृतिम् ।
आधारेण समुत्स्विन्ना संयुक्ता धूलनेन तु ॥२८

अथ मत्स्योण्डरी ।

कासमर्दीयचूर्णेन मत्स्यपिष्टीं नियोजिताम् ।
भर्जितां कटुतैलेन कुर्यान्मत्स्योण्डरी च सा ॥२९

---

24 a J मंजू (for मङ्गूरी), B,BB मगूरी B कटुतैलेन भर्जिता N,C another reading कटुतैलासुरीयुताः.
b B - शिला - (for -निशा-), BB मानीमंथ.

25 a B मंजूरि
b J, B and N, C(another reading) श्रृंगिका (for मृङ्गिका).

26 a Title J,B,BB अथ गंडी J कटुतैले सुभर्जिता (for the post half).
B, BB पुछ-, B कासमर्द्दविमर्द्दितां J अग्निसंजनना हृद्या तद्वद्युक्ता कासमर्दविमर्दिता
b J repeats $24^b$ B, BB सातप्ता, गंडी, खंडिका. J वसातप्ताः (for च संतप्ता), गंडी.

27 a J, B, BB गंडी. BB omits वातहरा submetrical
b BB किंचित्ताथ्याकरा B स्मृता, BB सदा (for सरा).

28 a J, BB पर्णस्था. B, BB पिष्टिका J मंडकाकृतिः (BB ति).
b J, BB आस्थारेण. J, B -स्विन्नं. J, B, BB संयुक्तं.

29 a B कासमर्द्दीय-, J कासमर्द्दपि- BB कासमर्द्दीय. J, BB -पिष्टि.
B मत्स्यरिष्टी J, B, BB नियोजिता
b J, B भर्जिता. BB कुर्यान्मासोडरी च सा (for the post half.

अथ सूक्ष्ममत्स्याः ।

भर्जितास्तिलतैलेन सर्वसंभारसंभृता ।
सूक्ष्ममत्स्याः स्वादुरसा दोषत्रयनिबर्हणाः ॥ ३०

परं सूक्ष्मास्तु ये तेषु सर्वे ते पुंस्त्वनाशनाः ।

अथ मत्स्यसामान्यगुणाः ।

मत्स्या बलप्रदा वृष्या गुरवः कफपित्तलाः ॥ ३१
उष्णाभिष्यन्दिनः स्निग्धा बृंहणाः पवनापहाः ।
ह्रदोद्भवा बलकरा न तु स्वल्पजलोद्भवाः ॥ ३२
हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
मधौ ग्रीष्मे च काले च नदीयौऽथ तडागजाः ॥ ३३
शरत्सु नैर्झराः सर्वे वर्षोत्थाः सर्वदोषदाः ।
मांसस्य बहुधा प्रोक्ताः प्रकारा रन्धने बुधैः ।
सूपकारधिया कृत्वा मत्स्यस्य च ततोऽधिका ॥ ३४
औदनादि हि पर्यन्तभोजनं मत्स्यमांसजनितं च यद्धुतम् ।
नाथभोजनपतेर्विमन्त्रणे तत्कथं स्वादु मयाऽनुवर्णितम् ॥ ३५
मत्स्यमांसमेवः पाको मयोक्तः सप्तमोत्सवे ।
षड्विधानां तु शाकानां प्रकारस्तदनूच्यते ॥ ३६

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले ग्रन्थे मत्स्यमांसप्रशंसनो नाम सप्तमोत्सवः ॥ ७ ॥

---

30 a Title BB अथ सूक्ष्ममत्स्यः, भर्जितास्तिल- B omits this line including title.
b B सूक्ष्ममत्स्याः BB निबर्हणा स्मृता (for the post half) submetrical
31 a J -स्त (for स्तु) B सूक्ष्मस्तु. BB च (for ये). BB सर्वेषु स्त्वनाशकानाः..corrupt.
32 b B स्वल्पांभसोद्भवाँ.
33 b B -तडागज BB नदीजा वा तडागजा (for the post half).
34 a J नैर्जराः B वर्षोत्था, BB वर्षोत्थाः. B, BB दोषदा BB शतवत्सु (for शरत्सु).
b J बहुधाः B प्रोक्ता, BB प्रोक्तोः.
c J -धिय BB मत्स्य च पचनोऽधिकाः (for the post half)
35 a J यद्धुतं B तद्धुत BB यद्धृतं B उदनादि.
b J याथ भोजननृपतेर्विमंत्रणे मया न वर्ण्यते submetrical, B माथ-, मयानुवर्ण्यते
BB माथभोजननृपतेर्विमंत्रिणो तत्कथं मयानुवर्ण्यते ।
36 b J च (for तु), प्रकारा यत्र सूच्यते (for the post half).
COLOPHON: J विरचिते (for विनिर्मिते).

अथ अष्टमोत्सवः ।

अथ शाकप्रकारः ।

पत्रं पुष्पं फलं नालं कन्दं मूलं तथैव च ।
शाकं षड्विधमुद्दिष्टं गुरुं विद्याद्यथोत्तरम् ॥ १

अथातः पत्रशाकस्य सामान्यतलने विधिः ।
ततोऽन्येषां च वक्तव्यः प्रत्येकादेरपि क्रमः ॥ २

हिङ्गुजीरयुते तैले क्षिपेच्छाकं सुशोधितम् ।
लवणं चाम्रचूर्णादि सिद्धे हिङ्गूदकं क्षिपेत् ॥ ३

इत्येवं सर्वशाकानां तलने क्वथने विधिः ।
वास्तुकं काकमाची च तन्दुलीयं पुनर्नवा ॥ ४

चुञ्चुकं नालिका पाठा पच्यन्तेऽनेन तद्बुधैः ।
कासमर्दा च मेथी च पुन्नाटं चणकोद्भवम् ॥ ५

रसार्द्रं त्वम्लरहितं पक्वं सम्यग्विचक्षणैः ।
एवं वार्ताककूष्माण्डपटोलादिफलेष्वपि ॥ ६

तलने विधिरुद्दिष्टो विशेषो यः स उच्यते ।
तप्ततैले क्षिपेच्छाकं वास्तुकादिसुखण्डितम् ॥ ७

लवणं तोयमात्रं च क्षिप्तं सिद्धेऽर्धमात्रकम् ।
सधान्यवेशनं तक्रे गालितं क्वथितं क्षिपेत् ॥ ८

---

1 a Title J, BB अथ शाकप्रकारः T, B, BB शिरसिजं (for मूलं) N, C a.r. शिरसिजं तथा
2 b B वक्तव्यं
3 a J छिपेच्छाकं, BB क्षिपेशाकं
4 a B कथितो (for क्वथने).
  b J वास्तु च (for वास्तुकं). B, BB वास्तूकं BB -मरि (for -माची)
5 a J चिंचुकं, तन्येते (for पच्यन्ते). B, BB तन्यं तेम्लेन corrupt BB विद्युकं (for चुञ्चुकं), पाठी
  b J, B कासमर्दीय (BB म). B, BB transpose च and मेथी. J, B, BB पुन्नाट
6 a J रसार्द्रं. J, B -विचक्षणः BB रसार्द्रत्वेन सहितं (for the prior half)
  b J, B वार्ताक- (BB कु-). B कुष्मांडं
7 a BB -द्दिष्टे
  b J, B -छाकं. BB क्षिपेशाकं, वास्तूकादि-
8 a. BB सिद्धेर्धमात्रके
  b J, B -वेसनं BB सुधान्य-

ततः शुण्ठीं जीरकं च हिङ्गुं दत्त्वाऽवतारयेत् ।
इत्थमेवापरस्यापि वर्णस्य करणे यदि ॥९
तत्सर्वं स्वेच्छया देयं वर्णकृत्प्रथमं स्मृतम् ।
एवं यत्कठिनं शाकं कषायं कटुतिक्तकम् ॥१०
तदुत्स्वेद्याम्बुना पूर्वं तक्रेण तदनन्तरम् ।
तप्ततैले विनिक्षिप्य रन्धयेच्च यथेच्छया ॥११

इति सर्वशाकसामान्यविधिः ।

इति वृन्ताकम् ।

सर्वासां शाकजातीनां वृन्ताकं शाकनायकम् ।
अतः शाकक्रमं त्यक्त्वा प्रथमं नायकं वदेत् ॥१२
भोजनं धिगवृन्ताकं वृन्ताकं धिगवृन्तकम् ।
सवृन्तं धिगतैलाढ्यं तैलाढ्यं धिगरामठम् ॥१३
वार्ताकं कलितं सुवृन्तसहितं संस्वेदितं काञ्जिके
शुद्धेऽम्ले घृतधान्यकार्द्रकनिशासंपर्कितं पाचितम् ।
साआरं मरिचावचूर्णितमथो तैलेन हिङ्ग्वा लस-
द्वासं दारुमयेऽपि पुंसि कुरुते घ्रातं क्षुधाबोधनम् ॥१४

---

9 b B, BB इच्छामे- (for इत्थमे) BB विधिः (for यदि)
10 a B, BB स्वेछया.
11 a B तदुत्स्वेदांबुना.
b J विनिःक्षिप्ये. B यथेछया BB इति सर्वसाक-
12 b BB शाकांतरं
13 a B धिग्विंताकमवृंतकं corrupt. BB धिग्भोजनमवृंताकं (for the prior half.), वृंतकं (for वृन्ताकं).
14 a J, B, BB वार्त्ताकं. J संस्वेहितं BB सुवृत्तवल्लितं
b J शुक्तोच्युतधान्यकार्द्रकनिशासंपर्कितं submetric. B मुक्तोदप्लुत BB भुक्तोदंवुत (for शुद्धेऽम्ले घृत-) corrupt.
c J, B तैलं तु (for तैलेन). BB हिंग्वायुतं
d J घात्वा धिकं वृतकं (for घ्रातं क्षुधाबोधनम्). BB दत्तं (for द्वासं). B क्षुधाबोधिकं BB नित्यं क्षुधाबोधितं (for घ्रातं क्षुधाबोधनम्).

वृन्ताकखण्डा यदि तेऽत्र संवृतास्तैलप्लुप्ता हिङ्गुरसेन युक्ताः ।
मरीचधूली परिधूसराङ्गा भवन्ति पुण्योदयराजपुंसाम् ॥१५
हरितं त्वाम्रवार्ताकं कटुतैले सरामठे ।
सिद्धं मरिचसंबद्धं कोष्णमेत द्रुचिप्रदम् ॥१६
वार्ताककर्त्तला लिप्ताः शुण्ठीधान्यकजीरकैः ।
घृते भृष्टाः समरिचा । हिङ्गुधूपेन धूपिताः ॥१७
सवृन्तवृन्ताकतुरीयखण्डं सरामठं तप्तघृते सुपाचितम् ।
ससैन्धवं चुक्रकशाकसंयुतं सपोलिकं पूर्वजपुण्यदापितम् ॥१८
वृन्ताकं वृन्तसहितं कृत्तं जालिकसंयुतम् ।
पक्वमाम्रयुतं स्वाद्ये लालिजिह्वान्तरे स्थितम् ॥१९
प्रमृष्टतण्डुलसमीकृतनालिकेर -
पिष्टैः सहैव मरिचेन समेलकेन ।
वार्ताकमुत्तमघृतैरनुपाचितं यत्
सिन्धूदरानलमिवानलमातनोति ॥२०
खिन्नार्धवृन्तवृन्ताकं कर्पूरेण विपाचितम् ।
जीरव्यवेसवाराढ्यमाम्लवर्जैः सहाशितम् ॥२१

---

15 a J वृताक-, J,B ते (for तेऽत्र) BB पचिते (यदि तेऽत्र), -तैलप्लुता, युक्ता.
b J,B मरीचि. J,B,BB पुव (for -राज-).
16 a J,B,BB साम्लवार्ताकं तैलकटु
b BB कोम्लमे - (for कोष्णमे-). J -प्रद.
17 a J -कर्त्तोला. J,B,BB लिप्ता. B वार्त्तावकक कर्त्तला, BB वार्त्ताकवर्तिका.
b J भृष्टा. J,B,BB सूपधूपेन B भ्रष्टा. BB समरिच . B,BB धूपिता.
18 a B, BB -खंडितं (for -खण्डं). J omits from 18 upto 38.
b B ससैधवं, BB ससैंधवं BB -शात्स्त- (for -शाक-).
19 b BB-मात्रं- (for-आम्र-). B,BB लालजिह्वांतरे.
20 a BB-समाकृत-
c B य (for यत्), BB यस्मि
d B लिसधूदके- (for सिन्धूदरा-), BB सुंदरा-
21 a BB कचरेण
b B सहशितं BB -वेसवाराढ्यमाम्लवर्जैः सहाशितं.

वृन्ताकं फलमाहृतं सुकलितं शस्त्रेण तन्नारिणि
क्षिप्तं तैलविपाचितं नवदलं जम्बीरनीरान्वितम् ।
हिङ्ग्वार्द्रेण सुवासितं बहुरसं सिन्धूत्थसंधूलितं
भोक्त्रा केन न निन्दितं बहुगुणं सौधं जलं दुर्लभम् ॥ २२

अकृत्तवृन्तं वृन्ताकं चतुर्धार्धस्य खण्डितम् ।
वेसवारेषणाहिङ्गुतक्रक्वाथेन पाचितम् ॥२३

अङ्गारपक्वं वार्ताकं क्षोदितं घृतयोजितम् ।
सैन्धवभृष्टबाह्लीके धूपितं स्याद्भिटित्रकम् ॥२४

त्वग्वृन्तगतवृन्ताकं पुटपाकेन पाचितम् ।
सैन्धवेनाज्यहिङ्गुभ्यां मिश्रितं रुचिकारकम् ॥२५

सुस्विन्नवृन्ताकफलं भृशाग्निना संक्षोदितं तत्तु न नालवर्जितम् ।
सुवासितं राजिकसैन्धवान्वितं विमर्द्य दध्ना परिवेष्टितं ध्रुवम् ॥२६

निर्धूमानलपाचितमात्रं वार्ताकमुज्झितं बीजैः ।
आर्द्रकनिम्बुकसैन्धवस्नेहैरालोडितं रुचिं धत्ते ॥२७

वृन्ताकं स्वादुतिक्तोष्णं कटुपाके च पित्तलम् ।
रुच्यं वातहरं हृद्यं दीपनं शुक्रलं लघु ॥२८

---

22 a B, BB सुदलितं. B वस्त्रेण BB सस्त्रेण.
b BB -चुक्रान्वितं (for -नीरान्वितम्).
c B-संधूतं (for -संधूलितं) BB सिंधूस्थ-
d B सैंधं BB सौजं, भोक्ता (for भोक्त्रा)
23 a B, BB अकृंतवृंत B चतुर्धाधस्तु BB चतुर्द्धायस्तु
b B वेषवारेण हिंगु च (for the prior half), क्वाथे BB वेषवारोहण-
24 b B -भ्रष्ट-, स्याद् भेवत्रिकं BB स्याहरित्रकं.
25 a B नृग्दंतगतवृंताकं क्षोदितं घृतयोजितं BB दत्वा वृतंकवृताकं (for the prior half)
b B -हिंग्वाभ्यां.
26 a B तत्तनु, BB तक्र तु (for तत्तु न)
b B परिवेषितं
27 a B -मानिल- (for -मानल-). BB -मा (for मात्रं), N -मात्रं BB बीनं (for बीजैः)
b B, BB -निंबु- (for -निम्बु-) क सैंधवाक्ते-. B -स्नेहे-
28 a B, BB तीक्ष्णोष्णं

अपरं श्वेतवार्ताकं कुक्कुटाण्डोपमं फलम् ।
कुष्माण्डबीजगुणं किंचिदर्शसां नाशनं परम् ॥ २९

वह्नेर्दीप्तिकरं परं रुचिकरं गुल्मापहं पाचनं
प्लीहानं च शिरोरुजं विजयते जीर्णज्वरं कामलम् ।
हन्त्या वातकफामरोगनिचयं मूत्रग्रहं चाश्मरीं
वृन्ताको मृदुवह्निना सुपचितः पुंभिः सदा सेव्यते ॥ ३०

अथ बिम्बफलम् ।

दलितं तलितं सरामठं नवबिम्बीफलमात्तसैन्धवम् ।
मरिचोद्भवचूर्णसंयुतं घृतपाकेन करोति रोचनम् ॥ ३१

बिम्बीफलं सकलमेव घृते निधाय
तप्ते ससैन्धवमिदं मुहुरुत्क्षिपेच्च ।
सोपस्करं क्वथितमत्र निधाय तक्रं
वाग्धारयेवदति च दीपनमेव वह्नेः ॥ ३२.

बिम्बीफलार्धकलितं हिङ्गुसैन्धवमिश्रितम् ।
प्रलेहविधिना पाच्यं परिपृत्य छमत्कृतम् ॥ ३३

---

29 a B कुक्कुटांडोपमं.

b B कुष्माण्डबीत –

30 a B वह्निदीप्ति – BB omits this stanza.

b B प्लीहीनां, विजयति, जीर्णज्वराकामलं

c B सोफनिचयान् (for रोगनिचयं), मूत्रग्रहश्चास्मरी.

d B सुपचितो सेव्या सदा सर्वदा (for the post half). B inserts after 29:

वर्तुलोस्यामवर्णश्च नीलरेखाश्च कंटकः ।
तैलेन युवतो राजेंद्र वृंताकं शाकनायकं ॥
कफपित्तकरा मामाः कफपित्तकरं दधिः ।
कफपित्तकरं तैलं वृंताकं कफपित्तहृत् ॥
सास्निग्धं वर्तुलाकारं स्यामांगनोलकं चुकं ।
पुण्यहीना भुज्यंते वृंताकं शाकनायकं ॥

31 a Title B अथ बिंबीफलं, BB अथ चिंचोफलं BB – चिंचोफल.

b BB मरिज्जव चूर्णसंयुतं.

32 a BB – चिंचीफलं –

b B – क्षितच्च, BB – क्षिपेद्या

d B वाग्धारितं वदति, BB वाग्धारयो सपदि (for the prior half).

33 a BB चिंचीफला –

b B रुट्यं (for पाच्यं).

अङ्गारभर्जितं बिम्बीफलं संमोदितं करैः ।
दधिहिङ्गुयुतं न्यस्तं ससारं रुचिकारकम् ॥ ३४
तिर्यग्वा खण्डितं चार्धस्विन्नं बिम्बीफलं भृशम् ।
दधिराजिकया युक्तं सैन्धवेनानुमिश्रितम् ॥ ३५
बिम्बीफलं स्वादु शीतं रक्तपित्तप्रणाशनम् ।
स्तम्भनं लेखनं चातिविबन्धाध्मानकारकम् ॥ ३६

अथ शिम्बी ।

नैष्पावकं सुदलितं नवबीजकोशं
तप्तेन हिङ्गुजकणेन ससैन्धवेन ।
प्रभ्रष्टकल्पतिलतैलकृतप्रबोधं
मान्द्यं हरेच्च जठरान्तरवर्तिवह्नेः ॥ ३७
शिम्बी शीता गुरुर्बल्या श्लेष्मला वातपित्तजित् ।
कोलशिम्बी समीरघ्नी गुर्व्युष्णा कफपित्तकृत् ॥ ३८

अथ तोरी (तोरई) ।

निःशेषितारिवलसिरावलिकृत्तखण्डं
दण्डाहतं च मृदुपाकमवाप्यते हि ।
हिङ्ग्वाज्यतैललवणैः परिपाचितं च
कोशातकीफलमिदं मरिचेन रुच्यम् ॥ ३९

---

34 a BB चिंचीफलं.
b B न्यस्तं, BB न्यस्तां. BB दग्ध- (for दधि-).
35 a B दिर्यग्वा, चोर्द्ध- (for चार्ध-) BB वोर्धस्निग्धं, चिंचीफलं.
36 a BB चिंचीफलं, -विनाशनं
37 a Title BB अथ निष्पादकं ।. BB निष्पादकं B नैष्पाकं
c B -भृत- (for -कृत-). BB प्रभृष्ट-, -प्रकृष्ट (for प्रबोधं).
d BB पाकं चरेच्च जठरानलमाशुवह्नेः ।
38 a B शैंबी
b B कोलाशिंबिः BB कोलाशिबी समीरस्य नाशिनी
39 a Title J, B, BB अथ तोरई. J -शिला- (for -सिरा-) कृतखंजखंड B, BB -शिरा-
b BB तोर्यैः (for ते हि)
c J, B हिंग्वांबुसर्पिर्लवणैः BB वज्रैस्सुसर्पिर्लवणैः
d BB मरिचं न रुच्यं.

राजकोशातकी शीता ज्वरघ्नी कफवातला ।
महाकोशातकी तद्वत्स्निग्धाऽर्शोऽनिलपित्तहा ॥४०

अथ चचेडा (चचिण्डा) ।

ऊर्ध्वेन विधिना कृत्तं बृहत्पाटोलकं फलम् ।
हिङ्गुना पाचितं तप्ते घृते सुरुचिकारकम् ॥४१
चचेण्डं कर्तलाकारं कृत्तमाज्ये छमत्कृतम् ।
प्रलेहविधिना सार्द्रं रुच्यं लवणमिश्रितम् ॥४२
श्वेतराजिकया शुभ्रं बृहत्पाटोलकं फलम् ।
पित्तघ्नं वातकृद्बल्यं रुच्यं पथ्यं हि देहिनाम् ॥४३

अथ तुम्बीफलम् ।

अलाबोश्च फलं दीर्घं घृते पक्वं सजीरकम् ।
दधिसैन्धवचूर्णेन संसिक्तं तनु खण्डितम् ॥४४
मिष्टं तुम्बीफलं हृद्यं वृष्यं पित्तापहं गुरु ।
शुभ्रं रुचिकरं प्रोक्तं धातुपुष्टिविवर्धनम् ॥४५

अथ टिण्डिसम् ।

निःशेषबीजावलिकृत्तखण्डं सहिङ्गुकं प्रोथितचारुशस्त्रम् ।
स्नेहे प्रतप्ते चलदर्विदण्डं रुचिप्रदं टिण्डिसकं सपिण्डम् ॥४६

---

40 a J कवातला, B -वातत्वा, BB -वातहा.
b J, BB तद्वत्स्निग्धा, B तद्वत्सिध्म
41 a Title J, BB अथ चचेंडा । J उवर्तेन, B अर्ध्वेन (for ऊर्ध्वेन) B -पादालक.
42 a J, B क (BB व) र्तलाकारं J. माज्येष्ट (for आज्ये) B कृत्तमाज्येन सत्कृतं
b B सार्द्रं, BB संद्रां (for सार्द्रं)
43 a B -राजिका
44 a J, B आला (BB ल) बस्य (for आलाबोश्च) B, BB सजीरके
b J, B, BB दुग्ध- (for दधि-).
45 a BB वृष्य.
46 a Title B अथ टिं (BB टि) डसकं B -कृत्य- (for -कृत्त-) BB निशेषबीज-
b B चल- (for चल-), टिं (BB टि) डसकं)
BB transposes स्नेहे and प्रतप्ते, -विंदंड.
J omits this stanza

टिण्डिसं रोमशफलं रुद्यं पित्तकफापहम् ।
सुशीतं वातलं रूक्षं मूत्राश्मरिभेदकम् ॥४७

अथ बिल्वफलम् ।

वाल्मीकसौरभ्यमृतप्रकाशं बैल्वं फलं खण्डितमेव तैले ।
विपाचितं वल्लिजचूर्णकीर्णं रुचिं विधत्तेऽभ्यवहारकाले ॥४८
कफानिलहरं स्निग्धं कषायं दीपनं लघु ।
बालं तिक्तं फलं बैल्वं वृद्धं विल्वं विबन्धकृत् ॥४९

अथ कूष्माण्डम् ।

घृते तप्ते विनिःक्षिप्य खण्डान् कूष्माण्डसंभवान् ।
बालार्कविधिना कुर्यात् प्रलेहं तलनं त्वथ ॥५०

अथ सुस्वादुसुन्दरम् ।

वेसवाराम्लतक्रेण घृते तलनपूर्वकम् ।
कूष्माण्डखण्डकं सिद्धं विदुः सुस्वादुसुन्दरम् ॥५१

अथ गुलिका ।

घृतेन गुडयुक्तेन गौडकूष्माण्डखण्डकान् ।
रन्धितान् जीरमरिचैरिमान् गुलितलान्विदुः ॥५२

अथ खण्डकूष्माण्डकम् ।

चतुरस्रायताः स्थूलाः स्विन्नाः क्षीरेण ओदिताः ।
सुपाच्याः खण्डसर्पिर्भ्यां मरिचैलादिवासिताः ॥५३

---

47 a B ढिं (BB ढि) ढसं (for टिण्डिसं) J omits this line
b J, B, BB मूत्रलं (for वातलं)

48 a J -भृत- (for -मृत-). J, BB -प्रकोशं B वाल्मीक- (for वाल्मीक-) सौरत्य.
b BB वाल्लिक- (for वल्लिज-), -कीर्णे.

49 a B कफानिलहरं BB कफाहरं निल
b J transposes बैल्वं and विल्वं. B बलं (for बालं), बिल्व BB चैव (for बिल्वं)

50 a Title B अथ कुष्मांडं. B, BB विनिक्षिप्य B खंडा, -संभवाः.
b J, B प्रलेहस्तलने (B नं) थवा (for the post half). BB -स्तलनाथवा.

51 b BB विदु B, BB सुस्वादसुंदरं

52 a J गोलु-, B गोड-, BB गोल- (for गौड-). J -कुष्मांड- B -खंडकाः -
b J -मरिचैर्युक्तान्, B गुलितान्, J गुलतलान्.

53 a Title B अथ खंडं कूष्मांडकं BB अथ खंडकूष्मांड J चतुर्हस्तायतान्
B -श्रायतान् BB -स्रायतान् J, B, BB स्थूलान् J, BB स्विन्नान्, ओदितान्
b J, BB सुपाच्यान् J मरिचैलादिवासितान्, BB मरिचैलाविवासितान् (for the post half) B -धिवासिता.

अथ भर्जितसुन्दरी ।

कूष्माण्डं गुलिकाकारं खण्डितं घृतभर्जितम् ।
हिङ्गुसैन्धवचूर्णेन संयुक्तं रुचिकारकम् ॥ ५४

अथाम्लकूष्माण्डम् ।

कूष्माण्डखण्डानि ससैन्धवानि तनूनि संमर्दितपीडितानि ।
जम्बीरनीराश्रितशुण्ठ्यादैर्भवन्ति वक्त्रेऽपि दीपनानि ॥ ५५

अथ छेल्लिका ।

कूष्माण्डत्वङ्मेवाः खण्डाः सुस्विन्नाश्चणकान्विताः ।
वेसवारयुते तैले तलयेद्वा प्रलेहयेत् ॥ ५६

अथ राजिका-आसुरी ।

खण्डं कनिष्ठिकाकारं कौष्माण्डं स्वेदपिण्डितम् ।
राजिकादधिसिन्धूत्थैर्मिश्रितं चासुरी स्मृता ॥ ५७

एवं बहुविधः कार्याः कूष्माण्डो हि विचक्षणैः ।
प्रलेहतलनस्वादुक्षारसंधानराजिकाः ॥ ५८

कूष्माण्डं बृंहणं शीतमसृक्पित्तहरं गुरु ।
बालं पित्तापहं शीतं मध्यमं कफकारकम् ।
पक्वं नातिहिमं स्वादु सक्षारं दीपनं लघु ॥ ५९

---

54 a Title B, J भर्जित (B तं) आसुरी । . J, B, BB गोलिकाकारं

55 a J कूष्मांडानि- . J, BB -पिंडितानि . B, BB मर्द्दित-
b J दीपनाच , B दीपनीवं

56 a Title J -छल्लिका, B -छालिका । . J, BB -ङ्मेवा, B -ङ्मनार्खंडाः corrupt.
b B वक्लेहयेत् BB तलयेश्च

57 a Title J, BB -राजि (BB ज) कयासुरी । B, BB कूष्मांडं J स्वेद्य-

58 b B -ओर- (for -क्षार-) BB -राजिका

59 a J लघु (for गुरु), BB गुरुः
b J omits this line. B बालं (for बालं) BB पित्ताहं, सीतमध्यं (for शीतं मध्यमं) corrupt.
c BB शीतलं (for दीपनं), लघुः.

अथ टेण्टी ।

बालं टेण्टीफलमविकलं स्विन्नमीषच्च तोये ।

स्नेहे हिङ्गुप्रणयिनि ततो वेसवारेण सिद्धम् ।

गव्यं तक्रं क्वथितनिहितं साधितं रामठेन

स्वादस्वादग्निकृतममृतं निन्दितं मोक्तुमिश्य ॥६०

टण्टिका पुष्टिदा वृष्या रुच्या वह्निप्रदा लघुः ।

हन्ति पित्तकफार्शांसि कृमिगुल्मविषामयान् ॥६१

अथ कण्टकारीफलम् ।

तोयाल्पस्विन्नबृहतीफलमल्पखण्डं

दण्डाहतं चिरविपाचितमाज्यमध्ये ।

चूर्णेन सैन्धवभवेन विमिश्रितं च

वह्निं प्रबोधयति कासनिवारणं हि ॥६२

कण्टकारीफलं तिक्तं कटुकं दीपनं लघु ।

रुक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ॥६३

अथामलकफलम् ।

अङ्गारपाकपचितानि फलानि धात्र्या

माज्येन जीरलवणेन विमिश्रितानि ।

बाह्लीकधूपपरिधूपितसौरभाणि

संधुक्षयन्ति जठरानलमुद्धतानि ॥६४

---

60 a Title J - टेटी, BB - ढोंढी, B - डोडी, J बालं (for बालं), टेंटीफल-, तोयैः
B डुंडीफल-, BB ढुंढीफल- आलितम् (for स्विन्नम्), साधुतोयं (for तोयं)
b B - प्रणयिणि, BB - प्रणयधिनि
c J, BB निहि (BB ह) ते, साधिते. BB गव्ये तक्रे
d B स्वादुःस्वाद-. BB प्रभितेतनिर्मितममृतं नींदितं
61 a J टुंटिका, B डुंडीका, BB ढुंढिका. B लघु
b BB the prior half is illegible. N and C a.r. कृमिशूलविषामयान्
62 a B तोयात्सुस्विन्न-, BB स्वगेत्व (for -स्विन्न) corrupt.
b J -माज्यनाध्ये, B -जव्ये, BB -जव्ये. BB -पाचित- (for -विपाचित-).
c J कर्णेन (for चूर्णेन), सैंधव-
63 b J कासकासघ्नं. BB -कासघ्नं, रुक्षोष्णं.
64 a J रचितानि (for पचितानि)
b J, B राज्येन (for आज्येन). B विमिश्रितानि.

प्रोक्तं धात्रीफलं वृष्यं विशेषाद्रक्तपित्तजित् ।
त्रिदोषशमनं पथ्यं ज्वरघ्नं च रसायनम् ॥६५

अथ कारवेल्लीफलम् ।

कारवेल्लीफलं मूत्रात्मकवल्लं कवल्लं भम ।
बहिर्मरकतश्यामममन्तं विद्रुमसंनिभम् ॥६६

कारवेल्लीफलं तक्रे स्वेदितं हिङ्गुमर्दितम् ।
भर्जितं नवनीतेन सैन्धवेन समन्वितम् ॥६७

विदलितमुखमीषत्कारवेल्लं कठोरं
पुलकितमिव तैले साधितं रामठेन ।
चरितमरिचचूर्णं सैन्धवेनातिपूर्णं
पुलकितरसनाग्रं लोलतामातनोति ॥६८

कारवेल्लीफलं भेदि लघु तिक्तं च शीतलम् ।
पित्तासृक्कामलापाण्डुकफमेदःकृमीञ्जयेत् ॥६९

---

65 a BB धातृ- (for धात्री-).
b B त्रिदोषसमनं

66 a Title J, BB – कारवल्लीफलं, B – कारवल्लीकं
B, BB, J कारवल्ली (J, BB ०ल्ली) फलं. B reads – कवल्लं thrice hypermetric
BB न च (for भम)
b B बहिर्मरकताकारं मध्ये. BB – श्यामं मध्ये, विमल- (for विद्रुम-)

67 a B, BB कारवल्लीफलं
b BB भार्जितं

68 a B – कारेल्लं
c B वरिच- (for चरित-)
d J, B, BB and N-C as a.r. सुललितरसनाग्रं
B लोलमतामातनोति corrupt.

69 a J, B भेदी B, BB कारवल्ली (BB ०ल्ली) B तु (for च)
J, BB तिक्तमशीतलं
b J, BB मेद B मेदक्रिमीन्.

अथ कर्कोटकफलम् ।

ईषद्विभिन्नमरिचैः परिपूर्णगर्भं -
तैलेन राद्धमथ सैन्धवजातयोगम् ।
बाल्हीकयुक्तपयसा विहिताभिषेकं
कर्कोटकीफलमिदं रुचिकृन्नराणाम् ॥७०

फलं कार्कोटकं कुष्ठकिलासारुचिनाशनम् ।
मेद्यं रुचिकरं वृष्यं कटु पाके च दीपनम् ॥७१

अथ हरितचणकरन्धनम् ।

सुहरितहरिमन्थः क्षोदक्षुण्णो नखाग्रैः
प्रथममुदकसिक्तो वेसवारेण सिद्धः ।
लवणमरिचसङ्गात्तैलहिङ्गुप्रसङ्गा-
च्छिखरयति हि भोक्तुर्जाठरं मन्दवह्निम् ॥७२

छोलाविधानकफलं परिगृह्य शुद्धं
तप्ते घृते सुपचितं क्वथितोषणाभ्याम् ।
सुसाधितं सुरभितं शुचिरामठेन
जिह्वातलं विशति नर्तति च प्रकामम् ॥७३

---

70 a Title J,B - कर्की(B र्कं)टी(B टि)फलं । B, BB - गर्भे.
b B रुद्धमथ, BB रंधामथ
c BB विहिताभिषेको

71 a J,B कर्कोट(B टि)कं BB - किलाशा -
b J मेध्यं (for मेद्यं).

72 a Title J - हरिजाइचणकं रंधनं BB - हराइकणरंधनं
B सुहरिहरिमंथः, BB - मथा. B ओधक्षुण्णो. BB post half elligible
b BB - सिक्ता
c BB - गा - (for सङ्गा) B - प्रसंग -
d B छिखरंयति, BB छसृरयति B च (for हि) BB omits हि J - जाठरं

73 a B - भिधानक - BB - भिधानं -
c BB शुभे - (for शुचि-).
d BB वर्तीति (for नर्तति) J. जिह्वानलं.

हरितेन भृतं क्वापि निर्माणच्छोलकं क्वचित् ।
कथ्यते स्थौल्यकफकृत्किंचिद्वातहरं सरम् ॥७४

अथ कार्पासफलम् ।

फलमथ दलशाकं स्वेदितं मुष्टिपिष्टं
क्वथिततिलजतैले हिङ्गुना लब्धवासम् ।
वणफलवणपत्रं स्वादुतां संदधानं
भवति रुचिदमुच्चैरम्लचूर्णेन सार्धम् ॥७५

कार्पासफलमत्युष्णं कषायं मधुरं गुरु ।
वातश्लेष्महरं रुच्यं विशेषेणास्थिवर्जितम् ॥७६

अथ करीरफलम् ।

फलं करीरस्य हि बीजवर्जितं
संस्थापितं सोदकभाजने तु ।
सुचिक्कणेन चार्द्रदिनं सुसंस्थितं
वृन्ताकरीत्या सुधिया विपाचितम् ॥७७

करीरं कटुकं ग्राहि फलमुष्णं रुचिप्रदम् ।
कफपित्तकरं किंचित्कषायं वातहृद्धरम् ॥७८

---

74 a J हिलं तेन प्रभुतं (for हरितेन भृतं); BB हिरततेन भृशं,
J निर्माणं छालकं, BB निर्माणछोलक्वाचित्
b B छोल्यकफल- (for स्थौल्यकफ-
75 a Title J, BB – कर्पासपत्रफलं। J, B फलमति BB, N-C as a.r. फलमतिदलसाकं.
b J हिँगुना, B कथित- , लब्धवासं
c J –नवणपत्रं (for -वणपत्रं BB वनफालवनपत्रं B, BB तद्दे (BB द) धानं
d J –राम्रचूर्णेन, BB –राम्रचूर्णेन निसार्धं N-C a.r. –रात्रिचूर्णेन
76 a J, B कर्पास- BB –मत्युष्णं, गुरुं
77 b B चोदक- , तेत् (for तु)
c J, B, BB सुसंधितं N-C a.r. सुगन्धितं. B, BB omits च
d J-करीरयत्या, B वृंत्ताकरीत्या, BB elligible. BB विपाचितान्
78 a J, B ग्राही
b B –पित्तहरं

अथ कपिकच्छुफलम् ।

कोमलं रोमरहितं स्विन्नमाज्ये विपाचितम् ।
सोपस्करं सवालीकं सिन्धुजेन समन्वितम् ॥ ७९

कपिकच्छुफलं वृष्यं मधुरं बृंहणं गुरु ।
स्निग्धं शीतानिलहरं दुष्टव्रणविनाशनम् ॥ ८०

अथ विषाणीफलम् ।

त्रिखण्डं खण्डितं बाल्यं फलं विषाणसंज्ञकम् ।
तप्ते हिङ्गुयुते स्वाज्ये भर्जितं सैन्धवान्वितम् ॥ ८१

विषाणं शीतलं बल्यं पित्तघ्नं रुचिकारकम् ।
पाके लघुतरं प्रोक्तं विशेषाद्विषनाशनम् ॥ ८२

अथोदुम्बरफलम् ।

फलमौदुम्बरं बालमम्लतक्रेण स्वेदितम् ।
वेसवारभृते स्वाज्ये पाचितं सैन्धवान्वितम् ॥ ८३

शीतं कषायमधुरं रक्तपित्तप्रणाशनम् ।
मूत्रकृच्छ्रहरं सम्यग्विबन्धाध्मानकारकम् ॥ ८४

---

79 a Title BB, N-C as a.r.-कपित्थफलम् ।, J, B कपिकच्छू (J च्छु) फलं
J, BB लोमसहितं (for लोमरहितं)
b BB सोपस्करं, सवालीकं
80 a J, B कपिकच्छू (J च्छु) - BB कपिछुरं -, गुरुं. N-C a.r कपित्थजं फलं
b J -निलपहं BB-वर्ज-
81 a Title J-विशालोफलं ।, N-C a.r.-विशाणीफलं ; J, BB बाल्य, विन्याक-. B-संज्ञि
b J स्वाज्य
82 a J विणपाकं, B विज्ञानं, BB विषाणं, N-C a.r. विशाणं B वात (for बल्यं).
b B मधुरं (for लघुतरं)
83 a Title J, BB अथौदुंबरफलं
84 a J कषायं, -प्रणाशनं
b J, B, BB -कृच्छ्र-, B मूत्रवर्णहरं
B omits सम्यग्

अथार्द्रकचर्चरम् ।

नापक्वं नातिपक्वं च खण्डितं त्वग्विवर्जितम् ।
वेसवारघृतक्षारैः सिद्धं पित्ताग्निवर्धनम् ॥८५

अथ कर्कटीफलम् ।

त्वग्बीजरहिता प्रौढा गुलिकाकारखण्डिता ।
तलिता सुघृते तप्ते कर्कटी वा प्रलेहिता ॥८६
विपाण्डुखण्डं घृतदुग्धराद्धं विभावितं वाल्हिकशर्कराभ्याम् ।
कृतैलवासं च कटूष्णमेतत्प्रतिक्षणं रोचकमादधाति ॥८७
कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा पक्वा पाकोष्णा पित्तकृत्परा ॥८८

अथ शमीफलम् ।

शमीफलं कोमलबीजसंयुतं तप्तोदकस्वेदितमेव केवलम् ।
प्रलेहयोगे विधिना विपाचितं सराजिकं वा दधिसैन्धवान्वितम् ॥८९
शमीफलं लघु स्वादु कुष्ठार्शःकफहृत्परम् ।
सुरुच्यं पित्तलं रूक्षं मेध्यं केशविनाशनम् ॥९०

---

८५ a Title J अथार्द्रकचर्चरं । B नकच्चं (for नापक्वं). BB omits अतिपक्वं sub meta.

८६ a Title J,B,BB अथ कर्क (BB कर्क) टी ।

८७ a J -शर्करायं B विभाजितं. BB विपाँड -, -सारं (for -राद्धं), वाल्हिक-
b BB omits च, कटुलिप्त- (for कटूष्ण-).

८८ a J मधुरं. B ग्राहिणी, गुरु.
b J पक्वोष्णा, B पक्वेष्मला. BB पित्तकरा

८९ a B कोमलं, स्वेदितमेवलं

९० a B स्वादुः, -कफकृत्- (for -कफहृत्-) B, BB अर्शो
b J मर्द्यं (for मेध्यं)

अथ भैरण्डम् ।

भैरण्डं कोमलं ग्राह्यं फलं तक्रेण स्वेदितम् ।
पाचितं कटुतैलेन हिङ्गुसार्धं प्रतापितम् ॥९१
कफानिलहरं वृष्यं रूक्षमुष्णं च पित्तलम् ।
अग्निसंजननं रुच्यं गुरु पाकेऽतिपिच्छिलम् ॥९२

अथ कुटजफलम् ।

सलिलपरिचितं मुखे कृशानोरथ मथितेन विपाचितं सुतैले ।
सुलवणसहितं सहिङ्गुवासं रुचिजनकं गिरिमल्लिकाफलं स्यात् ॥९३
कौटजं सुलघु स्वादु मृदु ग्राहि च शीतलम् ।
ज्वरहृद्रोगपित्तासृग्गुदावर्तक्षयशूलजित् ॥९४

अथ कदलीफलम् ।

सहिङ्गुकाव्ये हि कृताधिवासं मोचाफलं सैन्धवसारशालि ।
एलामरीचप्रतिवर्धयोगाग्निर्हन्ति मान्द्यं जठरानलस्य ॥९५
कादल्यं मधुरं शीतं फलं विष्टम्भि पित्तजित् ।
स्निग्धं गुरुतरं दाहक्षतक्षयसमीरजित् ॥९६

---

91 a Title B - भिंडी, BB - भेरंड, J - एरंडफलं । J एरंडं (for भैरण्डं) BB कोमलाग्राह्यं
b J, BB प्रतापितं B omits this line.

92 a BB कफाहरं निल, रूक्षमुक्तं . B omits this line.
b J - पिछलं B पाकं च पिछलं BB अग्निसंजनं, पाकेतिपिछलं.

93 a J - सुपाचितं, BB - परिणचितं (for - परिचितं)
b J, B, BB - वासे B सलवण -

94 a J मृ (for मृदु) corrupt. BB ग्राही
b J ज्वरद्य - (for ज्वर-) B - दोवर्तसमूलजित् . B, J. - गुदावर्तस्य -

95 a J - कव्ये, ह (for हि) BB शालं (for शालि)
b J, B, BB - मरीचि (B चो) - , J, B - प्रतिबद्ध -

96 a J काडल्योतं corrupt. BB विष्टम्भि
b J गुरुतर, - दाहजित् (for - समीरजित्).

अथ राजमाषादिफलम् ।

राजमाषमकुष्ठादिफलं बीजविवर्जितम् ।
पक्वं घृतेऽथ पत्रं च सर्वोपस्करसंयुतम् ॥ ९७

राजमाषं सुहृद्यं च कफपित्तहरं परम् ।
आध्मानवातकृद्ग्राहि तत्पत्रं तद्गुणावहम् ॥ ९८

अथैरण्डजफलम् ।

तक्रे संस्वेदितं पूर्वं बालमैरण्डजं फलम् ।
पाचितं तिलजे तैले सर्वोपस्करसंयुतम् ॥ ९९

एरण्डं वातजिद्बल्यं कषायं वातनाशनम् ।
आमवातहरं स्निग्धं रुच्यमुष्णं तु पाचकम् ॥ १००

अथ कोहडः ।

कोहडं क्षीरसंस्विन्नं घृते पक्वं सजीरके ।
लवणार्द्रकसंयुक्तं वेसवारेण वेष्टितम् ॥ १०१

पित्तघ्नं मधुरं शीतं रक्तपित्तविनाशनम् ।
विष्टम्भजननं हृद्यं सुरुच्यं कफदं सरम् ॥ १०२

---

97 a J राजमाषमु- BB the prior half is elligible
b J- पक्वं (for पत्रं)

98 a J, B परं हृद्यं (for सुहृद्यं च), BB परं वृष्यं.
b B-ग्राही, BB-कग्राही (for -कृद्ग्राहि).

99 a Title J, B अथैरंडफलं, BB अथएरंडजफलं B बालमेरजं.
b B सर्वोपस्कर-

100 a J, BB एरंडो J-वल्यः J, B, BB कषायः (B य), कफनाशनः (for वातनाशनम्)
b J-हर. J, BB च (for तु) B रुच्यमुष्णा BB-हरः, स्निग्धः

101 a Title J, B-कोहडः J सजीरकं J, B, BB कोमलं (BB ळ) (for कोहडं)
b J वेर्षावारेण विष्टितं B, BB-लाद्रक-

102 a B रक्तपिचिनाशनं
b JY, C a.r. रुच्यं कफहरं परम् (for the post half).

इति फलाधिकारः ।

अथ पत्रशाकम् ।

अथ वास्तुकम् ।

कृतयवसविवेचम्लानवास्तूकशाकं
क्वथितमिलिततक्रं तैलहिङ्गुप्रसक्तम् ।
लवणमरिचयुक्तं स्पष्टराद्धं सफेनं
चपलयति रसज्ञां वीक्षणादेव पुंसाम् ॥ १०३

वास्तूकं पाचनं रुच्यं लघु शुक्रबलप्रदम् ।
सरं प्लीहार्शःपित्तासृक्कृमिदोषत्रयापहम् ॥ १०४

अथ चौराई ।

आलोलितं नविनकोमलतण्डुलीय-
मुद्गान्वितं सलिलकाञ्जिकमेलके च ।
पिण्डीकृतं लवणतैलविपाच्यमेत-
न्मन्दाग्निमङ्कुरयति धृतहिङ्गुवासम् ॥ १०५

कतिपयकरमर्दकैरुपेतं नवदलकोमलतण्डुलीयशाकम् ।
तिलरसपरिपाकहिङ्गुसङ्गं लवणविपाचितमग्निमान्द्यमाथि ॥ १०६

तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ।
सृष्टमूत्रमलो रुच्यो दीपनो रक्तपित्तहा ॥ १०७

---

J इति फलवर्गः B इति फलाधिकारः corrupt.

103 a Title J-पत्रशाके,-वास्तुके B तत्र वास्तुकं । J-विवेचं- BB the prior half is elligyble

b BB क्वाथित-,-प्रतप्तं ।

c J स्पष्टरंद्धं

d J वीक्षरणादेव BB चालयति च (for चपलयति)

104 a J,B वास्तु(B स्तु)कः J,BB पाचनो. J,B,BB रुच्यो,-बलप्रदः B पाचितं.

b J,B,BB सरः B क्रमि J-देष-(for -दोष-) BB -त्रयापहः

105 a Title J-चौलाई, B-चोडई, BB-चौलाक । J,B,BB कठिन-(for नविन-)

b J काँजितके (for काञ्जिक).

d J-श्रुत-(for -धृत-) N,C a.r. स्मृतहिङ्गुवासम्

106 b BB-जोत-(for-परिपाक-), the post half is elligyble.

107 a J-कफा-, B-कफांतकृत् BB रूक्ष पित्तकफस्याजित् (for the post half)

अथ कसौंदी ।

पत्राधिका प्रथमकोमलकासमर्दी
दालीगलद्विमलतण्डुलपिष्टलिप्ता ।
सिद्धा घृतेन मरिचैरवचूर्णिता च
जायेत साऽपि रुचिसंजननी जनानाम् ॥ १०८

कासमर्दो लघुः स्वादुः कासदोषविनाशिनी ।
ग्राहिणी रक्तपित्तार्शोविषदोषहरा स्मृता ॥ १०९

अथ देवदालीशाकम् ।

देवदालीदलं तक्रे स्वेदितं खण्डितं भृशम् ।
वेसवारयुते स्वाज्ये भर्जितं हिङ्गुना हठम् ॥ ११०

देवदाली सरा तिक्ता श्लेष्मपित्तविनाशिनी ।
कुष्ठघ्नी कामलाशोषविषघ्नी च रसायनी ॥ १११

अथ पाठाशाकम् ।

पाठाशाकं गतचरदिने गव्यतक्रेण स्वेद्यं
प्रातःकाले जरणसहितं तप्ततैले विपाच्यम् ।
चूर्णं क्षिप्तं लवणसहितं मारिचं तत्र नव्यं
सर्वेभ्यस्तद्भवति रुचिदं व्यञ्जनेभ्यः प्रभूतम् ॥ ११२

पाठा कषायतिक्तोष्णा वातश्लेष्महरा लघुः ।
हन्ति श्लेष्मज्वरच्छर्दिकुष्ठातिसारहृद्गदान् ॥ ११३

---

108 a Title J, BB -कसौं (BB सौं) दी ।
b J, B पूली- (for दाली-) BB कुत्ताजल- (for दालीगल-)
c B -चूर्णितानि BB सिद्धे घृते मरिचैरपि-
d BB -संजनना

109 a J, B, BB कं (BB क) ठ्या, N, C a ४ कण्ठ्या (for स्वादुः) BB काश-
b J स्मृताः, -पित्तास्ते- (for -पित्तार्शो-)

110 a J स्वेडितं, भृशां B -फलं (for -दलं).

111 a J, B omit रि

112 a J, B -वर- (for -चर-) J सिद्धं (for स्वेद्यं)
b J -सहितं BB विपाच्यं
c B गव्यं (for नव्यं)
d J रुचिदं BB सर्वेभ्यं सद्भवति, व्यंजनेभ्य

113 a J, B लघु BB -तोष्णोष्णा

अथ शाकत्रयपरस्परवक्रोक्तिकाः श्लोकाः ।

अथ पोथिकोपहासः ।

द्विधाऽहं षड्रसोपेता किमन्यैर्व्यञ्जनादिकैः ।
तण्डुलैः शलन (?) व्याजैर्हसत्येषा हि पोथिका ॥ ११४

वटपत्रवद्दलपत्रिका परितप्ततैलप्रतापिता ।
नवहिङ्गुवाससुवासिता परिमोक्तृचित्तविकाशिका ॥ ११५

सुतप्ततैलतापिता सुवासहिङ्गुवासिता ।
घनाम्लतक्रपाचिता सुपोथिकाऽद्य भर्जिता ॥ ११६

पोथिका शीतला बल्या श्लेष्मला वातपित्तहा ।
पथ्यदा दोषहा रुच्या निद्रापुष्टिकरी स्मृता ॥ ११७

अथ शतपुष्पोपहासः ।

एकैवाहं बहुरसा स्ववासेनैव वासिता ।
शतपुष्पा वदत्येतच्छत्रं दत्त्वा जिगीषया ॥ ११८

भर्जिता कटुतैलेन सिन्धुजेनावमर्दिता ।
शतपुष्पा हसत्येषा परवासव्यपेक्षकम् ॥ ११९

शतपुष्पा कटुः स्निग्धा तीक्ष्णोष्णा श्लेष्मवातहा ।
रुच्या नेत्ररुजं हन्ति बस्तिकर्मणि शस्यते ॥ १२०

---

114 a Title J – शाकपरस्परवक्रोक्तिश्लोकः । B वक्रोक्तिश्लोकाः ।, BB – शाकपरस्पर–
J – पोइकोपहासः ।, B – पोदिकोपवासः ।, BB – पायिकोपहासः ।. J – व्यंजनादिकैः
b J, B, BB omit ?. B तंडुलैजनलेन. B omits व्याजै–. BB – शनलव्यैर्ह corrupt

115 a J, BB – पाकिका (for – पत्रिका) J – प्रपाचिता, BB – पाचिता (for – प्रतापिता).
b J the prior half is elligible. – भोक्त –, B – मोक्तु – BB omits the past half and reads 116b hyper-metric

116 a BB elligible.
b J वन – (for घना –) J, B, BB सपोतिका – . BB reads 115b.

117 a J, BB पोइका
b B पथ्या (for पथ्यदा), दोषापहा. J – पुष्टिकरा

118 a Title J – शतपुष्पोप्रहासः ।
b J वदत्स्मेत्रेछत्रं, B वदत्स्मेत्रं, BB वदत्येमे छत्रं

119 a BB भर्जिता
b J – मपेक्षको (for – व्यपेक्षकम्) B, BB – मपेक्षकं

120 a J, B, BB कटु J, BB तिक्तोष्णा

अथ मेथिकोपहासः ।

स्ववाससुवासिता चाहं शतपुष्पा यदीरितम् ।
किं तथा क्रियते भृत्या स्वेनैव स्वोपभोगिका ॥ १२१

मद्वासेनैव सकलं भोजनागारमङ्गणम् ।
वासितं मेथिका वक्ति किं स्ववाससुवासिता ॥ १२२

मेथीशाकं पर्यसि विधृतं स्वेदितं पीडितं हि
प्राज्यं स्वाज्ये जरणसहितं मेलितं भर्जितं हि ।
कासोच्छ्वासं प्रसृतमधिकं कर्षितो जाङ्गलि-
र्येन प्राणं सुबहुगुणितं भेजे भूयोऽपि भूयः ॥ १२३

मेथिका दीपनी हृद्या बद्धविट् कृमिशुक्रनुत् ।
रूक्षोष्णं तत्फलं कासानिलश्लेष्मवमीञ्जयेत् ॥ १२४

अथ काकमाचिका ।

काकमाचिजनितं मृदुशाकं वेसवारमिलितेन सुवासम् ।
तप्ततैलतपनेन सुपाकं केन प्राप्य न कृतं सुखहासम् ॥ १२५

काकमाची बहुगुणा कटुतिक्ता रसायनी ।
चक्षुरोगहरा हिक्कावमिहृद्रोगनाशिनी ॥ १२६

---

121 a Title J - मेथिकोपहासः । B युदीरितं BB वहं (for चाहं).
b J आपते (for क्रियते), B कृयते

122 a J, BB वासिकं (BB ते) J, B, BB - स्ववासिता.

123 a BB मेथिकाकं, omits हि N, C a.r. पिण्डितम्.
b J, BB च, B वा (for हि). BB प्राज्य, मेलेतं.
c J, B वासोच्छ्वासं; संविधृत-, BB विसृत- (for प्रसृत-).; सर्पिजा (for कर्षितो)
d B, J - गणितं. BB येन B भेक्षितं चोपभुवः (for भेजे भूयोऽपि भूयः)

124 a J क्रमि, B क्रिमि. BB - शुक्रतु, दोपोनी
b J transposes अनिल and श्लेष्म. J, B - वमि-, BB श्लेष्मावमी
B, BB कासा (BB सा) - . BB तत्पलं.

125 a Title BB - काकमाचिका । . BB - जनिरं
b J, BB - हास्यं B - पतितेन (for - तपतेन), BB - पतनेन

126 a B रसायिनी.
b J कुक्षि- (for चक्षु-). B - रोगप्रदा

अथ सेहुण्डः ।

सेहुण्डं दलितं पत्रं स्विन्नं हस्तेन पीडितम् ।
जीराज्येनाधिकं पुष्टं माणिमन्थेन मर्दितम् ॥१२७

सेहुण्डो रोचनस्तीक्ष्णो दीपनः कटुको गुरुः ।
शूलमष्ठीलिकाध्मानगुल्मशोथोदरं जयेत् ॥१२८

अथ पवाडः ।

द्विपत्रजातं प्रपुन्नाटशाकं सुस्वेदितं पीडितगाढबाढम् ।
ससैन्धवं राजिकया सुदध्ना विमर्द्य सेव्यं क्वथितेऽथ पाट्यम् ॥१२९

प्रपुन्नाटो लघुः स्वादुर्वातश्लेष्महरः परः ।
तिक्तः कण्ड्वामयहरः श्वासकुष्ठकृमीञ्जयेत् ॥१३०

अथ लुणियाशाकम् ।

शाकं लौणिकसंज्ञकं सुदलितं तप्ते घृते तापितं
हिङ्ग्वार्द्रेण विमिश्रितं सलवणं तक्रेण संपाचितम् ।
नो वा स्वेद्यमिदं सुहिङ्गुसहिते तैले सुधाऽधारितं
स्विन्नं तण्डुलसंयुतं सलवणं तक्रैर्विना पाचितम् ॥१३१

लौणिकं गुरु शीतोष्णं रूक्षं विष्टम्भिकृत्सरम् ।
दोषकृन्मधुरं पाके वातकृत्त्वम्लपित्तलम् ॥१३२

---

127 a Title BB - सेहुंडं । . B सेहुंड वलितं . BB omits पत्रं, reads सम्यक् after स्विन्नं.
b J, B जुष्टं (for पुष्टं).

128 a BB-तीक्ष्ण
b J - आध्मानन- , B शूलमाष्टी-

129 a Title B, BB - पवाड . J, BB बाढ (for गाढ). B पीडितबाढवाढं BB पुत्र (for पत्र)
b J, B सुदध्नि BB ससैंधवे, सुदध्नि दिमर्दे corrupt.

130 a B, BB लघु N, C स्वादुः वात
b J कण्ड्व्यापहः श्वासकास - corrupt.

131 a Title J - लोणिकाशाकः, B, BB - लोणियाशाकं N, C a r भर्जितं (for तापितं)
b J तक्रैर्विनापाचितं B, BB हिंग्वार्द्रेण
c J omits this line B - सहितं . B, BB सुधाधारितं BB स्वेद्यमिदं.
d J omits this line. B तक्रैर्विना BB स्विन्नं (for स्विन्नं)

132 a B शीतोष्ण, रुक्ष.
b J मधुरा, - कृत्त्वाम्ल-.

अथ चाणकशाकम् ।

सुकृतं चाणकं शाकं तप्ततैले सुपाचितम् ।
सुतण्डुलाम्लवणयुतं हिङ्ग्वार्द्रकविमिश्रितम् ॥ १३३

सशिखं चाणकं शाकमम्लतक्रेण स्वेदितम् ।
सहिङ्गुलवणे तैले भर्जितं नागरान्वितम् ॥ १३४

क्षाराम्लभावसहजाश्चणकप्रवालाः
संमर्दिता मरिचसैन्धवशृङ्गवेरैः ।
संचूर्णिताः कटुकतैलयुतैः समस्तै-
र्भृष्टैः सुहिङ्गुसकणैः परिदत्तवासाः ॥ १३५

चाणकं शाकमुद्दिष्टं दुर्जरं कफवातकृत् ।
विष्टम्भजननं रुच्यं विशेषात्पुष्पवर्जितम् ॥ १३६

अथ चञ्चुशाकम् ।

चञ्चुशाकमिदं मृदुपत्रं स्वेदितं तुषजलेन नितान्तम् ।
तैलहिङ्गुलवणैः सुपाचितं कस्य नो दिशति चेतसोत्सवम् ॥ १३७

चञ्चुः शीता सरा रुक्षा स्वादुर्दोषत्रयापहा ।
धातुपुष्टिकरा बल्या मेध्या पिच्छिलिका हि सा ॥ १३८

---

133 a Title B - चणशाकं, BB - चाणकशाकं । B चणकं.
b N, C सुतण्डुलाम्लनयुतं. BB हिंग्वाद्रक -

134 a B चणकं BB सशिखं

135 a J - चाणक -. BB - सहज - . B, BB - प्रवाला
b J संवर्द्धिता, B - समद्दितं BB श्वंमर्दिता
c B संचूर्णितं
d J सहिंगुचणकैः. परिक्षतवासः.

136 a B चणकं
b J - फल - (for - पुष्प -), B विशेषत् BB - त्कफलवर्जितं corrupt.

137 a Title J - चिंचुशाकं, B - चिंचुः, BB - चिंचुकाशाकं । J चिचु -, B, BB चिंचु -
b J दिशतिं, BB दिसति. B - लवणेन J चेतेसोत्सवं, B चेसतसोत्सवं

138 a J, B, BB चिंचु (J चुः) J स्वाददोष B, BB - दोष -
b J - करां J पिछिलिका, B पिछालिका, BB पिच्छालिका.

अथ नाडीशाकम् ।

नालेन रहिता नाली सुस्विन्ना मुष्टिपीडिता: ।
घृते तप्ते परिक्षिप्ता चिञ्चिजीपत्रसंयुता ॥१३९

नाली सरा लघुः शीता पित्तनुत्कफवातला ।
व्रणशोथहरा ज्ञेया लिप्ता शोथघ्निका मता ॥१४०

अथ पालिक्यशाकम् ।

पालिक्यं दलितं शाकं तिलतैले विपाचितम् ।
अम्लद्रव्यसमाकीर्णं हिङ्गुसैन्धवसंयुतम् ॥१४१

पालिक्या वातला शीता भेदिनी श्लेष्मला गुरुः ।
विष्टम्भजननी चैव नेत्ररोगकरी हि सा ॥१४२

अथ मारिचशाकम् ।

सुतप्तभाण्डे बहुजीरकान्विते सुस्वेदितं मारिचसंज्ञशाकम् ।
ससैन्धवं तक्रविलोड्य पाचितं संप्रापितं प्राप्तनभोज्यकेन ॥१४३

रुच्यं वातहरं बल्यं कफहृद्रोगनाशनम् ।
हृद्यं पित्तकरं किंचिच्छाकं मारिचसंज्ञकम् ॥१४४

अथ ववौतिशाकम् ।

सदण्डपत्रं मृदु खण्डशः कृतं सरामठं तप्तघृते सुमर्जितम् ।
ससैन्धवं तक्रयुतं विपाचितं ववौतिकं देवशिवेन वर्णितम् ॥१४५

---

139 a Title J,B,BB – नार्ची (B ली) शाकं । J,BB नारी, -पिंडिता B हिता (for रहिता)

140 a J पित्तारुकक्कफ वातदा B -वातदा BB-वातहा B लंघु, शिता BB नारी
b BB लिप्ताशोथकामता (for the post half) submetric

141 a Title J,BB – पालकशाकं, B – पालक्यशाकं । B पालक्यं, BB पालकं.
b BB transposes हिङ्गु and सैंधव, reads the post half of 142[b] in addition

142 a J,B,BB पालक्या B गुरु BB लेदिनी श्लेष्मदा
b B – जननीजी. J – करं, BB – करा

143 a J,BB – मरिचाशाकं, B – मरिचशाकं J सुशोधितं BB – शाककं च ।
b J – भाज्येन च, B भाजकेन, BB भाज्यकेव B तक्रयुतं सुपाचितं

144 a J हृद्यं (for रुच्यं), BB गर्व्यं.
b J मरिचसंज्ञकं, B,BB मरिच-

145 a Title J – ववते-, B – वपोता-, BB – ववौते-. J रामहं BB सुभार्जितं
b J,B,BB वाव्योतिकं

सुगन्धं पित्तहृद्बल्यं हृद्यं वातानुलोमजम् ।
प्रोक्तं लघुतरं पाके नागवल्ल्यास्तलोद्भवम् ॥१४६

अथ वेल्लजं शाकम् ।

सुकृत्तं वेल्लजं शाकं क्षिप्तमाज्ये सहिङ्गुके ।
उषिते क्वथितं तक्रे शुक्लवर्णं विपाचितम् ॥१४७

वेल्लजं कटुकं शाकं तिक्तं च लघु पाचकम् ।
सुगन्धं सुरसं प्रोक्तं सुशीतं रुचिकारकम् ॥१४८

अथ चुक्राशाकम् ।

चुक्रकं सुतिलतैलपाचितं सूपधूपमिलितं ससैन्धवम् ।
वृन्तकेन सहितं सुसाध्वादं मांसिजीव मिलिता सुकामिनम् ॥१४९

चुक्रं चुक्रतरं स्वादु वातघ्नं पित्तकृत्परम् ।
रुच्यं लघुतरं पाके सवृन्ताकं सुरोचकम् ॥१५०

अथ पुनर्नवाशाकम् ।

पौनर्नवं शाकमतीव मिष्टं संस्वेदितं मुष्टिभिरेव पिष्टम् ।
संपाचितं मिष्टतमे सुतैले संवासितं हिङ्गुकणेन रुच्यम् ॥१५१

पौनर्नवं हि चाक्षुष्यं तिक्तं रूक्षं कफापहम् ।
शोथपाण्डुमयश्वासज्वरहृद्रोगनाशनम् ॥१५२.

---

146 a B पित्तबल्यं, BB द्रव्यहृद्बल्यं.

b B पाकं J -स्थलोद्भवं, BB -छलोद्भवं.

147 a Title BB - वेल्लजशाकं J क्षिप्तमाज्ये BB सुवृत्तं (for सुकृत्तं)

b B, J -वर्णं BB उषितं क्वथिते

148 a J चार्ण (for च) B पाचितं BB वेल्लजं.

b J omits this line B, BB सुगंध्यं.

149 a J सूपमिलितं. BB धूपितं मिलितसैंधवं तथा (for the post half)

b J वृन्तकेन सहितं, मांसिजीव, सुकामिनां. B सुकामिना

150 a J omits this stanza. B वातघ्नी, -सरं (for -त्परम्)

151 a Title J, B, BB अथ पुनर्नवा । J पुनर्नवं, मिष्टं B संस्वेदित मिष्टतमे सुतैले (for the post half)

b B पौनर्नवं शाकमुदाहरंति संपाचितं मिष्टतमे सुतैले ॥

152 a J चाक्षुष्यं

b J -पाडु- , B अथ (for मय)

अथ चित्रावल्लीशाकम् ।

विचित्रं चित्रकं शाकं कासमर्दविमर्दितम् ।
तप्ततैले सधात्रीके पाचितं तक्रसंभृतम् ॥१५३

चित्रकः कटुकः पाके वह्निकृत्पाचको लघुः ।
श्लेष्मानिलहरो ग्राही रुच्यो वृष्यतरो हि सः ॥१५४

अथ कौसुम्भम् ।

कौसुम्भं कोमलं शाकं कासमर्दविमर्दितम् ।
पाचितं तप्तके तैले मजिमन्थविमन्थितम् ॥१५५

कौसुम्भं कासजित्छाकं रूक्षमुष्णं च पिच्छलम् ।
सुस्वादु मधुरं पाके लघु रुच्यं सरं हि तत् ॥१५६

अथ शिखाली ।

श्रीबालकदलं ग्राह्यमारनालेन तापितम् ।
पिष्टितालोडितं तैले कासमर्दसमन्विते ॥१५७

वातपित्तहरा बल्या विबन्धाध्माननाशिनी ।
कफकृन्मूत्रकृच्छ्रघ्नी भेदिनी सा रसायिनी ॥१५८

अथ जीवन्तीशाकम् ।

जीवन्त्या कोमलं पत्रं स्विन्नं तक्रे सुपिष्टितम् ।
हिङ्गुना भर्जितं तैले तक्रं क्षिप्त्वा प्रलेहितम् ॥१५९

---

153 a. Title J - चिं (B,BB चि) त्रावल्लीशाकं । J काशमर्द्दी
b J ततस्तैले

154 a B कटुको BB विचित्र. (for चित्रकः)

155 a Title B - कुसुंभः । J कौसुंभ, काशमर्दीव
b J,BB तापितं (BB ते) (for पाचितं) B,BB माजि-

156 a J - छाकं, B - छाक

157 a Title J - सिखाली, BB अथारवाली
J, B, BB आ (B,BB मं) रनाले सुस्वेदितं (for the post half)

158 b J रसायना

159 a Title J - बच्छौतिया-, B - विछौतिया-, BB illegible, N,C a.r बच्छौतिया-
J जीवन्त्याः B तक्रेण N,C a.r सुपोहितम्
b J क्षिप्ता B हिंगुना, तक्रे.

जीवन्ती बृंहणी वृष्या गुर्वी रुच्या रसायनी ।
चक्षुष्या सर्वदोषघ्नी प्रोक्ता मधुरपाकिनी ॥१६०

इति पत्रशाकाधिकारः ।

अथ पुष्पशाकम् ।

अथ करीरकुसुमम् ।

कारीरं कुसुमं सुधर्मनिहितं सद्धारिणा संयुतं
सप्ताहेन विपाचितं सलवणं हिङ्ग्वाढ्यतैले भृशम् ।
भिन्नं तक्रवरं सुकाञ्जिकमथो सद्वेसनेनान्वितं
भोक्ता केन समर्चितः प्रतिदिनं श्रीपार्वतीशः स्वयम् ॥१६१

कारीरं कुसुमं भेदि कटुकं कफनाशनम् ।
पित्तहृद्रुचिरं भव्यं कषायं पथ्यदं भृशम् ॥१६२

अथ कुटजपुष्पम् ।

काञ्जिकेन मधुरेण मुहूर्तं स्वेदितः कुटजपुष्पगुलुच्छः ।
पाचितः सलवणस्तिलतैले याति हिङ्गुसुरभीरुचिरत्वम् ॥१६३

कौटजं कुसुमं ग्राही सुस्वादु मृदुशीतलम् ।
लघु हृद्रोगपित्तासृगुदावर्तज्वरं जयेत् ॥१६४

अथ शोभाञ्जनम् ।

शिग्रुमूलफलपुष्पमिश्रितं तैलपक्वमुदकेऽथ साधितम् ।
भिन्नसैन्धवरजः सहिङ्गुना जायते सुरभि दीपनं वसोः ॥१६५

---

160 a B, BB रसायिनी
b J, B, BB and N, C as a. r. सर्वरोगघ्नी B भेदिनी सा रसायिनी (for the post half)
BB -पत्रशाक-

161 a Title J अथ करीरं पुष्पं शाकं । J -निहित, BB-निहतं, B सुमर्धनिहितं.
b B, N-C as a. r. सप्ताहेन . BB illegible line.
c J, B, BB तक्रतरं J, BB -मिथो, B सुकंजिकमथे. B सद्वेसणे-
d J भावता. B सुमर्चितेः BB येच (for केन)

162 b B -चिरं (for -चिरं), वर्ज्यं (for भव्यं), भृश.

163 a J -गुलंछ, B -गुलुछा, BB -पुष्पकगुछं. B कांजिकेण. BB मुहूर्ते
b J -रुचिमत्वं, B -रुचिमत्तं.

165 a Title J, B, BB - सोभां (J भां) जनं । J, BB पुष्पकं मिश्रतं. B सांधितं
N, C a r शिग्रुमूलफलपत्रकं भृतं
b J रस: (for रज-). J, B, BB दीपनमज्जे.

शिग्रुकः कटुतीक्ष्णोष्णः स्नायुशोथसमीरजित् ।
कृमिजित्कफदोषघ्नो विद्रधिप्लीहगुल्महा ॥१६६

अथ काञ्चनारः ।

काञ्चनारः कषायश्च उष्णः शीतहरो लघुः ।
रूक्षः पित्तासृक्प्रदरग्रहणीक्षयकासनुत् ॥१६७

अथ शिरदुला ।

कलिका नैव दलिता स्विन्ना तक्रे घृताधिके ।
वेसवारोषणापूर्णा हिङ्गुचूर्णे विपाचिता ॥१६८
नीलिनी रोचनी तिक्ता केश्या मोहभ्रमापहा ।
उष्णा हन्त्युदरप्लीहवातपित्तकफामयान् ॥१६९

अथ अगस्तिकुसुमम् ।

आगस्त्यं कुसुमं तथा मृदुमाषं केनाहृतं जन्तुना
धन्यं चाद्य दिनं यदद्य मिलितं कस्यास्यमालोकितम् ।
स्विन्नं तक्रयुतं सुहिङ्गुलुलितं तप्ते घृते पाचितं
भोक्त्रा सत्वरभोषितं प्रियतमे नाद्यापि संपाचितम् ॥१७०
आगस्त्यं पित्तकफजिच्चातुर्थिकहरं हिमम् ।
तत्फलं पीनसश्लेष्मवातनक्तान्ध्यनाशनम् ॥१७१

---

166 a B कटतीक्ष्णोष्णा

167 b B, BB omit this stanza. B, BB, J insert;
कोविदारकलिकातिकोमलातक्रस्विन्नतिलतैलपाचिता ।
J,B हिंगुवाससुवासवासितावेषवारलुलितातिलोभदा ॥
BB हिंगुवासजवासिसुवासितावेषभावलुलितातितिलोभदा ॥

168 a Title J - सिरदुला, B omits, BB - सितदुला । B omits this stanza BB वलिका

b J - पूर्णा. BB वेववारोहणापूर्णे, - पूर्वे (for - चूर्णे)

169 a B omits this line. BB नालिनी J केश्या.

b J, B - मयात् BB - पित्तकामयान्

170 a Title J, B - अगस्तिपुष्पं, BB - अगास्तिपुष्पं । B आमस्तिं (for आगस्त्यं

b J कस्यास्य - BB यद्य (for यदद्य), कस्याद्यमालोकितं

c J,B तापितं (for पाचितं). BB सुहिंगुलं - , तप्ते च संतापिते

d J संतर-, B सस्वर- J संतापितं, BB संपाचिता

171 a J,B,BB - चातुर्थिक (BB कं) - . BB मतं (for हिमम्) B आगस्ति

अथ अरणीपुष्पम् ।

अग्निमन्थभव बालखुडिका सप्तरात्रमुदके सुसंधिता ।
तक्रसिक्त घृतपाकपाचिता हिङ्गुना जनितवासवासिता ॥ १७२

अग्निमन्थोऽतिहृद्यश्च त्रिदोषशमनः सरः ।
आध्मानच्छर्दिहा शोथ चक्षूरोगविघातदः ॥ १७३

अथ शणपुष्पम् ।

सुस्विन्नं शाणकं पुष्पं तक्रे तैले विपाचितम् ।
हिङ्गुना वासितं वेल्लसुचूर्णेनावचूर्णितम् ॥१७४

शणपुष्पं सरं बाल्यमसृक्प्रदरनाशनम् ।
मधुरं रुचिदं पाके किञ्चिद्विष्टम्भकारकम् ॥ १७५

अथ मधूकपुष्पम् ।

सद्यश्च्युतं स्थूलमधूकपुष्पं संशोधितं केसरधूलिवर्जितम् ।
संपाचितं शुभ्रसिताघृताभ्यां सजीरकं जीवनदं हि जीविनाम् ॥ १७६

बृंहणीयं सुमधुरं मधूककुसुमं गुरु ।
वातपित्तप्रशमनं हृद्यं रुच्यं मुखप्रियम् ॥ १७७

इति पुष्पाधिकारः ।

---

172 a Title J, B - इरणीपुष्पं । J नव (for भव), BB भषा . J-चुडिता, N, C a.r. लुण्डिका (for खुडिका) B -उदके, BB सप्तरात्र उदके तु संधिता (for the post half).

b J, BB तक्रयुक्त-, B तकयुघृत- . BB सुयुत (for जनित) J-वासितं

173 a B -मंथाति- . BB आग्निमंथोऽत्यहृद्यो

b J - चक्षु- . B, BB सोथ- . B बक्षू (for चक्षू)

174 a Title B-शतपुष्पं । . B तक्रे BB सुस्विनं N;

b N, C a.r वात्ल-(for वेल्ल-) B - चूर्णेनावर्त्त्यं चूर्णितं corrupt.

175 a BB illegible line. J बाल्यमस्त्र-

b B रुचिरं . J -कारक

176 a B केशर -

b B, BB जीवनं (for जीविनाम्)

177 a J समुरं (for सुमधुरं) BB-मधुरं (for -कुसुमं)

b B रुक्षं (for रुच्यं) BB सुखप्रियं

अथ पल्लवाः ।

अथ तोरई ।

कोशातकीवल्लिभवाग्रपल्लवाः

सुपीडितास्तक्रयुताः सुसंभृताः ।

संभर्जिताः सैन्धवहिङ्गुनाऽधिके

तैलेऽतिरुच्या तनुपुष्टिदायिकाः ॥१७८

अथाम्रपल्लवाः ।

स्विन्ना निष्पीडिताः कामं कोकिलाहारपल्लवाः ।

घृतसिन्धूत्थसंसिद्धा रुच्या रामठवासिताः ॥१७९

सर्पिषा खण्डयुक्तेन तलयेदाम्रपल्लवम् ।

लवङ्गार्द्रकसंयुक्तमरुचौ रुचिकारकम् ॥१८०

अथ निम्बपल्लवाः ।

निम्बस्य कोमलतराणि दलानि भृष्ट्वा

स्वाज्ये क्षिपेत्तदनु सैन्धवयुक्ततक्रे ।

शालेयतण्डुलकणैः सह रामठेन

वाघारितं ददति रोचनमेव लेह्यम् ॥१८१

निम्बः शीतो लघुर्ग्राही दाहजित्त्वग्निकारकः ।

व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनुत् ॥१८२

इति पल्लवाधिकारः ।

---

178 a Title J,B,BB -पल्लवः, B तत्र तोरई । B,BB -पल्लवा N,C a.r नवाग्र (for अथाग्र)

b J सुपिंता- N,C as सुपिण्डिता-, BB सुपिंडितातक्रयुता.

178 c J. सुसंस्कृता (for संभर्जिता) B -हिंगुणा- . BB -नाधिकै

d J,BB, N-C as a.r बहुहृष्टिदायका: B बहुपुष्टि-

179 a Title J अथाम्रपल्लवः BB निःपीडिता, पल्लवा

b BB सिंधूति (for सिन्धूत्थ) . J+मेलके-(रामठ-) B,BB -वासिता

180 b B संयुक्तं मरिचै BB -मरुचौ

181 a Title J,B -निंबपल्लवः(४वं) B घृष्ट्वा, BB भृष्ट्व

b B सैंधवतक्रयुक्ते: . J-तक्रे

c J शालीय-, BB जलाद्य- ; -कणै.

d J,B,BB वाग्धारितं J-लड्यं (for लेह्यम् )

182 a J,B,BB-ग्राही J,B दाघ-(for दाह-)

b J,B-छर्दि- J,BB इत्यादि (for इति )

अथ वण्डाधिकारः ।

अथ कदलीदण्डः ।

वृन्तच्छिन्नः सलिलविधृतः कृत्ततन्तुः प्रयत्नात्
कम्बुश्रान्त्या जालविरहितः क्षारजम्बीरमृष्टः ।
मध्ये मध्ये तनुसकलितश्चार्द्रकेनातिपूर्णः
स्वादुस्तूर्णं भवति सुतरां गर्भदण्डः कदल्याः ॥१८३

योनिदोषहरो दण्डः कादल्योऽसृग्दरं जयेत् ।
रक्तपित्तहरः शीतः सुरुच्यो बलवर्धनः ॥१८४

अथ ढेहिशाकम् ।

संक्षुद्य तक्रेऽम्लतरे सुस्विन्नं प्रतप्तभाण्डे नवढेहिशाकम् ।
ससैन्धवं रामठदत्तवासं स्वादन्नरो निन्दति व्यञ्जनानि ॥१८५

ढेहिका वातला रूक्षा शीता गुर्वी विषापहा ।
सुस्विन्ना रोचनी हृद्या अस्विन्ना कण्ठकर्तरी ॥१८६

अथ सार्षपः ।

सार्षपः कोमलो दण्डः स्विन्नस्तक्रेण पीडितः ।
तप्ततैले सुहिङ्ग्वाढ्ये भर्जितः सैन्धवान्वितः ॥१८७

सार्षपी कन्दली सूक्ष्मा खण्डिता स्निग्धभाजने ।
स्थापिता मण्डसहिता त्वथवा तण्डुलोदकैः ॥१८८

---

183 a J,B,BB omit अथ वण्डाधिकारः । J,B प्रयत्नं (B नः) BB कृततनुप्रयत्नः corrupt.
b J चञ्चु- (for कम्बु-); पिष्टः (for -मृष्टः), B युष्टः.
184 a J,B कदल्या (B ल्यो). BB कादल्योसृदर पचेत् corrupt.
b J-शीतो गुरु रुच्योऽग्निवर्धनः B,BB सुरुच्योऽग्निविवर्धनः (for the post half) N,C अग्निविवर्धनः as a.r.
185 a Title J - ढेइ, BB डाइ । BB सुछिन्नं. J संकूद्य, B संजूण्य, BB संचूद्य . J तक्रे स्तरणे.
b B - तक्रवासं, व्यंजनान्यं BB स्वादं नरो
186 a J ढेहिका BB टेहिकालोथ (for ढेहिका वातला) corrupt
b B खंड (for कण्ठ-). BB कंठवर्तरी
187 a Title J,B - शा (B स) र्षपः । N, C a.r. पिण्डितः
b J,BB सहिंग्वा- , तर्जितः (for भर्जितः)
188 a J शार्षपी B कदली
b J अथवा, B त्वथावा, BB त्वथावा J, BB तंडुलोदके

सप्तरात्रात्परं चुक्रतुल्यं सम्यक्प्रजायते ।
तत एव समाकृष्य तलयेद्वा प्रलेहयेत् ॥१८९
काप्यकेति समाख्याता सूदधर्मोपजीवकैः ।
सार्षपं कटुतीक्ष्णोष्णं वातश्लेष्मव्रणापहम् ॥१९०
कृमिकण्डूहरं दद्रुकुष्ठघ्नं रुचिकारकम् ।

अथ मूलकम् ।

सपत्रः स्वेदितस्तक्रे दण्डो मूलस्य सूक्ष्मकः ।
घृते पक्वः सुहिङ्ग्वाढ्यो लवणेन विमिश्रितः ॥१९१
सुरुच्यं मूलकं शाकं विष्टम्भि रुचिकारकम् ।
वातपित्तहरं श्रेष्ठं तत्फलं तद्गुणावहम् ॥१९२

इति दण्डशाकम् ।

अथ कदलीकन्दः ।

कन्दः कदल्या दलितो नितान्तं सँस्वेदितो हिङ्गुघृतेन शुद्धः ।
उद्धूलितः सैन्धवरेणुनाऽयं मरीचसंपर्कित एव रुच्यः ॥१९३
कदल्याः शीतलो बल्यः कन्दः केश्योऽम्लपित्तजित् ।
वह्निकृद्दाहहारी च सुस्वादू रुचिकारकः ॥१९४

---

189 a B, BB -शाख्या-
b J अमाकृष्य B तालयेवा
190 a, J क्वथिके -(for काप्यके-), B कांजिकेति, BB कथ्यिकेति. BB सूप (for सूद) ~~J, BB सार्षपं~~
b J, BB शार्षपं B सर्षपं
191 a J कृमिदंड्वाप्नये B दद्रुघ्न (for दद्रु-)
b B सपत्रं स्वेदितं तक्रे (for the prior half) BB मेऽभकः (for सूक्ष्मकः
c B घृतो पक्वा-सहिंग्वाढ्ये, BB घृतं पक्वस्तु हिंग्वाढ्ये (for the prior half).
192 a J, B, BB कफ (for रुचि)
b J, BB तंकुल्कं च (for तत्फलं तद्) BB श्लेष्मं (for श्रेष्ठं) J -कंदंडशाकं.
193 a Title J, B, BB अथ कंदः। B दलितं, शुद्धैः B शाकाद्धः (for शुद्धः)
b J, BB मरीचि -, B परीचिसंशक्कित एव रुच्यः। (for the past half)
194 a J, B, BB कादल्याः
b J सुस्वादु

अथ सूरणम् ।

अम्लीकापत्रचूर्णेन मिश्रितेन जलेन वा ।
काञ्जिकेनाथवा क्वाथ्यः सूरणो रौद्रतां त्यजेत् ॥ १९५

दिग्धो वाल्मीकतोयैः रजनिरसयुतैर्गोचरैः सूर्यभेरोः
संक्लिप्योत्क्षिप्य पात्रे तिलरससहिते साधितः सैन्धवेन ।
जातः स्निग्धः सुगन्धिर्मरिचपरिचितः पाकराजं दधानो
दुर्नामघ्नस्तु कन्दः सपदि मदयते प्राशितो जाठराग्निम् ॥ १९६

कन्दस्तूदरमृत्तिकाभिरहितः संवेष्टितोऽसौ मृदा
कारीषानलपाचितस्त्वगयुतः क्षोदीकृतो मिश्रितः ।
शुद्धः सैन्धवतैलजीरकजरठजम्बीरनीरार्द्रकै-
र्जाड्यं पाण्डुरतां तथैव हरते वह्नेरयं सूरणः ॥ १९७

सूरणं कटुतैलेन तलित्वाऽम्लरसैः सह ।
शोषयेद्वेसवाराढ्यं यथा भोक्तुरभीप्सितम् ॥ १९८

मृल्लिप्तं सौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत् ।
अद्यात्सतैललवणं रामठेनानुवासितम् ॥ १९९

सूरणोऽग्निकरो रुक्षः कासार्शःकर्तनो लघुः ।
सन्धानयोगसंप्राप्तस्ततोऽतिगुणकारकः ॥ २००

---

195 a Title C - सूरणशाकम् । J, B अम्लिका
b J क्वाथः , BB क्वाथ्याः

196 a B -तोयै ,-युतै-. BB सिरस (for निरस) -भेरैः
b J संक्षिप्तो- BB पारे (for पात्रे)
c J,BB पाकरोगो मगंधानो corrupt. B स्निग्धो BB सुगंधो-, -परिचिते
d J दुर्णाकृति , B दुर्नामाहंति, BB दुर्नामार्शाति . J प्राशितो . BB मनुराग्निः

197 a BB दि (for भि), सो (for सौ)
b J काषारी- . BB -पाचितः त्वग्निरतः , मिश्रितव्य
c J जीरकेन सहितो (for तैलजीरकजरठ). B,BB -तैल- B जीरकरजजंबीर
d N, C पूरणः (for सूरणः) J, BB जाड्यं पाडव खंडितोपिहरतो -
B जाड्यं पाटव खंडितोपि रहितो वह्नेरयं सूरणः ।

198 b BB -द्वेषवाराद्यं

199 a J,B सूरणं

200 a J रुक्षः (for रुक्षः) J,B,BB -कर्तनो

अथ मृणालम्



बिसाऽङ्कुरा भोक्तृयशोऽङ्कुरोत्थिताः

समाहृताः कुल्यजलादगाधतः ।

संकृत्तखण्डास्तनुतारकप्रभाः

प्रलेहयोगैः सुधिया विपाचिताः ॥२०१

मृणालं दुर्जरं शीतं पित्तघ्नं कफवातकृत् ।

कषायं मधुरं स्वादु विष्टम्भाध्मानकारकम् ॥२०२

संख्याऽनन्ता कति कति न ते शाकपाकप्रभेदाः

किं तैरुक्तै रहितविरसैरप्यसत्वप्रकृष्टैः ।

मूलं पत्रं कुसुममथवा पल्लवं वा फलं वा

भक्त्या राद्धं भवति चतुरैः सर्वमेवातिरुच्यम् ॥२०३

अतिजीर्णमकालोत्थं रूक्षमसिद्धमभूमिजम् ।

जरठं कोमलं चातिशीतव्यालादिदूषितम् ॥२०४

तत्सर्वं वर्जनीयं हि भिषजा हितकारिणा ।

सुशुष्कं सकलं शाकं नाश्नीयान्मूलकैर्विना ॥२०५

---

201 a Title J-मृणालः, BB-मृणालः । J,B बिशांकुरा BB-त्थितः, B-कुरुत्थिता

b J,B,BB-हृता

c J कृतास्तु (for संकृत्त). B कृत्ताणुखंडामधुरचाणुतारकप्रभाः

d J,B-योगे, BB-योगान् B,BB विपाचिता

202 a J मृनालं BB दुर्ज्जरं

203 a J,B transpose कति and न BB कति न कथिता

b BB-प्रभृष्टैः

c J फं (for फलं)

d BB राद्धँ (for राद्धं)

204 a J रूक्षं

b J,B,BB जडरं

205 a J,B,BB तत्सर्वं वर्ज्योन्नित्यं (for the prior half) BB हितकारणात्

b J संशुष्कं

सर्वं शाकमचक्षुष्यमजिघ्रेयमपौरुषम् ।
विना पटोलवास्तूककाकमाचीपुनर्नवाः ॥२०६

सर्वासां शाकजातीनां प्रकारः कथितो मया ।
सन्धानवटकादीनामुच्यते तदनन्तरम् ॥२०७

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते
क्षेमकुतूहले ग्रन्थे शाकप्रकारप्रशंसनो नामाष्टमोत्सवः ॥८॥

---

206 a J, B –चाक्षुष्यमजाघ्रेयमपौरुषं
b BB पाटोलोल – J पुनर्नवा

COLOPHON : B – विरचिते (for – विनिर्मिते)
J षाड्विधशाक प्रशंसनो
BB षड्विधशाक प्रशंसनो

— ***** —

## अथ नवमोत्सवः ।

### अथ सन्धानकम् ।

राजिकाजीरलवणनिशाद्वये कटुतैलके ।
फलं मूलं च पुष्पं च घर्मे स्थाप्यं दिनत्रयम् ॥ १
ततश्चाम्लतरं जातं शीघ्रसन्धानकं स्मृतम् ।
निम्बाम्रबिम्बिवार्ताकमार्द्रकं त्रपुषीफलम् ॥ २
कूष्माण्डबिल्वमरिचं पिप्पलीविश्वतिन्दुकम् ।
सूरणं कदलीकन्दो मूलकं वंशजाङ्कुरः ॥ ३
इत्यादिवस्तुजातं हि सन्धेयं दृष्टकर्मणा ।
वार्ताकं तेषु सुस्वेद्य सन्धेयं चान्यदामकम् ॥ ४
एवं निम्बादिकं सर्वं कटुतैले विनिक्षिपेत् ।
स्थापयेद्घर्ममात्रं तु तदूर्ध्वं नैव युज्यते ॥ ५

### अथ लावासन्धानकम् ।

लावकान् मत्स्यखण्डान् वा स्वेदयेदिक्षुजे रसे ।
कृत्वा काञ्जिकमध्ये तु तैले वा सर्षपोद्भवे ॥ ६
स्थापिताः सर्वकालं तु तिष्ठन्ति वै हि तादृशाः ।

### अथ तित्तिरिसन्धानम् ।

स्विन्ननिर्गालिते दध्नि तैले पक्वोऽथ तित्तिरिम् ॥ ७

---

1 a Title B - संधानं । J,B - निशाद्वयो (B - रुचो). B लवणं
b B फलं BB transposes मूलं and पुष्पं
2 b J त्रपुसीफकं लं, BB त्रपुसंयुतं BB तत्राम्रबिवीकर्तीक corrupt.
3 a J कुष्मांडाशिंबि-, J,BB - टिंटिकं (for - तिन्दुकम् ) B omits the post half BB सिंवी (for बिल्व)
b B - जंकुरं, J,BB - जांकुरं.
4 a J,B,BB - जातीनां (for - जातं हि ) J दृष्टि (for दृष्ट- )
b J,B,BB transpose वार्ताकं and तेषु. J मुस्वेद्यं (for सुस्वेद्य )
5 a J विनिःक्षिपेत् BB तत्राादिकं (for निम्बादिकं )
b J,B,BB ततोर्ध्वं B युज्यते
6 a Title J,BB - लावसंधानकं, B - संधानं. J,B,BB लावका B omits वा, रसं
b BB काजित, शार्षपो-
7 a B omits तु, तिष्ठत्येव हि तादृशा. (for the post half) BB स्थापयेद्घर्ममात्रं तु (for the prior half), omits the post half.
[illegible] BB पक्वं त [illegible]पक्वान्- , J,BB तित्तिरं.

तदेव तैलसंयुक्तं निम्बुकस्य रसे न्यसेत् ।

अथ वाराहजिनसन्धानम् ।

वाराहजिनमुद्धृत्य निशाराजिकसैन्धवैः ॥ ८

तीक्ष्णे घर्मेऽतिसंशुष्कं क्षालितं हिङ्गुसंयुतम् ।

सनिम्बुकरसं शुष्कं क्षिपेत्तैले सनिम्बुके ॥ ९

अथ मत्स्यसन्धानकम् ।

खण्डा मत्स्यस्य तैलेन सुपक्वाः कोष्ठसंभवाः ।

स्थापिताः सार्षपे तैले सदा तिष्ठन्ति तादृशाः ॥१०

सर्वं पित्तकरं प्रोक्तं सन्धानं रुचिकारकम् ।

वातघ्नं वस्तुभेदाच्च संविचार्यं गुणागुणम् ॥ ११

अथ पिष्टशुष्कवटी ।

तप्ततैले विनिक्षिप्ता वटिका माषपिष्टजा ।

तलिता तक्रसिक्ता च शुष्कीकृत्य प्रचालिता ॥ १२

अथवा क्वथिते तक्रे सर्वोपस्करसंयुते ।

मांसप्रलेहवत्पाच्या वटी पिष्टसमुद्भवा ॥ १३

अथार्द्रपिष्टवटी ।

तैले पक्त्वा वटीं तप्ते रन्धयेद्वेसवारकैः ।

सर्वद्रव्यसमायुक्तैर्वटीतुल्यं च रन्धयेत् ॥ १४

---

8 a B क्षिपेत् (for न्यसेत्) BB तैलं.
b Title BB, -वाराहसंधानं B -राजिके- J वाराहजिन-
9 a J घर्मे (for तीक्ष्णे) B सर्वं घर्मेति संशुष्कं (for the prior half)
b क्षिप्ते तैले.
10 a Title J, B -मत्स्यसंधानं J खंडसंभवाः, BB कोमलं भवा BB सुपक्वा
b B, BB स्थापिता B, BB शा (BB सा) र्षपे BB तिष्ठति तादृशः
11 b J, BB किंचिद्वस्तुविशेषत्वा (BB त्वा) त् (for the prior half) BB संविपर्यं, reads इति संधानकं
12 a J, BB -वटिकावटप्रकारः, BB -पिष्टशुष्कवटी (Title). J, B, BB विनिःक्षिप्य
b J, B, BB स्वशुष्कं कृत्वा B तलिता (for तलिता)
13 b BB -पाच्य, पिष्टा-
14 a Title BB अथार्द्रपिष्टवटिका B, J, BB वटी
b J -वाटी-, BB -वटि-

अथ धूमाँसी वटिका ।

धूमाँसीवटिकाऽप्येवं स्थूला तैलेन पाचिता ।
मेलिता संस्कृते तक्रे क्वथिते च मनोरमे ॥१५
माषस्य वटिका ह्यद्या बल्या पुष्टिप्रदायिनी ।
वातहृच्छुक्रला सा च तलिताऽथ प्रलेहिता ॥१६

अथ माषपिष्टेण्डरी ।

माषस्यैण्डरिकां कृत्वा खण्डशः सैन्धवान्विताम् ।
रन्धयेद्वेसवारेण तैले पक्वा वटीसमा ॥१७
अण्डरी शुक्रदा वृष्या रुच्या विष्टम्भकारिणी ।
कफवातहरा प्रोक्ता माषपिष्टभवेण्डरी ॥१८
मुद्गपिष्टिकयाऽप्येवं विधाय वटिकां वटीम् ।
तप्ततैले वेसवारसंयुक्ते रन्धयेद्वटीम् ॥१९

अथ मुद्गेण्डरी ।

बाल्हीकजीरकनवार्द्रकपूर्णगर्भा
बाष्पेन जातपाचना नवमुद्गपिण्डा ।
चूर्णीकृता सुरभिहिङ्गुकृताधिवासा
मन्दानलस्य रुचिदा न भवेत्तु कस्य ॥२०

---

15 a B एकं (for एवं) J पाचिताः
16 b J वातहृच्छु-, प्रक्तोनलिनाथ (for सा च तलिताऽथ) corrupt. BB प्रोक्ता (for सा च)
17 a J, BB खंडशो (BB सो) वटकाकृतिं (for the post half) B माषस्यैडरिका, -वान्विताः
b J, BB पक्वं (BB क्वं), -समं.
18 a J, BB इंडरी J, B रुक्षा रुच्या (for वृष्या रुच्या) BB omits वृष्या, चुक्रदा
b B -भवेडरी . BB -पिष्टा-
19 a J, BB -पिष्टकया-, वटिका वटान् B -पिष्टकयाप्येवं.
20 a Title J अथ मुद्गजा, B अथ मुद्गेडरी B -पूण- BB -जीरकेनाद्रक- J -गर्भं.
b J यातपचँना B तव- (for नव-) B, BB बा (BBवा) ष्पेण BB -जापचजाव-

मुद्गस्य बहुधा मत्स्याः शीतला लघुपाचकाः ।
त्रिदोषशमनाः प्रोक्ता रुच्याः संस्कारयोगतः ॥२१

अथालीकमत्स्यो ऽपरी ।

नागवल्लीदलं ग्राह्यं वेसवारेण लेपितम् ।
माषपिष्टकया लिप्तं संप्रसार्य समावृतम् ॥२२
स्विन्नमाखण्डितं तैले भृष्टं हिङ्गुसमन्वितम् ।
रन्धयेद्वेसवाराद्यैरलीका मत्स्यका इमे ॥२३
अलीकमत्स्यका रुच्या बल्या वृष्यातिपुष्टिदाः ।
वातहृच्छुक्रला प्रोक्ताः किञ्चित्पित्तप्रकोपकाः ॥२४

अथ वेसनम् ।

आलोड्य वेसनं तोये क्वाथयेद्धिङ्गुना युते ।
पाके घनत्वं विज्ञाय तदुत्तार्य समे क्षिपेत् ॥२५
पीठे हस्ततलाघातैरिदं च पुटयेत्ततः ।
अलीककन्दखण्डाख्यं खण्डितं दीर्घसूक्ष्मकम् ॥२६
टिण्टीविम्बीफलाकारं कारयेद्बहुधा त्विदम् ।
तप्ततैले ततः पाच्यं रन्धयेद्वेसवारितम् ।
शुष्कं प्रलेहितं वाऽपि वटिकेव प्रपाचयेत् ॥२७

21 a J मात्स्या, B,BB मत्स्या B - पाचका
b J,B,BB रुच्या B - समना, BB - शममाना
22 a Title J omits, C - निर्माणम् . B वेष्टितं (for लेपितम् )
23 a J - खंडिते B,BB भृष्ट BB - समन्विते
24 a J अलीका- , B - पुष्टिदा
b J,BB वातहृच्छुक्रदाः B,BB प्रोक्ता B - प्रकोपका
25 a Title - J omits C - अथ वेसनस्य वास्कनिर्माणम्
b B लघुतार्य (for तदुत्तार्य )
26 a B - घाते- J,BB,B पुटेयेत्ततः BB पीटे
b BB - खडाख्यं , पिंडितं (for खण्डितं )
27 a J - टिंटीविवी-, BB - टिंटीचिंची- B,J इदं , BB द्रवं (for त्विदम् ).
b BB - द्विषवारितं
[illegible] J,B प्रमेदितं (for प्रलेहितं )

अथ पचवटी ।

तोयेन वेसनं ल्कोड्यं मथितं हिङ्गुना सह ।
तप्ततैले प्रदातव्या वट्यामलकमात्रया ॥२८
वेसवारयुते तक्रे क्वथिते वेसनान्विते ।
तत्र सा वटिका क्षिप्त्वा नाम्ना पचवटी स्मृता ॥२९

आल्हादिका मृगदृशा मृदुना स्वरेण
स्पष्टस्वरैरपि विलोलितसर्वगात्रा ।
स्नेहाधिका सुमधुराऽरुणसर्वदेहा
नीरहराऽतिरुचिरा च वटी च चेटी ॥३०

चणकः कूलसंस्कारः कफघ्नो लघुदीपनः ।
शीतलो रुक्षविष्टम्भी वातकृत्पुंस्त्वनाशनः ॥३१

अथ वटकप्रकारः ।

माषपिष्टिकया कृत्वा बृंहणाः वटकास्ततः ।
अनल्पतैलसंपक्वा मेलिता धोलके रसे ॥३२
मरिचार्द्रकजीरकसैन्धवत्वचबाह्लीकतिलाम्लमिश्रिताः ।
तलितास्तिलतैलमध्यगाः प्रसृताः कोरवटा रुचिप्रदाः ॥३३

---

28 a Title C-निर्माणम् J,B,BB हिंगुना सह मथितं (for the post half)
b J तप्त-, प्रदातव्यं B वट्याचणकमात्रया
29 a B वेसणान्विते, BB वेसवान्विते
b J ता (for सा), पचवटा B नाना (for नाम्ना)
30 a J,B मृदुना भरेण, BB मृगदृशी, मृदुना, संभरणा (for स्वरेण)
b J नीराहरंतिरुचिकोरवटीबवटी, B नीरशराहरातिरुचिकारवटी च वटी, BB नीहाररातिरुचिकोर वटी च वैटी च वटी corrupt.
31 a C title-अथ संस्कृतचणकस्य गुणाः, J,B चणकाज्जसंस्कारः, BB चणका
b B रुक्ष्ये-, -नाशना
32 a Title C-निरूपणम्. J बृंहितो, B बृंहिके, BB बृंहतो
b J,BB मेलके (for धोलके) B रसै (for रसे)
33 a B मरि (for मरिचा) J transposes जीरके and सैन्धव, त्वक् J,B,BB मिश्रितं (B तः)
b J,B,BB तलित-, -मध्यगाः (B तः), प्रसृतः कोरवटो नरवडजः

अथ भीमवटकः ...

हिङ्गूजीरकचूर्णैस्त्वचमरिचयुतैरार्द्रकैः पूर्णगर्भैः
स्निग्धस्तब्धस्वरूपः परिमलबहुलः कोमलः कुङ्कुमाभैः ।
भग्नो दन्तान्तराले मुरुमुरुलरवोल्लापको व्यक्तशब्दः
सो धन्यानां मुखेषु प्रविशति वटको भीमयोगेन सिद्धः ॥ ३४

बल्यो वातहरः कोशो वटो विष्टम्भपित्तकृत् ।
आल्हादजननः प्रोक्तो दाहकारी तृषाकरः ॥ ३५

अथ घोलवटकः ।

आमैरवं प्रचुरसैन्धवशृङ्गवेर-
बाल्हीकजीरमरिचैर्मिलितोऽल्पमात्रैः ।
संस्थापितः सुरभिजो मथितस्य मध्ये
करस्येति घोलवटको रुचिसंप्रदोऽस्तम् ॥ ३६

माषस्य वटको हृद्यो बल्यः शुक्रकरो गुरुः ।
विष्टम्भी घोलसंयुक्तोऽविदाही पवनापहः ॥ ३७

अथ क्वथितवटा ।

सधान्यं वेसनं लब्ध्वा वस्त्रे निर्गाल्य क्वाथयेत् ।
ततः शुण्ठीं जीरकं च हिङ्गु निःक्षिप्य साधितम् ।
क्वथितास्व्यमिदं प्रोक्तं वटाः स्युस्तेन संयुता. ॥ ३८

---

34 a Title C -निर्माणम्, BB -वटः . J हिङ्गु- BB -राद्रैक
b J, B, BB सुरूपः, J, BB -बहलः, B स्तावत्, BB स्तरवाज (for स्तब्ध)
c J रालवोनायकः (for लरवोल्लापको), B व्यापिको (for ल्लापको),
BB दैतातराले मुरुमुरुकिचवोल्लावको corrupt
d B मुखे वै प्रविशति BB मुखानां मुखांतः (for धन्यानां मुखेषु

35 a B वतहरः BB कारो
b B प्रल्हाद (for आल्हाद), दाघकारी, त्रिषाकरः

36 a Title C-निर्माणम्, J-घघोटवटकः, B -घोडवटकः, BB illegible.
BB आमैरवं प्रचलवं प्रचरसैंधवशृंगवेर - hyper metric, corrupt.
b J, B, BB -र्मिलितौवलमात्रैः
c J, B, BB निस्थापितः..J सुरभिजो BB मेथितस्य
d J, B, BB करस्येतं (for करस्येति) J घोड (for घोल) BB -वडको

37 b BB संसक्तो (for संयुक्तो) J घोट, B, BB सोड (for घोल)
38 a Title C -वटकनिर्माणम्, J-क्वथितवटः. B सधान्यं, वेसनं
b J शुण्ठीं . BB, J जीरं
c J स्वातं (for प्रोक्तं) .J, B संतोकः (for संयुताः) BB क्वथितस्त्रामिदं वटास्युस्त्वदीयाम् दधिमथितदानो-
[illegible] hypermetric corrupt.

अजाजी बाल्हीकार्द्रकमरिचसिन्धूत्थमेरितः
स्वपाकात्स्वादीयान्दधिमथितदालीविरचितः ।
कृतैलासंवासः क्वचित व्युषिते स्वैरमुषितो
विहन्ताऽयं साक्षादरुचिग्रहणीमल्लवटकः ॥३९

क्वथितायां परिक्षिप्तो वटको रुचिकारकः ।
विष्टम्भजननो वह्निनाशनो रक्तपित्तकृत् ॥४०

अथ काञ्जिकवटकः ।

नूतना मन्थिनी यत्नात्कटुतैलेन मार्जिता ।
रामठेन ततो धूमं दद्यात्तक्रं ततः क्षिपेत् ॥४१
पल्वलेनाम्बुनाऽऽपूर्य क्षिपेत्तस्यां सुचूर्णकम् ।
राजिकाजीरलवणहिङ्गुशुण्ठीसमन्वितम् ॥४२
काणिक्यां पिण्डिकां चैव ततस्तां पासरद्वयम् ।
आतपे स्थापयेत्पश्चाद्वटिकां तत्र निःक्षिपेत् ॥४३
ततो दिनत्रयादूर्ध्वं स्फुरदम्लवटा इति ।
राजिकावटिका केश्चित्कथ्यन्तेऽथ लुषाम्बुकाः ॥४४
बाल्हीकधूमाकुलपात्रमध्ये सराजिके वारि किरेदणीयः ।
तत्रारनालोदरपूर्णवर्ती सराजिकोऽयं वटकः पटीयान् ॥४५

---

39 a B रिच (for मरिच) BB omits this line
b J, B सुपाकात् (ब्रन्). B - स्वादीन् BB illegible line
c J, BB - वुषिते. J, B, BB - मुषिते
d J नुविजनुजा (for रुचिग्रहणी). B विहँताय:, BB विहँतायं.
40 a J क्वाथितायं
41 a Title C - निर्माणम्. J, B, BB मंथनी BB नूतनं J मार्जिता:, B माजिता, BB मर्जिता.
b J, B, BB omit this line.
42 a BB पल्लवलेनां वुपूर्णाश्चकुर्येत्तस्यासुचूर्णकं corrupt.
b B लवणं B, BB सुंठी
43 a J, B, BB वज (B, BB क) णिक्या, J पिडिता, BB पिंडिका. J ततः स्वां
b J स्तत्र. B - द्वटकास्तत्र BB - द्वटका B, BB निक्षिपेत्
44 a BB - स्फुरमम्ल -
b J, BB - वटका BB - त्कथ्येते -
45 a J omits - मध्ये B बाष्प (for पात्र), सराजिका BB किरेदणीय
b B सराजवाय वटक: BB दल (for दर), सराजकोयं.

तुषाम्बुवटको रुच्यो वातजिद्रुचिकारकः ।
रक्तपित्तकरश्चोष्णस्त्वहितो नेत्ररोगिणाम् ॥४६

अथाश्चर्यवटकः

कणान् गोधूमानामपगततुषाणां सुरभितं
जाले बद्ध्वा वस्त्रे परितप्तु निदध्याद्दिनयुगम् ।
ततस्तोये तस्मिन् कणवणमुखकुम्भीभिरिरथं
स्थितः पक्वं यावद्भवति रुचिदाश्चर्यवटकः ॥४७

आश्चर्यवटकस्तृप्तिकारको रुचिकारकः ।
वातहृद्यावकः सद्य पित्तकृट्छोफकारकः ॥४८

अथ चिञ्चावटकः

शैलपचोत्तिमचिञ्चा जलगुडगुलितो मरीचसंपृक्तः ।
प्रविशति चिञ्चावटकः सुकृतिनमेवाननं रुचिकः ॥४९
चिञ्चेयवटकस्त्वम्लो पित्तकृद्रुचिकारकः ।
मधुरो वातहृद्बल्यः पित्तकृच्छोफकृत्सरः ॥५०

अथ ध्वंसीवटी

माषस्य आलिता दालिः सुशुष्का यन्त्रपेषिता ।
तस्याः स्थूलवटी तैलपक्वाऽऽमलकमात्रया ॥५१

---

46 a BB the post half illegible.
b J -करश्चोक्तस्त्वहितश्चक्षुरोगिणां B-हितःपित्तरोगिणां,BB -हितश्चक्षुरोगिणां
47 a Title C -निर्माणं गुणाश्च , BB -वटको , J,B कणा, BB काण C -तुषामां BB सुरभितं
b J दिनयुगं BB विदध्या -
c J तस्मितल -, -कुसं - B,BB transpose तोये and तस्मिन्. BB कुसं तरिरथं
d J,B,BB रुचिरा B पक्वं यवद्भवति
48 a J,B वटकाश्चर्यधारको (B कारको) submetric
b J-त्पावकः, J पित्तकृछोयकारकः
49 a Title C -निर्माणं गुणाश्च , J, B-वटकाः ,BB अथ विवटकाः . J-मंथचा (for -मचिञ्चा ),
गुलितो (for गुडगुलितो ) J, BB मरीचि BB सौलयवोत्तिमध्यं वा जलयं गुडगुलितो. B सैलिप्त- (for शैलपचोत्तिम)
b B सुकृतन-, रुचि (for रुचिकः)
50 a J चायेयं-, B वावेयं-, BB चोयेय-
b J -छोक-, BB ट्छोक-, B-छोफ-
51 a Title C -निर्माणम् ,J -ध्वांसी-, B, BB-ध्वांसी -.J आलये BB यांत्रपेषितां, J-पेषिताः
b J,BB तस्या , B तस्य ,-पक्वमलक -

हिङ्गुना धूपिते तक्रे नव्यपात्रे सुसंस्थिते ।
तत्र ता वटिकाः क्षिप्ताः सतक्रं परिवेषिताः ।
नाम्ना ध्वंसवटी ख्याता कैश्चित्पुष्पवटी स्मृता ।५२

आर्द्रकार्द्रकजीरकोषणगणैः प्रत्येकसाक्षीकृते-
र्गच्छन्ती शतपत्रपुष्पलघुतां ध्वांसी वटी पूरिता ।
तक्रे हिङ्गुकधूमधूपकलुषे सम्यक्प्रफुल्ला पाण्डुरा
भुक्तीच्छोरपि सौरभेण नयते जिह्वालतां लोलताम् ।।५३

धूमांसी वटिका हृद्या रुच्या मृद्वी बलप्रदा ।
वातहा पुष्टिदा लघ्वी शीघ्रशुक्रप्रदायिनी ।।५४

माषमुद्गादिपिष्टात्स्युर्वटिकावटकादयः ।
स्वनिमित्तगुणाः सर्वे ज्ञातव्याः कथिता बुधैः ।।५५

सन्धानवटकादीनां निर्माणं कथितं मया ।
अथ पक्वान्नजातीनां वक्ष्येऽहं विस्तराद्विधिम् ।।५६

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले ग्रन्थे पिष्टान्नकृतप्रकारप्रशंसनो नाम नवमोत्सवः ।।९।।

---

52 a BB सुसंस्कृतैः (for सुसंस्थिते)
b J,B,BB वटिका J,B क्षिप्त्वा. J सुतक्रे परिवेष्टिताः BB तक्रे च परिवेषिता
53 c J ध्वांस-, B ध्वांस-, ख्याता BB सुवटी (for ध्वंसवटी
53 a BB कार्द्रक, कोषणै, omits गणैः, प्रसेव (for प्रत्येक)
b J ध्वांसी B पूर्णतां (for पूरिता) BB र्गच्छंति
c J,B,BB transpose धूम and धूप J पाण्डुरा
d J भुक्तं छोरपि J,B लोलतां
54 a B गुद्वी (for मृद्वी)
b J,BB शौद्रं BB बलेदा (for वातहा)
55 a J -पिष्टोत्थ-, B-पिष्टोत्था-, BB -पिष्टाद्य-
b J सर्व B,BB ज्ञातव्या
56 a J,B कथितो B निर्माण, BB निर्माणाः
b B वेदेऽहं. B,BB -द्विधिः

COLOPHON : BB पिष्टान्नप्रशंसनो

—x—x—x—x—x—

अथ दशमोत्सवः ।

अथ फेणिका ।

घृतेन मोदयित्वाऽथ दधि दत्त्वा विमर्दयेत् ।
कणिका वर्तिताः कुर्याद्भ्यस्ताः पिष्टिकावधि ॥१
नवनीतयुतैः पिष्टैस्तण्डुलानां च लेपयेत् ।
पश्चात्ताः पटवद्वेष्ट्य स्वयं वृन्तेन छेदयेत् ॥२
द्विधा एकैक खण्डेन संप्रसार्यतिनैपुणात् ।
सा च सर्पिषि संपक्वा मृद्वी पुष्पवती स्मृता ॥३
बहिः खण्डप्रलिप्ता च फेणिकेयमिति स्मृता ।
माषजां फेणिकां केचित्केचित्क्षीरसमुद्भवाम् ॥४
शृङ्गाटशालुकादीनामाहुर्युक्तां कणोकजाम् ।
सरसैः पटलैरेता पुराणस्येव सन्धयः ॥५
हसन्तीव सितत्वेन फेणिका मेनकापतिम् ।
फेणिका पुटिनी शुभ्रा विस्तीर्णा वर्तुला लघुः ॥६
निर्माणं युक्तिभिस्तासां जानन्ति कुशलाः स्त्रियः ।
वातपित्तहरा बल्या किञ्चित्कफकरा सरा ॥७

---

1 a Title J फेनिकाऽथ, B – फेणिका, C – निर्माणं गुणाश्च. J मोहयित्वा. B,BB च मर्दयेत्.
b J कनिक्या, BB कनिका. J,B,BB वर्त्तिकाः. J कुर्याद्व्यस्ताः, B,BB कुर्युर्लघ्वस्ताः J संपीडकावधि
2 a J नवनीतयुतः. B पिष्टैः स्त–. J,B,BB तान्लिपेत्.
b J वृतेन छेद्रयेत् BB – वेष्टयः.
3 a B संप्रसार्यतिनैपुणः. J –नैपुनः, BB –नैपुणाः
b J संपक्ता, स्मृजा B सुसंपक्वा, omits च. BB संपक्वौ.
4 a J खंडड–. J, BB कनिकेय–. J स्मृताः. B omits this line.
b J फेनिकां केचित्कचित् B केचित्क्षीरोवधिसमुद्भवं
5 a J –र्युक्ताः, कनिक्यजां. BB – दीनामुद्भयुक्ता
b J,B,BB सरसा (J साः) BB पटलैर्देता, B पत्लरेता B संधायः J सूरण (for पुराण)
6 a J,B,BB फेनि (B न) का. BB सित्वेन
b J चर्त्तुला, J फेनिका BB पुटिनोः
7 a J निर्माणा B कुशला, BB कुलणा
b B स्मृता (for सरा)

सुस्निग्धा मधुरा शीता रुच्या गुर्वी मनोहरा ।

अथ नवनीतफेणिका ।

दुग्धाम्बुना स्विन्नमुद्गद्विदलं तन्दुलैः सह ॥८

नवनीतेन दध्ना च मिश्रं पिष्ट्वा पचेद्वटान् ।

घृते तप्ते बहिः खण्डचूर्णेनोद्धूलयेदिमान् ॥९

नवनीतयुता मृद्वी फेणिका दुग्धसंयुता ।

वातपित्तहरा वल्या स्निग्धा शीताऽतिपुष्टिदा ॥१०

अथ माषफेणिका ।

निस्तुषां माषविदलां सूक्ष्मां द्विस्त्रिस्तु पेषयेत् ।

शिलायां पिष्टितामित्थं नवनीतेन संयुताम् ॥११

छागचर्ममयोपेते छिद्रिते पूरितां दृढम् ।

घृतपूर्णभाजनस्थ तप्तस्योपरि भ्रामयेत् ॥१२

पूरिता तेन छिद्रेण सा पिष्टी धारया घृते ।

पतिता पच्यते स्वच्छा ह्रस्वा पक्वा प्रपूरिणी ॥१३

वर्तुला चतुरस्रा वा दीर्घा वा फेणिका ततः ।

प्रलेपयेद्बहिर्मिश्रं पक्वखण्डस्य धारया ॥१४

---

8 b Title J,BB – फेनिका, C – निर्माणं गुणाश्च, J,BB द्विदलां युक्त तन्दुलां (for the post half)

9 a J वा (for च), पचेद्वरां. B पचेद्वटन् BB मिश्रा

b J – नोद्धलये – . B लेप्त.

10 a J, BB फेनिका J,B,BB मुद्ग (for दुग्ध).

b J,B,BB पित्तहा (for पुष्टिदा). BB शाता –

11 a Title BB – फेनिका, C – निर्माणं गुणाश्च J – द्विदला. J सूक्ष्मं, B सूक्ष्मां BB पीषयेत्

b J,B,BB पिष्टिका – J नवनीतयुतं वटं, B नवनीतदधि संयुता (for the post half).

12 a J,BB – पयः पोते (J तो). J,B,BB छिद्रितः J,BB पूरितो

b B घृतसंपूर्णपात्रस्थ. BB तस्योपरि.

13 a J,BB पीडिता (for पूरिता) J,BB धारयेत् (J त्). B छिद्रेण तः.

b J पचिता (for पतिता).BB पाचाते J ह्रस्व पक्वान्नपूपिनी (for the post half)

B पक्वान्नरूपिणी, BB पक्वान्नपूपिणी.

14 a J दीर्घा B फेणिकां M,C फेनिका

माषपिष्टमेवा फेणी गुर्वी स्निग्धाऽतिवातहा ।
उष्णा संतर्पणा बल्या शुक्रस्थूलत्वकृत्सरा ॥१५

अथ लड्डुकप्रकारः ।

प्रथमं दधिलड्डुकः ।

वस्त्रान्निर्गाल्य पिष्टं तु शाल्लेस्तरचुतेन तु ।
दध्ना सेवा घृते पक्त्वा मेलयेद्गालितां सिताम् ॥१६
दधिशालिमेवं भेद्यं लड्डुकं पित्तनाशनम् ।
बल्यं वातहरं हृद्यं विशेषाद्दाहनाशनम् ॥१७

अथ कणिकाख्नलड्डुकाः ।

कणिका सर्पिषा मिश्रा तोयपिण्डितमर्दिता ।
तस्या मौक्तिकसदृशास्तुल्यास्तन्वादिनाऽथवा ॥१८
वर्तिवत्सेवकाः स्थूलास्त्वथवाऽभीष्टमात्रया ।
सुपक्वा सर्पिषि मिते खण्डपाकविमिश्रिताः ॥१९
वर्तुला मोदकाः कार्यास्तुल्या वा मुष्टिकेन तु ।

अथ गोधूमचूर्णलड्डुकः ।

ईषद्घृतेन संमिश्रा कणिका भर्जिता मनाक् ॥२०

---

15 b J,B,BB संतर्पणी J,BB शुक्लाशूलकृत्सरा (BB दा) B शुक्लकृत् सरा. B,BB omits बल्या.

16 a J,B,BB वस्त्रो-, पिष्टस्य (for पिष्टं तु), शाल्लेस्तारचुतस्य तु (for the post half)

b B -द्गलितां BB मिलद्ये-

17 a J मद्ये B,BB भद्यं

18 a Title J -कणिक्यालड्डुकं, BB -कनिकालड्डुका, C -निर्माणविधिः. J कणिक्या (for कणिका)

b J,BB -सदृशं-. B -तुल्या तंत्वादिनाथवा, BB तुल्यं तंकुत्यादिवाथवा (for the post half)

19 a J,B,BB स्थूलाः त्वथ (BB त) वाभी (BB भी) -, BB वर्तिके (for वर्तिवत्)

b J स्तोतुं (for मिते) BB -मिश्रा ततु, सर्पिषा, खंडि-

20 a J,BB ओदका J मुष्टिकेवतु, B,BB मुष्टिकेन तु

b Title C - निर्माणविधिः J संमिश्राः, BB तर्जिता J कानिक्या.

खण्डपाके विनिक्षिप्य मर्दयेद्दृढपाणिना ।
ततस्तया विनिर्माय यावदिष्टप्रमाणकम् ॥ २१

अथ दीर्घलड्डुकः ।

मोदकाः खण्डपाकेन यदि तेनापि वेष्टयेत् ।
श्लक्ष्णयेच्छ्लक्ष्णहस्तेन ततस्तान् सौरभोत्कटान् ॥२२

अथ चित्तमोदकः ।

उत्कृष्टशर्कशपाके घृतभृष्टः सुवर्तिभिः ।
बद्धः कर्पूरसुरभिर्मोदकश्चित्तमोदकः ॥ २३
एवं बहुविधाः कार्या गोधूमान्नस्य लड्डुकाः ॥..
स्थूला वा सूक्ष्मकाश्चापि पक्वखण्डविमिश्रिताः ॥२४
मोदका मरिचैर्लाभिर्वासिता नृपवल्लभाः ।
सेववर्तिकया ये स्युर्नाम्ना ते तन्तुलड्डुकाः ॥२५
स्थूलसेवभवाः स्थूलाः सूक्ष्मजाः सूक्ष्मसंज्ञकाः ।
सेवमौक्तिकसदृशास्ते स्युर्मौक्तिकलड्डुकाः ॥२६
इत्येते सेवजा ख्याताः विशेषप्राप्तसंज्ञकाः ।
लड्डुका जगति ख्याताः कणिकाप्रभृतेरपि ॥ २७

---

21 a J विनिःक्षिप्य.
b J यावद्दिप्रमाणकं submetric, BB वटि मुष्टि प्रमाणकं (for the post half).
22 a Title C-निर्माणविधिः, B-लड्डुका. J,BB मोदकान् J खंडपाकेन.
b J ततस्तुन् B श्लेषयेत् श्लक्ष्णहस्तेन, BB श्लक्ष्णयित् श्लाघ्यहस्तेन (for the prior half)
23 a Title C-निर्माणविधिर्गुणाश्च, J-मोदकोः. J-भृष्टा, B-भ्रष्टाः, BB-भ्रष्टा
b B-बद्ध, BB-मोदकाः
24 a BB तंडुलाः (for लड्डुकाः).
b J,B सूक्ष्मका वापि, BB क्ष्मका वापि. B स्थूल BB-विभ्रिताः
25 a J नुनप (for नृप). B नृपवल्लभाः BB मौदकै मरिलाभिर्वाभिश्रित।
b J-वर्त्तिकया J,BB तंदुल, B तंनंद (for तन्तु) BB संचावृत्तिकया.
26 a J सूक्ष्मास्ते (for सूक्ष्मजाः) B omits this verse. BB स्थूलस्येवभवा स्थूला सूक्ष्मा सूक्ष्मकसंज्ञका ।
b BB सेवा-, J संदशाते
27 a J,BB सेचकाः, B omits this verse
b BB लड्डुका J,BB ख्याता J कणिक्या-

वल्यो गुरुतरः शीतो मधुरो वातपित्तहा ।
कफशुक्रप्रदः स्निग्धो गोधूमान्नस्य लड्डुकः ॥२८

अथ माषलड्डुकः ।

माषपिष्टमेवाः सेवाः सेवा वा मुद्गपिष्टजाः ।
सुदर्व्या छिद्रमात्रेण विश्राव्य घृतपाचिताः ॥२९
खण्डपाकस्य योगेन यान्ति मोदकहेतुताम् ।
माषस्य च गुरुः स्निग्धो मोदको बलशुक्रदः ॥३०
उष्णः संतर्पणो वृष्यः स्वादुपाकोऽनिलापहः ।

अथ माषमुद्गकोद्रतण्डुलानां पर्पटलड्डुकाः ।

पर्पटैर्घृतसंमृष्टैश्चूर्णितैः खण्डमिश्रितैः ।
कणिकालड्डुकाकारं कर्तव्यं च यथेप्सितम् ॥३१
त एव पक्वखण्डेन लेपिता मोदका बहिः ।
पर्पटस्य समुद्भूतो लड्डुको रुचिकारकः ॥३२
विशेषोऽग्रान्नजो ग्राह्यो विपाके मधुरो हि सः ।

अथ मत्स्यलड्डुकः ।

गतत्वङ्मत्स्यखण्डानि तक्रेणोत्स्वेदयेन्मनाक् ।
ततो निष्कण्टकं कृत्वा तक्रेणातिविमर्दयेत् ॥३३

---

28 a B omits this verse J गुरुतर

29 a Title C-निर्माणविधिर्गुणाश्च J,BB-पाकमाषलड्डुकाः, B-माषलड्डुका. BB सेवा अथवा (for सेवाः सेवा वा). B अथवा (for सेवा वा) BB-पिष्टिजा, B-पिष्टजा
b J,B,BB निश्रा (B श्रो) व्य. B,BB-पाचिता. J,B सुद्रव्या

30 a J खंडकाशकयोजेन (for the prior half). BB यान्ति, -हेतुता

31 b Title C-लड्डुकनिर्माणविधिर्गुणाश्च, J-द्रवाणां पर्पटलड्डुकाः B मस्येमुद्गवतंदुलानां-
J खंड (for खण्ड). B,BB-संमृष्टैः -
c J कर्निक्या -

32 a B लिपिता, मोदकान्
b BB समुद्भूतैः, रुचिपाचकः

33 a J विशेषान्न, ग्राह्यं B -प्रान्नवो
b Title -निर्माणविधिर्गुणाश्च, B-मत्सलड्डुकाः. J -मस्मत्स्य-, -स्वदेये -
B गतत्वचोमत्स्यकानि
c J तक्रेणादि-

अथ वस्त्रेण निर्गाल्य स्विन्नशालूकमिश्रितम् ।
शिलायां पेषयेत्तौ वै पिष्टिकां कारयेत्ततः ॥३४

वर्तयित्वा तथा सेवान् पचेत्तप्तघृते भृशम् ।
तैले विषमगन्धस्य निवृत्त्यर्थं पचेदथ ॥३५

सेवा ये मौक्तिकतनिभाः पक्वखण्डेन वेष्टिताः ।
अथ वै मुद्गपिष्टेन पक्वे सेवस्य बन्धनम् ॥३६

कृत्वैवं तन्तु खण्डेन इति केचित् प्रकुर्वन्ति च ।
आमगन्धनिवृत्त्यर्थं पुनस्तैलेन पाचयेत् ॥३७

मत्स्यजा लड्डुका बल्या गुरवः कफकारकाः ।
वृष्यानिलहराः प्रोक्ताः किञ्चित्पित्तप्रकोपकाः ॥३८

अथ मांसलड्डुकाः ।

इत्थमेव विधातव्या मांसस्यापि हि लड्डुकाः ।
अप्सु संस्विन्नमन्नेन मिश्रितेन कणीकया ॥३९

मत्स्यमांसस्य रीत्या तु कर्तव्या मांसलड्डुकाः ।
गुणा मांसानुसारेण ज्ञातव्या लड्डुकेषु च ॥४०

---

34 a BB – शालूमिश्रितं
b BB प्रेषयेष्ठौ

35 a J वर्त्तयित्वा J,B त्वथो J सेवांन् , BB सेवा
b J - गन्धानां B पचेत्वथ BB ग॑धनिनिवृत्यर्थ पचेदथ

36 a J सेवास्ते , B सेवया BB मौक्तिकामा पक्वततः
b J पक्व. B,BB वा (for वै )

37 a B कृत्वैव J,B न तु (for तन्तु ) J ते (for च ) BB खंडेनि, कुर्वंति (for कुर्वन्ति )
b BB आत्मगंधा–

38 b J omits this line: B,BB प्रोक्ता B omits the post half.

39 a Title C – लड्डुकनिर्माणविधिर्गुणाश्च . J,B विधातव्यं J मांसेनापि च (for मांसस्यापि हि BB मांसानामपि J,B,BB लड्डुकं
b J,B,BB संस्विन्नमांसेन (BB मांसानि ) J कणिकया

40 a B,J मत्स्यमांसम (B न ) वा रीत्या BB मत्स्यमांसमेवती सा (for the prior half)
b B लड्डुकेन

अथ शालूकलड्डुकाः ।

शालूकं स्वेदितं निस्त्वक् पिष्टिकां कारयेत्ततः ।
वर्तयित्वा तथा सेवा घृते तप्ते पचेत्ततः ॥४१

सेवानां लड्डुकं कार्यं पक्वखण्डेन वेष्टितम् ।
तदीयमौक्तिकैः कार्यं श्रेष्ठं मौक्तिकलड्डुकम् ॥४२

तथैव चूर्णितया वा पक्वखण्डविमिश्रितम् ।
मांसलड्डुकवद्रीत्या सर्वं कुर्याद्विचक्षणः ॥४३

दुर्जरः कफपित्तघ्नो विष्टम्भाध्मानकारकः ।
कषायो वातकृद्रूक्षः शालूकलड्डुकः स्मृतः ॥४४

शृङ्गाटपद्मिनीबीजसंबन्धिलड्डुकादिकम् ।
ज्ञातव्यं प्राग्वत् कृत्स्नं स्वबुद्ध्या कारयेद्बुधः ॥४५

अथ सूरणमोदकः ।

पूर्ववत्स्वेदिताः खण्डाः सौरणा घृतपाचिताः ।
खण्डपाकविमिश्राश्च यान्ति मोदकहेतुताम् ॥४६

बल्यो वर्योऽग्निकृत्सद्यः सौरणो मोदकः स्मृतः ।
अत्यर्थं सर्वदा सेव्यश्चर्मकीलयुतैर्नरः ॥४७

---

41 a Title C- निर्माणविधिगुणाश्च, J,B -लड्डुक (B कं). J post half illegible. BB शालूक

b J तप्तं

42 a J कार्यै.

b J, BB कामं (for कार्यं), कुर्यात् (for श्रेष्ठं) B तदीयैर्मौक्तिकनिभैः कुर्यान्मौक्तिकलड्डुका

43 a J चूर्णिततया (for चूर्णितया वा) B तथैव चूर्णितं यावत् (for the prior half), -खण्डस्य-. BB चूर्णितया, -विमिश्रितां

44 a J -कारकाः, B दुर्जरो, BB दुर्जरः B काफ-

b J, B, BB शालूको- B लड्डक

45 a J, B, BB -संबंध- (B ध्य) B लड्डुकदिकं

b J प्रागवत्, B प्राग्वत् J सर्वं सुबुध्या, B कृत्स्नं सुबुध्या BB प्राणिजां (for प्राग्वत्)

46 a Title C- निर्माणविधिर्गुणाश्च, BB -सूपसूरणस्य मोदकं, J -सूरणस्य मोदकं B स्वेदितं खंडा.

b J, B, BB -विमिश्राश्च. B याति, BB ज्ञाति.

47 a J, B, BB अग्निकृद्रुचिकृत् (for बल्यो वर्योऽग्निकृत्) BB मोदका स्मृताः

b B देव्यो च- (for सेव्यश्च-)

अथार्द्रमोदकः ।

अम्लीकापत्रसंमिश्रं क्वाथयेदार्द्रकं जले ।
ततः क्षीरे विनिक्वाथ्य सुखण्डांस्तस्य कारयेत् ॥४८
ते च तन्दुलपिष्टेन वेष्टिता घृतपाचिताः ।
पक्वखण्डे समालोड्य कर्तव्या त्वेलयाऽन्विताः ॥४९
आर्द्रकस्यैव संभूतो मोदको रुचिबोधकः ।
कण्ठ्योऽग्निजनकः प्रोक्तो विशेषाच्छ्वासकासहा ॥५०

अथ कूष्माण्डमोदकः ।

कूष्माण्डस्य च कर्तव्यः सर्व आर्द्रकवद्विधिः ।
स्वेदनं कर्तनं खाण्ड्ये भर्जनं खण्डवेष्टनम् ॥५१
कूष्माण्डजनितश्चायं लड्डुकः पित्तनाशनः ।
बलकृद्वातहृत्सद्योरुचिकृत्कफकृद्धिमः ॥५२

अथ मज्जामेवाः ।

कूष्माण्डबीजैर्निस्त्वग्भिश्चिर्भिटयादिप्रियालजैः ।
खण्डपाकविमिश्रैश्च कुर्यात्तेषां हि मोदकान् ॥५३
नालिकेरभवा मज्जा खण्डिता दुग्धपाचिता ।
भर्जिता घृतमण्डेन खण्डपाकेन लेपिता ॥५४

---

48 a. Title C-निर्माणविधिर्गुणाश्च, J,B अथाद्रकमोदकं. C -दार्द्रक
b B विनिक्षिप्य, BB विनिकृत्य, B विनिःक्वाथ्य. B,BB सुखंडातस्य
49 a J पाचिता
b B पक्वा-. BB त्वेलयान्विता
50 a J संभूत्वो. B -स्येव, -बाधकः
b J मोक्तो B केश्यो (for कण्ड्यो). J,B,BB -श्वास-
51 a. Title C-निर्माणविधिर्गुणाश्च, B -मोदकोः. B कूष्मांडकस्य J,B कर्तव्यं. J सर्वं. B,BB आद्र
b J खांडवेष्टजं B रंधयेत् (for भर्जनं)
52 a J लेड्डूक B,BB जनिता (BB त) श्चर्यलड्डुकः.
53 a Title C अथ कूष्माण्डादिबीजमोदकनिर्माणविधिर्गुणाश्च B -प्रियाजलैः BB कूष्मांड-जा जैर्निस्त्व-, -भिश्चादिप्रियालजैः hypermetric, corrupt. J -बीजैर्नित्वग्भिस्त्विचभियात्-
b J,BB विमिश्रश्च (BB श्रित्य). J,B मोदकाः (B कः)
54 a. J,B,BB स्विन्ना दुग्धे सुखंडिता (for the post half). J नारिकेर-
b J,B,BB घृतखंडेन शालिपिष्टेन लेपिता.

सार्वं मण्डामेवाः प्रोक्ता मोदका मोदकारकाः ।
धातुपुष्टिकरा बल्याः स्वनिमित्तगुणावहाः ॥५५ 

अथ दुग्धप्रकारः ।

अथ निस्नेहसक्तुः ।

दुग्धं विनष्टं निर्गाल्यं मृष्ट्वा मृष्ट्वाऽन्तरान्तरम् ।
सखण्डं गालयेद्‌वस्त्रान्निःस्नेहं सक्तुवद्भवेत् ॥५६

अथ क्षीरसक्तुः ।

पाकपिण्डीकृतं दुग्धं नवमृन्मयभाजने ।
मर्दितं गालितं चापि वस्त्रे स्यात्सक्तुसन्निभम् ॥५७

अथ क्षीरवटकवटी ।

मरीचिगर्भिता नष्टदुग्धजा वटका वटी ।
पक्त्वा घृते क्षिपेत्क्षीरे खण्डपाकेऽथवा क्षिपेत् ॥५८

अथ क्षीरलड्डुकम् ।

नष्टं दुग्धं शिलापिष्टं युक्तं तण्डुलपिष्टकैः ।
घृते पक्त्वाऽथ संचूर्ण्य खण्डपाकेऽथ मिश्रितम् ॥५९

अथ स्वादुलड्डुकः ।

शालिपिष्टयुतं क्षीरं घृतं तेन तु कारिता ।
वटिका घृतसंपक्वा पिण्डदुग्धे सशर्करे ॥६०

---

55 a J,B,BB मण्डभेवा(J वाः)
 b J बल्या.
56 a Title B-दुग्धप्रतीकार C-दुग्धस्य निस्नेहसक्तुनिर्माणविधि. B निगाल्य
 J मृष्टांतरांतरा, B मृष्ट्वांनरतरं, BB मृष्ट्वांतरांतक.
 b J,B,BB-वस्त्रे-, सक्तुं वद्भवेत्
57 a Title C-निर्माणविधिः, B,BB-सक्तु
58 a Title C-निर्माणविधिः. J omits this line B वटिका.
59 a Title C-निर्माणविधिः J माष, B,BB मास्व (for युक्तं) B-पिष्ट, BB-नष्ट. J-पिष्टकैः.
 b B चूर्णते. - पाके सुमिश्रितं.
60 a Title J अथ स्वादुलड्डुक, C-निर्माणविधिः J,B घृतं (for घृतं). J कारयेत्

अथ रोचकदुग्धगोलकः ।

आगालितं वाससि सप्तवारान्विपाचितं गैरिकरागगौरम् ।
दृढीकृतं मृण्मयनव्यपात्रे प्ररोचकं गोलकदुग्धमेतत् ॥६१

लड्डुकं दुग्धसंभूतं रोचकं पित्तनाशनम् ।
शुक्रकृन्मधुरं बल्यं किंचित्कफकरं सरम् ॥६२

दधिशाल्यं तथा दुग्धं कणिका माषपर्पटाः ।
सूरणार्द्रककूष्माण्डशालूकामिषमत्स्यजाः ॥६३

नालिकेरप्रियालस्य मज्जा कूष्माण्डकादयः ।
एतेषां लड्डुकाः प्रोक्ताः संभवन्त्यन्यतोऽपि च ॥६४

अथ क्षीरकासारः ।

दुग्धं चिनष्टं निर्मथ्यं शुभ्रखण्डविमिश्रितम् ।
मर्दनात्पक्वतां यातं मन्दवह्नौ च चापितम् ॥६५

संमर्द्य प्रपचेत्तावद्यावद्धूलीसमं भवेत् ।

अथ क्षीरतिलावनम् ।

लाजाचूर्णं क्षिपेत्पिण्डदुग्धे श्राणां सशर्कराम् ।
मज्जां नवप्रियालानां ततः कुर्यात्तिलावनम् ॥६६

---

61 a Title J - गोलकदुग्धगोलकं, BB - मोदकं (for गोलकः), C - निर्माणविधिर्गुणाश्च.
J, BB सप्तधात्री (B मीन्)-, J गौरिक - B गौरि (for - गौरम्).
b B गुग्ध (for दुग्ध), BB दंडीकृतं
62 a J, BB गोलकं (for लड्डुकं)
63 a J, B श (B सा) ल्यं. J कनिक्या J, B, BB पर्पटाः (B टेः).
b B - कूष्मांडे BB - मिवमज्जा (for - मिषमत्स्यजाः).
64 a BB नालिकेरोमयावत्स्य मज्ज
b BB - त्यातोपि - (for - तोऽपि -). J लड्डुकः.
65 a Title B - सार, C - निर्माणविधिः. B दुग्ध J निर्मान्थ्यं, BB निर्मथ्यं.
b J, B, BB जातं (for यातं) J - त्पक्वतां B - वःनौ.
66 a J मर्द्यं मर्द्यं पचेद्यावद्धूलीसमं B मर्द्य मर्द्य प्रचेता य यावद्धूलीसमं BB मर्द्यं मर्द्यं.
b Title C - निर्माणविधिः, J - क्षीरतलावनं, B - क्षीरलावनं, BB - क्षरतलोचनं
J omits 66b and 66c. B सशर्करं.
c B, BB मज्जा. BB ने चं (for नवे-). B कुर्यात्तलावजे

अथ कृशरागर्भकम् ।

घृतपक्वकणिकाया श्चूर्णं गर्भितपिण्डकम् ।
पिष्टक्षीरकृतं सर्पिःपक्वं कृशरगर्भकम् ॥६७

अथ क्षीरवटकम् ।

घनं दुग्धं घृतभृष्टं क्षीरे पिहितरन्धितम् ।
कटाहे तु वहिः खण्डप्रक्षिप्तं क्षीरजं वटकम् ॥६८

अथ क्षीरशाकम् ।

विनष्टदुग्धं खण्डं च तलयेत्तप्तसर्पिषि ।
तन्निर्द्रवं खण्डसमं क्षीरशाकमिदं स्मृतम् ॥६९

अथ नृपयोग्यक्षीरशाकम् ।

क्षीरं प्रक्षीणनीरं क्वथितमतितरां रागवत्तामुपेतं
ब्रह्मक्षोणीजवल्कलघृतजलमिव छायममृतानुकारम् (?) ।
पिण्डं क्षीरप्रभूतं प्रदलितमरिचक्षोदसौरभ्यगन्धि
कोष्णं संजातपाकं नरवरभवने गीयते क्षीरसारम् ॥७०

सर्वे क्षीरभवा भक्ष्याः पुष्टिशुक्रप्रदा हिमाः ।
गुरवः कफकृत्स्निग्धा वृहणानिलपित्तहाः ॥७१

---

67 a J -कृशिगर्भकं , B -कृशिरागर्भं , BB -कृशिगर्भका , C- निर्माणविधिः . J,BB पक्वात्कणिक्वा- J -खंडकान् , B -पिंडिकं , BB -पिंडिकान् (for -पिण्डकम् ).

b J पिटक्षीरकृतः , तत्कृशि -(for कृशर-). B -घृतं (for -कृतं ), कृशिर - BB पक्वोतं कृसिगाक्तितं गर्भकं (for the post half) hypermetric, corrupt.

68 a Title J -क्षीरं वलं , C- निर्माणविधिः , BB -क्षीद्धलं . J,B,BB घन (BB नु) J,B,BB घृतं पुष्टं J पिहितं , B पिदित .

b BB -प्रक्षिप्तं . J खंडं -

69 a Title B -साकं , BB -ओरसा , B -खिरसा , C- निर्माणविधिः . B,BB सर्पिषा . BB -दुग्धे

70 a Title C- निर्माणविधिः .

b J -वत्वक्- , BB -त्यक्तुत- , B-वल्क- (for वल्कल ) J, BB छार्य- , B -मृतानुसारम्

c BB inserts : ब्रह्मक्षोणीप्रकाशं स्वयमिव सुकृतापानपियूषतुल्यं ।. B -सौरुल्यगंधि

d J कोष्णं जातमवाकं . BB पातं संपाकं , नरपतिसरभवने . क्षारसारं

71 a J वृष्याः , B वृक्षाः , BB भक्षाः (for भक्ष्याः ). J क्षीरमवा .

b J,B -पित्तहा . BB -त्स्निग्ध .

गव्यमाहिषजाताजास्त्रिविधाः क्षीरसंभवाः ।
स्वनिदानगुणा ज्ञेया विशेषो वस्तुभेदतः ॥७२

अथ मण्डकम् ।

विकसितजलजकल्पः शुद्धगोधूमपुञ्जः
प्रबलदृषदि कामं खण्डितः सैन्धवेन ।
अपगततुषभावोऽसौ नवीनांशुकश्रीः
समुपहरणयोग्यो मण्डकः स्विन्नवृत्तः ॥७३
कुकूलकर्परे सिक्ताः काष्ठाङ्गारविपाचिताः ।
मण्डकाद्या यथापूर्वं गुरवो बृंहणा मताः ॥७४
अत्युष्णो मण्डकः पथ्यः शीतः स गुरुरुच्यते ।
अङ्गारमण्डको ग्राही लघुर्दोषत्रयापहः ॥७५

अथाम्रफलम् ।

द्विधाऽऽम्रखण्डं पयसि प्रसंशृतं
सुलोहितं वल्लिजशर्करैलकैः ।
नवाज्ययुक्तं तनुमण्डकान्वितं
सोऽश्नाति यः स्नातिचरः शिवालयम् ॥७६
हृद्यं रुचिकरं बल्यमाम्रमम्लं समीरजित् ।
कषायानुरसं स्वादु वर्णदं मधुरं गुरु ॥७७

---

72 a J चत्वोज, BB जत्वाज, B वत्वोज (for जाताज) J,B,BB त्रिविधः(J ध) BB क्षीरसंभवः

73 a B दिकसित-, BB विकसति-
b J, BB मंडितं, B खंडितं. BB सम्यके (for कामं)
c J,B,BB -भावः सो-
d B,BB सम-(for समु-).

74 a J कुस्थूलकर्परे, B कुकुलपरिसं, BB कुकूलपलक्षणकर्परे hypermetric.

75 a J मंडकाः, पथ्या. BB मंडको, गुरुः उच्यते

76 a Title B omits, C- मण्डकनिर्माणविधिगुणाश्च. J,B,BB प्रसंश्रितं.
b B सुलोडितं
c B -मंडकप्रियं, J मंडकावृतं
d J स्नातचरः, BB स्नातवरः

77 a BB बल्यं साम्लाम्लं
b B -रस. मदनं (for वर्णदं).

अथ पोलिका ।

मण्डकः प्रसृतः सूक्ष्मः खर्परादिषु पाचितः ।
स एव किमपि स्थूलः सुधीः पोलिका मता ॥ ७८
पोलिका वातहा बल्या कफकृत्पित्तहा हिमा ।
स्निग्धोष्णा मधुरा गुर्वी सरा सन्धानकारिणी ॥ ७९

अथाऽङ्गारकर्करी ।

कणिका सैन्धवोपेता पाणिना मर्दिता दृढम् ।
निर्धूमाऽङ्गारपाचिता विज्ञेयाऽऽङ्गारकर्करी ॥ ८०
अङ्गारकर्करी बल्या बृंहणी शुक्रला लघुः ।
दीपनी कफहृद्रोगपीनसश्वासकासहा ॥ ८१

अथ वेढ(टि)का ।

चणकस्य भवा पिष्टी पिष्टी वा माषसंभवा ।
यवानीहिङ्गुलवणैः संयुक्ता गर्भसंस्थिता ॥ ८२
कणिकायाः पोलिकेव कर्तव्या वेटिका बुधैः ।
वेटिका वातहा मृद्वी स्निग्धोष्णा गुरुपाचिका ॥ ८३
कफघ्नी चणकोन्मिश्रा वातहा माषपिष्टजा ।

अथ शुद्धलप्सिका ।

घृते ताले विनिक्षिप्य कणिकां पाचयेत्समे ।
ततोऽल्पमल्पं निक्षिप्य क्षीरं सर्वसमं पचेत् ॥ ८४

---

78 a Title C- निर्माणविधिर्गुणाश्च, J कर्परादिषु BB सूक्ष्म कर्पूरादिषु
79 a B पित्तह BB पित्तदा.
80 a Title C- निर्माणविधिर्गुणाश्च J कणिक्या BB मृदिता
81 a B शुक्रता BB शुक्रला लघु दिपनी (for the post half)
b BB- पीनसास्वासकाशरुजापहाः
82 a Title J अथ वेडई. C- निर्माणविधिर्गुणाश्च BB पिष्टी पिष्टि
b J जवानी-
83 a J कणिक्यायां, B, BB कणिकायां J वेढिका B पोलिकेतु
b J वेष्ठिका
84 a Title BB- दुग्धलप्सिका:, C- निर्माणविधिः. J विनिःक्षिप्य, B परिक्षिप्य J कणिक्यां
b B निःक्षिप्यं BB भवेत (for पचेत)

ततः खण्डाशकं क्षिप्त्वा पचेदाघ्रृतदर्शनात् ।
लवङ्गाढ्या समरिचा लप्सिकेति प्रकीर्तिता ॥८५

अथ भैमी ।

श्रेष्ठं गोधूमचूर्णं प्रचुरघृतयुतं नालिकेरेण सार्धं
द्राक्षाखर्जूरशुण्ठीत्वचमरिचयुतं शर्करापूर्णगर्भम् ।
पक्वं ताम्रे कटाहे रलतिटलरवैः पावके मन्ददीप्तौ
धन्यैर्हेमन्तकाले सुजनपरिवृतैर्भुज्यते विप्रशेषम् ॥८६

अथ चन्द्रहासा ।

दीर्घं गोधूमचूर्णं शशधरकिरणप्रोज्ज्वलं तप्तमाज्ये
दुग्धे क्षिप्तं सखण्डं मृदुपटनिसृते योजितं तत्कटाहे ।
स्तोकं स्तोकं च दत्तं बहुघृतपचितं दर्विलग्नं न यावत्
सिद्धे वातामद्राक्षामरिचहिमयुता गीयते चन्द्रहासा ॥८७

अथ ललिता ।

समितां भर्जयेत्तप्ते घृते श्वेतां ततो न्यसेत् ।
चारमज्जादिसंयुक्तां पयसा बहलीकृताम् ॥८८
मरिचैलायुता तज्ज्ञैर्लप्सिका ललिता मता ।
लप्सिका बृंहणी वृष्या वातपित्तहरा गुरुः ॥८९

---

८५ a J खंडां J, B, BB क्षिप्त्वा
b J, B, BB लप्पसीति. BB लवंगाढ्यं. J, B प्रकीर्त्तिता.
८६ a Title C-निर्माणविधिः BB, J प्रवरघृतकृतं (J प्लुतं). J सार्द्धं
b B -गर्भा
c B, BB पक्वा J, B, BB टल (for रल-), टले (BB तले) (for -रवैः) J पाचके.
d B धन्यो. B सूजन-. BB भुंजते J चिप्रवेषं
८७ a Title C-निर्माणविधिः, J-चन्द्रहास, BB-चन्द्रहासं. J-किरणं-. BB शशिधर-
b J सखंडे B-निसृतं. J, B, BB योजिते
c B दत्वा. J तत्र दर्व्यां नलग्नं, B यावदर्व्यां न लग्नं (for दर्विलग्नं न यावत्)
d J वादर्म-, B, BB illegible (for वाताम-) J चन्द्रहंसा:
८८ a Title C - निर्माणविधिः. J ससितां J, BB भर्जिते ताते, B नार्जये-त्तप्ते. BB स्वातां
b C -समुक्तां. J बहाली-
८९ a J, B -युतां, तज्ञै-. BB मरिचैलंदुक्तो कासलप्सिका ललितो मता ।
b B -णी गुरु ।

कफमेदःकरा स्निग्धा सुरुच्याऽऽल्हादकारिणी ।

अथ शुभ्रघेवरम् ।

क्षीरेण मर्दितं चूर्णं गोधूमानां सुगालितम् ।
विस्तार्य सर्पिषा पाच्यं कटाहेऽथ सितान्वितम् ॥९०

घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः ।

अथ नालिकेरजम् ।

समिता मर्दिता क्षीरे नालिकेरसिताद्रकैः ।
अवगाह्य घृते पाच्या घृतपूरोऽपरः स्मृतः ॥९१

अथ दुग्धजम् ।

पाकपिण्डीकृतं क्षीरं शर्करा चूर्णमिश्रितम् ।
घृतपूर्णविनिर्माणं कारयेत्स्वल्पसर्पिषि ॥९२

अथ शालिपिष्टभवम् ।

सुशालिपिष्टं दुग्धे तु क्वथितं वस्त्रगालितम् ।
खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम् ॥९३

अथ कसेरुजम् ।

कसेरुचूर्णं निक्षिप्य पाककपिण्डीकृतं पयः ।
निर्माणं घृतपूराणां शर्करासहितं भवेत् ॥९४

---

९० a J - मेदकरा, B मेदहरा, BB मेदकरी.
b Title C - निर्माणविधिः, J - घेवरं. J गोधूमानां
c J कटाहेन

९१ a J - मुदिष्ट, BB हि निर्दिष्ट (for अयमुद्दिष्टः).
b Title C - घेवरनिर्माणविधिः. J नारिकेरसीताद्रवौ. J, BB मर्दिता (BB ते), - नालिकेर- समुत्रके.
c BB अवगृह्य

९२ a Title B omits, BB - दुग्धः, C - घेवरनिर्माणविधिः.
b J omits this line. BB - सर्पिषा

९३ a Title C - घेवरनिर्माणविधिः, B - शालिपिष्टतवं, BB - शालिपिष्टभवं. J omits the line. B, BB दुग्धे.
b J पक्वं J, B, BB भवेदिमं (BB ति)

९४ a Title C - घेवरनिर्माणविधिः. J निःक्षिप्य. BB - चूर्णे.
b J निर्माण

अथाम्ररसंभवम् ।

पक्वाम्रस्य घृते तप्ते रसस्तन्तनपिण्डितः ।
शुद्धशर्करया योज्यो घृतपूरो यदृच्छया ॥ ९५

क्षीरमात्मानुरूपं हि खण्डचूर्णं ततः स्मृतम् ।
योजितो यो विशेषोऽत्र तदाख्यापूर्णसंज्ञितः ॥ ९६

घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहः ।
सद्यः प्राणप्रदो बल्यः सुरुच्योऽग्निप्रदीपनः ॥ ९७

शृङ्गाटकमखानानामप्येवं घृतपूरकाः ।
विचार्य वस्तुसंयोगं तद्गुणानपि चावदेत् ॥ ९८

अथ गुह्या-संयावः केचित् ।

समितां सर्पिषा भृष्टां सिताद्राक्षादिसंस्कृताम् ।
एलालवङ्गकर्पूरमरीचैः परिवासिताम् ॥ ९९

क्षिप्त्वाऽन्यसमितालम्बपुटे वेष्टवा घृते पचेत् ।
ततः खण्डे न्यसेत्पक्वे गुह्यकोऽयमुदाहृतः ॥ १००

गुह्यको बृंहणो वृष्यो हृद्यः पित्तानिलापहः ।
मधुरोऽतिगुरुः पाके किञ्चित्सन्धानकृत्सरः ॥ १०१

---

95 a Title C- घेवरनिर्माणविधिः, B-संभवं. J-स्तन्तपिनिडितः, BB-पिंडिता.
b B-शर्करयो, यथेछया. BB यदृछया.
96 a J-माण्यानुरूपं, BB-माद्यनुनूपं BB-चूर्ण B ततो.
b J श्चूर्ण (for पूर्ण), B विशेषात्र. BB तदाख्य-
97. a B वृक्षो (for वृष्यो)
98 a J-मखानानाम-. B-नामप्येवं, -पूरकः
b J, B, BB चाहरेत् . B-गुणेनपि
99 a Title B, BB illegible, J-पूमाटसपावकेचि, C-गुह्या संयावकनिर्माणविधिर्गुणाश्च.
J BB न्मिता (for समितां), सिताक्षा-. J-संभृतो, B-संभवं.
b J, B मरिचैं. BB मरीचिर्यादिवासितां (for the post half).
100 a J वेष्टवा B-पटे
b BB पाके (for पक्वे)
101 b BB मधुरो गुरुः, संदानकारकः (for संधानकृत्सरः)

अथामृतसंयावकम् ।

समितां मधुदुग्धेन मर्दयित्वा सुशोभनाम् ।
पचेद्घृतोत्तमे तप्ते न्यसेत्पक्वजले घटे ॥१०२

ततो मरिचचूर्णैला खण्डचूर्णावचूर्णितम् ।
कुर्यात्कर्पूरसंयुक्तं संयावममृतं स्मृतम् ॥१०३

संयावममृतं स्वादु पित्तघ्नं मधुरं स्मृतम् ।
वृष्यं वातहरं हृद्यं विपाके गुरु भाषितम् ॥१०४

अथ मधुशीर्षा-प्राज्येति केचित् ।

मर्दयित्वा सुसमितामापूपोत्सवकः स्मृतः ।
पक्वो घृते सितापङ्कैर्मण्डितो मधुशीर्षकः ॥१०५

अथ मातुलुङ्गार्द्रकयुतमधुशीर्षकाः ।

घृतेन मर्दितां तोये समितां मधुसंयुताम् ।
मातुलुङ्गत्वचाखण्डसंयुक्तार्द्रकपूरिताम् ॥१०६

विधायापूपकं तस्या गन्धाढ्यं शर्करान्वितम् ।
पक्वं सर्पिषि तं सम्यङ्नामाऽयं मधुशीर्षकः ॥१०७

मधुशीर्षः सुमधुरो भेद्यः पित्तानिलापहः ।
सुष्ठुवस्तुसुयोगेन हृद्यो रुच्योऽग्निकारकः ॥१०८

---

102 a Title C-निर्माणविधिर्गुणाश्च, J-संयावकः. J,B शाकसामिता, BB सम्मितो.
J मधु-, मर्द्दयित्वा, सुशोभनं.
b J-त्पक्वं B तद्यो (for तप्ते). BB,-घृतोत्तम.
103 b J-ममृतोपमं BB-त्कर्पुरसंयावत्(अमृतं स्वादु इत्यदं BB संयावममृतोपमं.
104 a J-ममृतं, B पित्तघ्नं मधुरं स्वादु वृष्यं वातहरं स्मृतं.
b B omits this line.
105 a Title J-मधुशीर्षाप्राज्येकेचित्, B,BB-मधुशीर्षप्राज्ये केचित्, C-प्राज्यानिर्माणविधिः
J सुशमिताःपूपोत्सवकरः, B-मपूपोत्सवकः, BB-माचू-.
b J सीतापाके मंडितो, -शीर्षकाः, B सीतापंके BB पक्वेकृते सितेपाके (for the prior half)
106 a Title B-लुंगार्द्रकमधुशीर्षकः, BB-मातुलिंगा-, C काना निर्माणविधिर्गुणाश्च. J शमितां.
b J,B,BB पूरिता. J,BB मातुलुं(BB लिं)गा(BB गा). BB युक्ता (for संयुक्ता)
107 a J विधायपूजकं, B,BB विधायपूपकं. B,BB तस्योः
b J,BB पक्व (BB क्वा). J,B सम्यक् नाम्नाख्यो, BB समग्राख्यो submetric
108 a J,B,BB मधुशीर्षो(J षाः). B समधुरो. J भेद्यो. J-पहा
b B सुष्टु BB-कारकाः

अथ आपूपम् ।

समितां खण्डितारव्येन मेलयित्वा सुमर्दिताम् ।
घृते विस्तार्य विपचेत्सुवृत्तो मृदुपूपकः ॥१०९
अपूपः पुष्टिदो बल्यो हृद्यो गुरुतरः स्मृतः ।
पित्तानिलहरो वृष्यः सुपथ्यो रुचिकारकः ॥११०

अथ दधिवटिका ।

शालिपिष्टं युतं दध्ना मर्दयित्वा घृते पचेत् ।
वेष्टयेत्पक्वखण्डेन सुवृत्तं दध्यपूपकम् ॥१११
दध्यपूपो गुरुर्वृष्यो बृंहणोऽनिलपित्तहा ।
हृद्योऽग्निजनकश्चैव विशेषाद्रुचिकारकः ॥११२

अथ तरद्वटिका ।

घृतेन मर्दितां दध्ना कणिकां फेणयेत्ततः ।
विधाय वटिकास्तस्या घृते मन्दाग्निना पचेत् ॥११३
प्रलिप्ताः खण्डपाकेन कर्पूरेण विमिश्रयेत् ।
तत एताः समरिचास्तरद्वट्य इति स्मृताः ॥११४
बल्याः पुष्टिकरा हृद्या वृष्याः पित्तानिलापहाः ।
सुस्निग्धाः कफदाः शीघ्रं किञ्चित्सन्धानकृत्क्रिमाः ॥११५

---

109 a Title B अथ पूपं, C-निर्माणविधिर्गुणाश्च. J,BB गुडलोचेन, B खण्डलोचेन (for खण्डितारव्येन) J,B,BB सुमर्दितां: (B तां)
b J मृदुपूरकाः.
110 a BB आपूप. J गुरुतर
111 a Title C-निर्माणविधिर्गुणाश्च. B शालेः पिष्टं J मर्दयित्वा.
b J,B दधिपूरकं.
112 b BB जनेन (for जनक)
113 a Title C-निर्माणविधिर्गुणाश्च. J कनिक्या B,BB मर्दिता. J फेनयेत्ततः
b J-तस्या, पेचत्
114 a J विमिश्रुयेत्
b B,BB illegible
115 a J,B,BB वल्या (J ल्या), वृष्या. B,BB-पहा.
b J,B,BB कफदो त्वर्थं BB-क्रिमान्.

अथ बदरचूर्णपूरिका ।

घृतमिश्रकणीकायां मेलितं पञ्चमांशकम् ।
बदरत्वग्भवं चूर्णं जलेनालोड्य पीडयेत् ॥११६
पूरिका च घृते पक्वा खण्डपाकविलेहिता ।
पूरिका बदरोन्मिश्रा स्निग्धा पित्तहरा हिमा ॥११७
मधुरा तर्षवातघ्नी सरा छर्दिविनाशिनी ।
एवं प्रियालखर्जूरशर्करानालिकेरकैः ।
द्राक्षया च सुपुर्यास्तु पूरिकाः पूर्ववत्पचेत् ॥११८

अथ चणकपूरिका ।

त्रिभागं चाणकं चूर्णं गोधूमस्यैकभागकम् ।
यवानीहिङ्गुलवणैः सार्धं तैलं विपाचिता ॥११९
कटुके कफवातघ्नी रुच्या वह्निप्रबोधिनी ।

अथ धारापूपकम् ।

घृतोन्मिश्रा कणीका या दुग्धेनालोडिता तु सा ।
धाराख्यापूपकं स्वाज्ये पक्वं खण्डेन योजयेत् ॥१२०
आपूपकं सुमधुरं बृंह्यं पित्तहरं परम् ।
सुस्निग्धं रोचनं हृद्यमत्यर्थं वातनाशनम् ॥१२१

---

116 a Title C - निर्माणविधिर्गुणाश्च. J, B, BB कणि(B, BB णि) कया या.

117 a B सा पूरिका, BB पूरिता

118 a J, BB सुमधुरा तान्वातघ्ना (घ्नी). BB सर्दि- B मधुरा ---- वातघ्नी hiatus
b J एव, -केरकाः BB पृयालु.
c Title C-निर्माणविधिर्गुणाश्च, J, B, BB omit. J पूर्विका BB द्रक्षया
B वै (for च) B, BB पू(B पु) रिका BB सु (for स्तु).

119 a Title C - निर्माणविधिर्गुणाश्च, J, BB omit this stanza.
b B विपाचितं.

120 b Title C - निर्माणविधिर्गुणाश्च. J, B omit this line, J कणिक्या.
c J योजितं, BB नियोजयेत्

121 a J समधुरं
b B सुस्निग्धं.

अथ जलेबी-कुण्डलिकेति केचित् ।

द्विप्रस्था शुद्धसमिता प्रस्थं गोधूमजालितम् ।
विमर्द्य पयसा स्थाप्यं व्रजेद्यावत्तदम्लताम् ॥१२२
सच्छिद्रे नालिकेरस्य पात्रे निक्षिप्य निर्मले
परिभ्राम्य परिभ्राम्य घृते तप्ते विपाचयेत् ॥१२३
कर्पूरवासितां सूपविधिज्ञैर्नृपवल्लभाम् ।
सुपक्वां कङ्कणाकारां सितालेहे विनिक्षिपेत् ॥१२४
सा तु कुण्डलिका नाम जलेबीति प्रकीर्तिता ।
धातुपुष्टिकरा वृष्या हृद्या चेन्द्रियतर्पणी ॥१२५

अथ वर्बरम् ।

जलेनालोडितं शालिपिष्टकं खण्डमिश्रितम् ।
धारापूपकवत्पाच्यं प्रोक्तं तद्बर्बराख्यकम् ॥१२६
बर्बरं बलकृत्सद्यः श्रेष्ठं पित्तानिलापहम् ।
रोचनं कफकृच्छीतं हृद्यं हृल्लासनाशनम् ॥१२७

अथ खण्डखर्जूरम् ।

दध्नाऽऽलोडितया शालिपिष्टयुक्तकणिकया ।
धारया युक्तिसंपक्वं पादुकाकृति दीर्घकम् ॥१२८

---

122 a Title C-कादीनां निर्माणविधिर्गुणाश्च. BB द्विप्रस्थाया सुद्धसमिताप्रस्थं.
123 a J नारिकेरस्य, निःक्षिप्य B सछिद्रे, BB सक्षिद्र, BB पत्रे B निर्ममेत् (for निर्मले).
124 a J, BB -वासिता, J सूदैर्विधि- J, B, BB नृपवल्लभैः.
b J, BB सुपक्वा J विनिःक्षिपेत्, BB -कारं, सितालेहि.
125 a BB कुंडलका
b B-तर्प्पिणी, J-तर्प्पणी BB वन्द्या (for वृष्या), चेंद्रिप्रत्तर्पिणी.
126 a Title C-निर्माणविधिर्गुणाश्च, B-वर्वरं, J-बर्व्वरं. BB-पिष्टितं, -लोहितो.
b BB त्साद्यं (for त्पाच्यं), प्रोचो (for प्रोक्तं).
127 a B -सद्य, BB -सद्यं.
b J -छीतं.
128 a Title C-निर्माणविधिर्गुणाश्च, BB-खर्जरी. J कणिक्यया.
b J, B, BB धारया, J स्वादुका (for पादुका) J, B दीर्घिका. C धारयाः

बहिः खण्डेन लिप्तं च खण्डखर्जूरकं विदुः ।
खर्जूरं वातहृद्बल्यं सुस्निग्धं स्वादुशीतलम् ॥१२९
पित्तहृद्बृंहणं हृद्यं किञ्चित्कफकरं सरम् ।

अथामृतरसा ।

तृतीयभागखण्डेन मिश्रितं षष्टिपिष्टकम् ।
शुभ्रमीषद्दधियुतं मर्दयेद्दृढपाणिना ॥१३०
एवं सुमर्दितं कृत्वा स्थापयेद्रजनीमितम् ।
ततोऽन्यस्मिन्नहन्येव गतत्वक्तिलचित्रितम् ॥१३१
विधायापूपकं चैव तविकायां घृते पचेत् ।
ततोऽमृतरसा एव वातहृद्बलवर्धना ॥१३२
अशेषकहरा हृद्या सुशीता पित्तहृत्क्षिमा ।

अथ कर्पूरनालिका ।

कणिका सर्पिषा युक्ता तोये पिण्डितमर्दिता ।
ततः कृता पोलिकेव पीठके चतुरस्त्रिका ॥१३३
वेष्टयेत्पक्वखण्डे द्वे पार्श्वाभ्यां चतुरङ्गुले ।
ततस्ते नालिके व्योते चित्रयेदथ पाचयेत् ॥१३४
घृतेऽथ तत आकृष्य कर्पूरेण नलीद्वयम् ।
पूरितं घृतखण्डाभ्यां कर्पूरी नालिका भवेत् ॥१३५

---

129 a J खंडनं, B खंडिनं.
b B -शीतलं. BB सुस्निग्ध.
130 a J -कफरं. BB वन्द्यं (for हृद्यं).
b Title C -निर्माणविधिर्गुणाश्च, J, B अर्धमृतरसा. BB त्रितयं-
c J शुभ्रमेतद्दधियुतं, B शुभ्रा-. BB शुभ्रं आशिषददियुतं.
131 b J, . निस्त्वचतिलसित- B, BB निस्त्वचतिलसित. B चित्रकं
132 a J, B, BB विधाय-, B पूपकं. J, B, BB तेन (for चैव), C तैव, J तविकायां
b J, B, BB वतहृद्बलविवर्धनः (B नं)
133 a Title C -निर्माणविधिर्गुणाश्च, B -नालिका. J कणिकया J, B, BB युक्ता (BB भि) क्ता.
b J, B, BB च(B क)तुरस्त्रया. BB पालिकेव.
134 a J, BB पार्श्वभ्यां. B वेष्टव्यं.
b J चित्रवयेदथ, B छिद्रयेदथ, नालि
135 a J ओकृष्ये, B आकृषेत.

अथामृतनालिका ।

किञ्चित्काञ्जीकया युक्ता नष्टदुग्धमयी च सा ।
कृता कर्पूरनालीवत्सैवामृतनली मता ॥१३६

कर्पूरनालिका बल्या वृष्या पित्तानिलापहा ।
पुष्टिदा रुचिदा स्निग्धा गुर्वी सन्धानकृत्सरा ॥१३७

अथ कसारः ।

घृते तप्ते विनिक्षिप्य कणिकां पाचयेन्मनाक् ।
ततस्तत्र विनिक्षिप्य खण्डं भागसमं पचेत् ॥१३८

ततश्चाकृष्य तत्पात्रे क्षिप्तं सम्यक्सुचिक्कणे ।
चतुरस्रीकृतं यत्तद्भवेत्कासारसंज्ञकम् ॥१३९

कासारं रुचिरं श्रेष्ठं नातिरुक्षं न पिच्छिलम् ।
हल्लासकफपित्तघ्नं विरुच्यौ रुचिकारकम् ॥१४०

पूर्ववन्माषशृङ्गाटकसेरूणां पृथक्पृथक् ।
शालूकस्य च कर्तव्यं कासारं खण्डसर्पिषा ॥१४१

---

136 a Title B अथाऽनालिका, C-निर्माणविधिर्गुणाश्च. J,B,BB काणिक्याविद्युता
J,B तु या (for च सा). BB नष्टदुग्धामयी तथा (for the post half)
b B सैधामृतनलीमता (for the post half).

137 a BB वृष्या रुच्या (for बल्या वृष्या)
b B रुचिदा BB सदा (for सरा)

138 a Title C-निर्माणविधिर्गुणाश्च, J-कसार, B-कासारः, BB-कसार.
J विनिःक्षिप्य. B,BB कणिका. B मनाक्च. J omits the post half.
b J omits the prior half. BB मृष्टसमं.

140 a J रुचिद, -रुक्षं. J,B पिच्छलं B कासार, सूक्ष्मं (for श्रेष्ठं)
b J रुचिर्चौं. B विरुचिकारकं.

141 a J प्राग्वत्, B,BB प्राग्विवत्.
b J,B,BB कसारं.

अथ सेविका ।

कणिकावर्तिकाः कृत्वा सुसूक्ष्मा यवमात्रिकाः ।
सुशुष्का भक्तवत्पाच्या भोज्या खण्डघृतान्विताः ॥१४२

सेविकेति समाख्याता गुर्वी पित्तानिलापहा ।
सन्धानजननी सेव्या श्रावण्यां स्तोकमात्रया ॥१४३

पक्वान्नं यदिह ज्ञातं तदुक्तं दशमोत्सवे ।
क्षुद्बोधजनकं वस्तु किञ्चिदाचक्षतेऽधुना ॥१४४

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले ग्रन्थे पक्वान्नप्रशंसनो नाम दशमोत्सवः ॥१०॥

---

142 a Title C-निर्माणविधिर्गुणाश्च, J,BB कर्णिकां (BB काः). B, BB -वर्तिका. BB - मात्रका, J, B मात्रिका.
b J सुशुष्कां, भोज्यां . B -न्विता

144 a B पक्वान्नं. J यदिहा, B यदिदं. J ज्ञानं, B ज्ञात्वा, BB ज्ञात.
b B, BB -जननं . BB वक्ष्यते (for चक्षते ).

COLOPHON : B ग्रंथे (for ग्रन्थे), transposes क्षेमकुतूहले and ग्रन्थे.

—x—x—x—x—x—

अथैकादशोत्सवः ।

अथ क्षुद्बोधकवस्तूनि ।

तक्रं चिरं क्वथितमर्पितशृङ्गवेरं
बाल्हीकसैन्धवरजोमरिचाल्पचूर्णम् ।
एलाभवेन रजसा सुरभिकृतं च
तूर्णं प्रदीपयति शान्ततनूनपादम् ॥१

अजाजीधान्याकैर्मरिचरजजीमेथिककणैः
समं पिष्टं तक्रे क्वथितमतैः सारकफलैः ।
युतं सिन्धूत्थेन ज्वलितनवबाल्हीकसुरभिः
प्रलेहः संदेहं जनयति सुधायामतिरसः ॥२

प्रलेहः पाचनो हृद्यो रुच्यो वह्निप्रदो लघुः ।
कफानिलविबन्धघ्नः किञ्चित्पित्तप्रकोपकः ॥३

अथ नारङ्गक्षुद्बोधकम् ।

नारङ्गकेसरमपाकृतबीजपुञ्जं
योऽश्नाति खण्डमरिचोद्भवचूर्णमिश्रम् ।
अन्नं गले विशति तस्य नरस्य तूर्णं
संगृह्यमाण इव राहुभयेन चन्द्रः ॥४

---

1 a Title C-वस्तुनिरूपणम्, B-क्षुद्बोधवस्तूनि, J अथ प्रलेहः. B शृंग-J,B-अर्पित-
b J चाव (for चाल्प)
c J सुरभी- B च (for त) BB-रसेन (for-भवेन).
d J,B तूर्णतरं व्रजति (for the prior half). BB तत्क्षुदकर्तृतीतरसुद्बोधयति-शांतनूनजपादं hypermetric, corrupt.

2 a J,B,BB धान्याकं, मरिच. J,BB तंदुल (for मेथिक). BB कणे. B-रजानीतं तुषकणैः.
b J,BB-ममलैः (BB लैः) BB सम पिष्टे, -फलैः.
c J सिंधूत्थेन B तव (for नव), -सुरसी BB युतं, ज्वलीननवाल्हीक
d B संदेहे, जनयमति रसः submetric

3 b BB कफपित्तानिल- hypermetric

4 a Title C-निर्माणविधिर्गुणाश्च, B अन्नबोधकं, BB-बोधकं. B समा (for मपा)
b B-मरिच- BB योश्नाति
c J,B चूर्णं (for तूर्णं) BB गात्रं (for गले)
d J राहुग्रहेण, B राहुग्रहेण BB राहुग्रहे हि चन्द्रः.

आरुणं नु वरं रुच्यं सुगन्धमतिचारुणम् ।
वातघ्नं कफदं किञ्चित्पित्तघ्नं विशदं स्मृतम् ॥ ५

अथ जम्बीरभेदम् ।

विभावितं शुभ्रसितामरीचैरेलारजोभावनयाऽतिरुच्यम् ।
जीवातवे तस्य नरस्य भोक्तुर्जम्बीरजं केसरमाद्रियन्ति ॥ ६
जम्बीरः पाचनो हृद्यः कफवातहरः परः ।
सुरभिर्दीपनो रुच्यो मुखवैशद्यकारकः ॥ ७

अथ बीजपूरकम् ।

सैन्धवार्द्रकसंयुक्तं बीजपूरकमत्ति यः ।
शाकिनीभिरिवाकृष्टं विशत्युदरमोदनम् ॥ ८
केसरं मातुलुङ्गस्य लघु श्लेष्मानिलापहम् ।
रोचनं दीपनं हृद्यं गुल्मशूलार्शसां जयेत् ॥ ९

अथ बीजपूरकषड्ऋतुभक्षणम् ।

सिन्धूत्थेन घनागमे च सितया काले शरत्सातपे
हेमन्ते लवणार्द्रहिङ्गुमरिचैः सिद्धार्थतैलान्वितैः ।
एतैस्तैः शिशिरे मधावपि तथा ग्रीष्मे गुडेनान्यथा
सर्वान् दोषचयान् करोति नितरां द्राग्बीजपूरः सदा ॥ १०

---

5 a B, BB परं (for वरं), B -वारुणं. BB तव्यं (for रुच्यं), सुगन्धेध-
b BB कफतं. J विशरं.
6 a Title C- मुद्बोधकनिर्माणविधिर्गुणाश्च. J -सुरुच्यं (for अतिरुच्यम्)
b J वातसत्वस्य (for तस्य नरस्य). J, B भोक्तुं (B वतं). B, BB -माद्रियंति.
7 a J, B, BB रुच्यः (for हृद्यः)
b J, B, BB हृद्यो (for रुच्यो)
8 a Title C- मुद्बोधकनिर्माणविधिर्गुणाश्च BB -वार्द्रक-
b B-वाकृष्ट, -मोचनं (for -मोदनम्)
9 a B केशरं, -निलापदं.
b J omits from $9^b$ to $12^b$
10 a Title C -पूरकस्य षड्ऋतुभक्षणविधिनिरूपणम्. BB धनागमेव, सरत्-
b B तैलातितैः
d BB सर्वे, -चयात्करोति, तरां (for नितरां)

अथ तिलकल्कसंस्कारः ।

तिलकल्कं सनिम्बूकसैन्धवार्द्रकमत्ति यः ।
तस्याग्निमभयः पुंसो हेमन्तेऽग्निः प्रजायते ॥ ११

तिलनिम्बादिसंयुक्तः कल्को रुच्यो बलप्रदः ।
वह्निसंजननः प्रोक्तो विशेषेणानिलापहः ॥ १२

अथ सट्टकम् ।

लवङ्गव्योषखण्डैस्तु दधि निर्मथ्य गालितम् ।
दाडिमीबीजसंयुक्तं चन्द्रचूर्णावचूर्णितम् ॥ १३

सट्टकं तु प्रमोदाख्यं जलादिभिरुदाहृतम् ।
हृद्यं सुगन्धि मधुरं स्निग्धं वातहरं लघु ॥ १४

पित्तघ्नं तृप्तिदं बल्यं सुरुच्यं सट्टकं स्मृतम् ।

अथ विष्यन्दनः ।

दधिक्षीरे समे पक्त्वा त्वर्धभागावशोषिते ॥ १५

अष्टमांशान् क्षिपेत्तत्र तन्दुलान्निस्त्वचांस्तिलान् ।
प्रियालपनसाब्जानां मज्जां मात्रासमां क्षिपेत् ॥ १६

क्षीरार्धं घृतं चैव शर्करां च तथा न्यसेत् ।
सिद्धे त्रिकटुकोपेतः कर्पूरेणाधिवासितः ॥ १७

---

11 a Title C अथ तिलकल्कसंस्कृतनिम्बूकस्य भक्षणगुणाः, BB - कल्के - (for कल्क) BB सचि-बुकं.
b B मितं वचः

12 a B, BB संयुक्तं. BB-निंबादि- B, BB कल्कं (BBक), रुच्यं, बलप्रदं (B दे:)
b BB वह्निसंजनं, B-संजननं. B, BB प्रोक्तं, -पहं.

13 a Title C-निर्माणविधिर्गुणाश्च, B-सार्द्रकं. BB व्योम (for व्योष)

14 a BB तलादि (for जलादि).

15 b Title C-निर्माणविधिर्गुणाश्च, J-विष्यंदिनः. J, BB-क्षीर J-शेषिते. B दधीची.

16 a J-न्नस्त्वच-, B-निस्वच-, BB-न्निस्तिव- BB अष्टमांसं, तक्रं (for तत्र)
b B प्याला (for साब्जानां) B, BB मज्जा मात्रं समं क्षिपेत् (for the post half)

17 a BB omits घृतं and (is) submetric, शर्करा
b B-वासिता:

एष विष्यन्दनो नाम देवानामपि दुर्लभः ।
यस्मिन् पक्वेऽपि हि घृतं स्यन्दते सर्वतोमुखम् ॥१८
तस्मात्सूपविधानज्ञैर्विष्यन्दन इति स्मृतः ।
विष्यन्दो बृंहणो हृद्यः पित्तानिलहरो गुरुः ।
रुच्यो बहुतरं स्वादुर्बलशुक्रकरो हि सः ॥१९

अथाम्रपल्लवमुकुलप्रकारौ ।

आम्रातकस्य नवताम्ररुचः प्रवालाः
खण्डीकृता लवणमिश्रितपिण्डिताश्च ।
बाल्हीकधूपनजुषो घृतदुग्धसिक्ताः
संदीपयन्ति पवनस्य सखायमेते ॥२०

मुकुलः सहकारशाखिनः शतखण्डीकृतसैन्धवान्वितः ।
दधिमन्थमरीचसंस्कृतश्चिरजामरुचिं छिनत्ति हि ॥२१
कफपित्तहरौ हृद्यौ मुखवैरस्यनाशनौ ।
वह्निसंजननौ रुच्यौ चूतजौ पुष्पपल्लवौ ॥२२

अथ मृणालमुद्बोधकम् ।

बिसाङ्कुराश्चन्द्रकलानुकारिणो
विभाविताः सैन्धवनिम्बुकाभ्याम् ।
विकीर्य खण्डीकृतशृङ्गवेर-
जलेऽपि वह्निं लघु दीपयन्ति ॥२३

---

18 b BB च (for हि), स्यँदतो

19 c B, BB -बल- BB बहुतर

20 a Title B -प्रकारौ, BB अथाम्रमुकुलपल्लवमुकुलप्रकारमाह. J -प्रकारः C अथाम्रपल्लव-मुकुलयोः संदीपनप्रकारनिर्माणविधिर्गुणाश्च . J रुच्य:, BB रुच्यव: B -रुचि
b BB वंडिताश्च
c J, BB -युषो . B घृतसिंधुयुक्ता submetric. J-सा हो, BB सिक्ता .
d J सरवा च तेषु, B रेते (for मेते), BB वयस्यमेते.

21 a J-सैंधवान्वितः B संभवः (for शाखिनः) BB सहकारस्य शिखा, संतखंडी
b J -मरोचिसस्थूत-, J, B, BB -जातामरुचिं B-मरीचिसंयुतं-, BB-मरीचिसंस्कृतं-

22 a B कफपित्तघ्नौ
b J, BB पुष्पपल्लवचूतजौ B रुच्यो

23 a Title C-मृणालस्य मुद्बोधननिर्माणविधिर्गुणाश्च J, B, BB कारा (for कारिणो)
c J, B, BB विकीर्ण, -वेरा . B खांडीकृत-
d B वह्नि

मृणालं शीतलं रुद्धं कषायं कफनाशनम् ।
रक्तपित्तहरं स्वादु दुर्जरं दाहनाशनम् ॥२४

अथ शिग्रुमूलजम् ।

धौतं कुञ्जरदन्तदीप्तिसदृशं सिन्धूत्थतैलासुरी-
पीताभिः क्रमितोत्तरोत्तररसं मूलं नवं शिग्रुजम् ।
तस्याहो वदनान्तरे निविशते श्रीचन्द्रचूडप्रिया-
पादाम्भोरुहरेणुरञ्जितशिरा यः पूर्वकाले पुमान् ॥२५
शिग्रुमूलं तु वातघ्नं श्रेष्ठमर्शोविनाशनम् ।
शमनं स्नायुरोगस्य पित्तकृत्कफनाशनम् ॥२६

अथामलकफलम् ।

स्निग्धं धात्रीफलं यज्ज्वलदनलशिखासन्निभं स्निग्धपात्रे
क्षिप्तं प्रभृष्टहिङ्गुकणराजिरजस्तैलसिन्धूत्थयोगैः ।
संश्लिष्टं जातपाकं कतिपयदिवसैरुल्लसत्सौरभाढ्यं
तस्य स्वादानुवादं कथितुमपि वरो नेश्वरः कस्तदन्यः ॥२७
हन्ति पित्तं तु माधुर्यात् कफं तिक्तकषायतः ।
वायुमम्लप्रभावत्वाद्धात्री दोषत्रयापहा ॥२८
अग्निसंजननं द्रव्यमुक्तमेकादशोत्सवे ।
यदग्निपोषकं वस्तु क्षीरतक्रमथोच्यते ॥२९

इति श्रीभरद्वाजमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले
ग्रन्थे क्षुद्बोधकवस्तुप्रशंसनो नामैकादशोत्सवः ॥ ११ ॥

---

24 b B दाघनाशनं, BB व्याधिनाशनं.
25 a Title C-क्षुद्बोधकनिर्माणविधिर्गुणाश्च, BB-शिग्रू-. B धौताकूरंजदन्त- BB धौत.
b J,B,BB रात्रैः संक्रमितो-. BB-कृतरसं. J नव.
c B निविशितं, BB निविसते. J -चंद्रचंड-
d B -शिरो, BB-शिर. J प्राथ्यकाले, B,BB प्राधीकाले.
26 b BB inserts: अत्र त्रुटितं पत्रमेक and omits from 26ᵇ upto colophon. B कफनाशन
27 a Title-फलस्य क्षुद्बोधकनिर्माणविधिर्गुणाश्च. J स्निग्धं (for स्निग्धं), य (for यज्)
b J,B,BB प्रभृष्टबालकणिकण-
c J संश्लिष्टं स्यातिपाकं
d J स्वादं कथयितुमलं नेश्वर submetric.
28 a J,B माधुर्याज्जयते पित्तं (for the prior half) J श्लेष्माणं चकषायतः (for the post half).
29 b J धात्वादि पोषकं यच्च (for the prior half). B यादग्नि-

COLOPHON B क्षुद्बोधवस्तु-, J क्षुद्बोधवर्ण-.

द्वादशोत्सवः ।

अथ गोरसपानकादिकथनम् ।

अथ चन्द्रप्रभा-क्षीरिका ।

शुभेऽर्धावथिते दुग्धे घृताक्तान् तन्दुलान्न्यसेत् ।
संसिक्ता मधुसंसिक्ता क्षीरी चन्द्रप्रभा भवेत् ॥१
कुङ्कुमं च विनिक्षिप्य पचेत्पीतत्वहेतुना ।
चन्द्रप्रभाकृतिः क्षीरी रक्तपित्तविनाशिनी ॥२
विष्टम्भजननी बल्या धातुपुष्टिप्रदायिनी ।

अथ राजपायसम् ।

निर्नीरपाचितपयः प्रहिताष्टभागं
श्यामाकतन्दुलजवं निभृतान्तरोष्मा ।
तत्पायसं सरसभावसथं सुधायाः
को वेत्ति भूपतिमृते घृतखण्डसाकम् ॥३
पायसं दुर्जरं बल्यं धातुपुष्टिविवर्धनम् ।
विष्टम्भजननं हन्ति रक्तपित्ताग्निमारुतान् ॥४

अथ नारङ्गक्षीरिणी ।

क्षिप्त्वा नारङ्गमज्जां वै पचेत्सर्पिषि तापिते ।
तत्र खण्डं च निक्षिप्य पक्वं मत्वाऽवतारयेत् ॥५

---

1 a Title C-निर्माणविधिर्गुणाश्च, B-पानकादिकं, J,B अथ क्षीरिका. J,B शुभेथ. J पचेत् (for न्यसेत्) BB omits this line.
b B मधुरं सिक्ता, क्षीरं, भीध (for भवेत्)
2 a J,B,BB वा (for च) J विनिःक्षिप्य B पाचेत्-
b BB -कृति.
3 b Title C-निर्माणविधिर्गुणाश्च. J-ष्टमांशं, B,BB-तोष्टमांसं (BB सं)
c BB तंडुल. J निभृतंतरोष्मं, B निभृतांतशेषां, BB निभृतांतराष्ट्र corrupt.
d J-वासव (for -वसथं) BB-भावसप्र B रभावसतं (for सरसभावसथं).
e J,B विना (for मृते). J शाकां
5 a Title C-निर्माणविधिर्गुणाश्च B-क्षीरिका, BB-क्षीरीणि. J,BB मज्जं BB पाचिते (for तापिते)
b J निःक्षिप्य. B पक्वं, omits मत्वा.

शीलीभूते विजिह्मित्य मात्रेवार्द्धश्रृतं पयः ।
जारङ्गक्षीरिणी चैषा सुगन्धसुरभीकृता ॥६
विष्टम्भिनी हरेद्वातं पित्तं च गुरुपाचिका ।

अथ नालिकेरक्षीरिका ।

नालिकेरं पयः स्विन्नं खण्डितं सिक्थकाकृतिः ॥७
मेलयेच्छर्करायुक्ते क्षीरे क्वथितगालिते ।
धूपिताऽगुरुणा क्षीरी नालिकेरादिजा भवेत् ॥८
नालिकेरोद्भवा क्षीरी स्निग्धा शीताऽतिपुष्टिदा ।
गुर्वी सुमधुरा वृष्या रुच्या पित्तानिलापहा ॥९
एवं कूष्माण्डमज्जादेस्तथा वंशाङ्कुरादपि ।
कदलीनां फलान्मूलात् कर्तव्या क्षीरिका बुधैः ॥१०

अथ दधिबल्कविधयः ।

बहुश्रद्दनास्तु गोः क्षीरं माहिषं वा विपाचितम् ।
सुशीतं स्थापितं पात्रे नवीने तक्रसंस्कृतम् ॥११
शङ्खानुकारि तच्छुभ्रं चन्द्रवत्ससरं दधि ।
इष्टं तन्मकराघातैः (?) स्फोटितं परिवेषितम् ॥१२

6 a J शीतं भुजे, विनिःक्षिप्य, मात्रै-, -सृतं BB मात्रार्द्धमिश्रितं.
b B -क्षिरणी, BB -क्षीरिणि B सुगंधा सुरभि.
7 a J विष्टंभीनी
b Title C -निर्माणविधिर्गुणाश्च B,BB नालिकेर, J शिकताकृतं, BB सिचकाकृतं, B -आकृतिं.
8 a J, B छर्करायुक्ते
b J नारिकेरा-. BB धूमिता गरुणा क्षीरि नालिकेलादि वा भवेत्. B -दिना.
9 a J नारिकेरो- BB क्षीरि
b B समधुरा
10 a J, B, BB -मज्जादीन्
b BB फलामूलात्
11 a Title C -निर्माणविधिर्गुणाश्च, J अथ दधि, B -बिल्कविधया, -वल्कइव्या.
J बहुश्रध्यास्तु, B, BB omit बहुश्रद्दनास्तु J, B, BB गो J व (for वा), विपाचितः
b J -संस्थितं (for -संस्कृतम्), B -संस्कृजं, BB -संस्कृते.
12 a J कंद्वानुकारि, B कंडानुकारि, BB कंवानुकारि J, BB तच्छुभ्रा (J भ्रे) J, B, BB -सतरं.
b J मातृन्मिमकराघातैः, B मातृनमिकराघातै, BB मातृनिन्मकराघातै (for the prior half)

एवं शशाङ्कधवलं दधिशुक्लनीरं
संमिलितसैन्धवयुतं सह शृङ्गवेरम् ।
प्रमृष्टजीरसुरभीकृतमस्य योगा-
दुद्दीपितो भवति जाठरजातवेदाः ॥१३

शृतक्षीरात्तु यज्जातं गुणवद्दधि तत्स्मृतम् ।
वातपित्तहरं रुच्यं धात्वग्निबलवर्धनम् ॥१४

अथ गव्यम् ।

गव्यं दध्युत्तमं बल्यं स्वादु पाके रुचिप्रदम् ।
पवित्रं दीपनं हृद्यं पुष्टिकृद्दोषनाशनम् ॥१५

अथ माहिषम् ।

माहिषं मधुरं पाके वृष्यं पित्तानिलापहम् ।
बलमेदःकरं स्निग्धं सुशीतं कफकृद्वरम् ॥१६

अथाजम् ।

दध्याजं कफपित्तघ्नं लघु वातक्षयापहम् ।
दुर्नामश्वासकासेषु हितमग्नेश्च दीपनम् ॥१७

दधि नक्तं न सेवेत सेव्यं चेद्धै ससूपकम् ।
सक्षौद्रं शर्कराभिश्रं सेवेतामलकैर्युतम् ॥१८

---

13 a J, B, BB एवं (B एवं) का (for एवं. J, B -शुद्धनी- C शशाङ्के-
b J -सैंव (for सैन्धव) BB -तरः (for -युतं)
d BB दुर्दीपितो, -वेदाः
14 a J -धनं (for -त्तु यज्ज). BB -स्मृता.
b BB -वर्धिनी.
15 a Title C- गवस्य गुणनिरूपणम्. J बलप्रदं (for रुचिप्रदम्)
b J दीन (for दीपनं) BB omits this stanza.
16 a Title C- माहिषस्य गुणनिरूपणम्.
b J, B, BB -मेदकरं. BB स्निग्ध.
17 a Title C -अजस्य गुणनिरूपणम्, B -अथाजं. BB वात (for वातं)
b BB दुर्नमस्वासकासेषु
18 a Title C- अथ दध्नः सामान्यसेवनविधिर्गुणाश्च. BB नक्त, ससूपक
b J सक्षाद्रं, BB सक्षौद्र.

शरद्वसन्तयोर्वैद्यैर्निन्दितं प्रायशो दधि ।
प्रावृड्शिशिरहेमन्ते संसेव्यं दधि पण्डितैः ॥१९

शाल्योदनेन संयुक्तं सततं माहिषं दधि ।
गोष्ठगोपाङ्गनादत्तं प्रत्यहं स्मरणं हरेः ॥२०

बाल्यं दध्योदनं वातपित्तहृत्पुष्टिकारकम् ।
सुरुच्यं ग्राहिकं हृद्यं स्थूलत्वमतिकारकम् ॥२१

अथ शर्करादिसहिता दधिगुणाः ।

सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित् ।
सगुडं वातनुद्वृष्यं बृंहणं कफदं गुरु ॥२२

अथ ऋतुविशेषविधिनिषेधौ ।

हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते ।
शरद्वसन्तग्रीष्मेषु प्रायशस्तद्धि गर्हितम् ॥२३

अथ घोल,मठा इति केचित् ।

मस्तुना रहितं गाव्यं दधि शुभ्रतरे पटे ।
जीरसैन्धवसंमिश्रं घोलं घनतरं स्मृतम् ॥२४

जीरसैन्धवसंयुक्तं घोलं वातस्य नाशनम् ।
अतिसारे च मन्दाग्नौ हितं रुच्यं बलप्रदम् ॥२५

---

19 a B -वैद्यै, निंदितं, प्रायसो. BB दधिः
b BB omits this line. J, B हेमंतेशिशिरेप्रावृषि (B ३)
20 a B सतरं महिषी दधि (for the post half). BB omits this line.
b J -गोपांग-, B, BB, J स्मरतः (J न्). BB गोष्ठ गोपांगनादंगान्प्रत्यहं.
21 a B -पित्तहृ-
b N -नतिकारकं BB omits this line.
22 a Title C-सहित- J, B, BB omits from 22[a] to 23[b].
24 a Title J-छोड-, B -घोलं-, BB -छोलो भागं-, C-मठादिनिर्माणविधिर्गुणाश्च।
J -रहित, शुभ्रतरे. BB वामस्तुना.
b B संयुक्तं (for संमिश्रं) J छोडं BB छोडं, जीरा-
25 a J घोलं वातप्रणाशनं, BB छोरं वातविनाशनं (for the post half), B संमिश्रं (for संयुक्तं), वातप्रनाशनं.
b J हिन (for हितं). B अतिशारे BB मंदाग्नि हृतं.

अथ हिङ्गुवासितघोलम् ।

वस्त्रे दृढतरं बद्धं दधि दुग्धेन गालितम् ।
हिङ्गुना धूपिते पात्रे स्थापितं सैन्धवान्वितम् ॥२६
घोलकं वातहृद्बल्यमर्शोऽतीसारनाशनम् ।
सुरुच्यं पुष्टिदं बल्यं पक्वशूलविनाशनम् ॥२७

अथ तक्रम् ।

तुर्यांशेन जलेन संयुक्तमतिस्थूलं सदम्लं दधि
प्रायो माहिषमंशुकेन विमले मृद्भाजने गालयेत् ।
भृष्टं हिङ्गु च जीरकं च लवणं राजीं च किञ्चिन्मितां
पिष्ट्वा तत्र विमिश्रयेद्भवति तत्तक्रं न कस्य प्रियम् ॥२८
तक्रं रुचिकरं वह्निदीपनं पाचनं परम् ।
उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ॥२९

अथ दुग्धम् ।

विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥३०
दुग्धस्यापरे गुणा उक्ता एव ।

---

26 a Title C - घोलकनिर्माणविधिर्गुणाश्च, J - घोडकं, B - घोलकं, BB - वासितं वटकं.
b J सौंधवाधितं.
27 a J घोडकं, BB घोडकं, B - द्बल्यं अर्शा -
b J वस्ति, B, BB पंक्ति (for पक्व-)
28 J, B, BB omit from 28 up to 32 and insert:

अथ द्रवंती (B द्रवंति) शिखरिणी ।

दध्यंबुरहितं (B तं) पात्रे खंड दुग्धेन गालितं ।, (BB omits this line).
कर्पूरमरिचोन्मिश्रं द्रवंती परिकीर्तिता (B द्रवंतीनाम मात्रिकं for the past half.) ॥
द्रवंती (B ति) मधुरा (J मरा) वृष्या बल्या पुष्टिकरा हिमा (BB हि सा) ।
वातपित्तहरात्यर्थं किंचित्कफकरा हि सा ॥

अथ भीमी रसाला

अर्धाढकं क्वथितपर्युषितस्य दध्नः (B दध्नो, BB दध्न) ।
खंडस्य षोडश पला (BB लो नि शशिप्रभस्य Submetric ॥
सर्पिः (B र्पि:) पलं मधुपलं (B illegible) मरिचार्द्धकर्ष शुंठी ।
तथार्द्धपलमर्द्धं च चूर्ण (B चूर्ण . submetric. ॥
शुभ्रे पटे ललनाय मृदु पाणि घृष्टं (B टं) ।
कर्पूरधूलिसुरभीकृत (BB तं) भांड संस्था (B स्थं, BB सस्था) ॥
एषा वृकोदरकृता सु (B स) रसा रसाला (BB र) ।
पीता (B त्वा) निवारयति दारमति प्रणीतं (B प्रणीतं, BB प्रनीता ॥

अथ पश्चात्परिवेष्याणि ।

तत्र रसाला शिखरिणी ।

आदौ माहिषमम्लमम्बुरहितं दध्याढकं शर्करां
शुभ्रां प्रस्थयुगान्वितां शुचिपटे किंचिच्च किंचित्क्षिपेत् ।
दुग्धेनार्धघनेन मृन्मयनवस्थाल्यां दृढं स्थापये-
देलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् ॥३१

भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं
श्रीकृष्णेन पुरा पुनः पुनरियं प्रीत्या समास्वादिता ।
एषा येन वसन्तवर्जितदिने संसेविता नित्यश-
स्तस्य स्यादतिवीर्यवृद्धिरनिशं सर्वेन्द्रियाणां बलम् ॥३२

ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा
ये च प्रमत्तवनितासु रतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणखिन्नगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्यात् ॥३३

रसाला शुक्रला बल्या रोचनी वातजित्परा ।
दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा ।
रक्तपित्तं तृषां दाहं प्रतिश्यायं च नाशयेत् ॥३४

अथ हंसिनी ।

निर्नीरं सुरभीक्षीरसंयुक्तं गालितं दधि ।
शर्करैलाढ्यमरिचैः संयुक्ता हंसिनी भवेत् ॥३५

हंसी शिखरिणी रुच्या शुभ्रा वर्णविकारिणी ।
सुशीतजननी चैव कफपित्तविनाशिनी ॥३६

---

33 a B-तांगा,
b J, B, BB -वनितासुरतप्रसंगात्
d J, B, BB हृदयतर्पण (J र्पण) (for वपुषि पोषण) BB भैमामियं (for स्तेषामियं)

34 J, B, BB omits this stanza

35 a Title C-निर्माणविधिर्गुणाश्च, B-हंसी. BB निर्जीत. B सुरभि
b J, B शक्ररैलाप्रसाहार (for the prior half), BB शर्करालेशप्रसाक्वार

36 a J शिकरिणी BB शीता सिखिरिणी
b BB सुशीतजनी.

अथ राजहंसिनी ।

निर्नीरं पाचितं क्षीरं माहिषं तद्भवं दधि ।
शुभ्रशर्करयैलाढ्यं गालितं राजहंसिनी ॥३७

राजहंसी सुमधुरा बल्या वृष्यतरा हिमा ।
अत्यर्थं पित्तशमनी किञ्चित्कफकरी स्मृता ॥३८

अथ शशिरेखा ।

शर्कराशुभ्रमेक्तेन शृतदुग्धयुतेन च ।
परिपूता शिखरिणी शशिरेखेति कीर्तिता ॥३९

शशिरेखा हिमा बल्या रुच्या पुष्टिप्रदायिनी ।
वातपित्तहरा श्रेष्ठा महादाहविनाशिनी ॥४०

अथाम्ररसाकृतिः ।

किञ्चित्कुङ्कुमसंमिश्रं विमस्तु दधि गालितम् ।
सशर्करं भवेत्पीता पक्वाम्ररससन्निभा ॥४१

पीता शिखरिणी या सा लध्वी वर्णवती हिमा ।
सुरुच्या मधुरा बल्या वातपित्तहरा परा ॥४२

अथ रसाला ।

ससितं दधि मध्वाज्यमरिचैलादिसंस्कृतम् ।
मथितं कान्तकामिन्या कर्पूरपरिवासितम् ॥४३

---

37 a Title C- निर्माणविधिर्गुणाश्च, J,B - राजहंसी. BB दधिः.
b B याळोर्ध्यं, BB याळोढ्यं. BB गालिता. J omits राजहंसिनी submetric.

38 a J omits from 38 upto 41ª BB वृष्या सरा हिमा.
b BB मता (for स्मृता).

39 a Title C- निर्माणविधिर्गुणाश्च, B - शशिरेखा, BB omits. B धृतेन (for युतेन)
b B पटपूता (for परिपूता). BB omits the the prior half.

40 a B, BB पुष्टिप्रदा लघु.

41 a Title C- निर्माणविधिर्गुणाश्च, BB अथाम्ररसाला. BB विमुस्तु.
b J शर्करं भवत्-, BB सशर्करा

42 a B वर्णवति BB शिखरिणी, ता सु (for या सा) J हिसा (for हिमा)

43 a Title C- निर्माणविधिर्गुणाश्च. J सलितं, BB वासितं.
BB संयुता (for संस्कृतम् )
b B मथितं.

रसाला शुक्ला बल्या रोचिनी वातपित्तहा ।
स्निग्धाऽऽतपप्रतिश्यायं विशेषेण विनाशयेत् ॥४४

रसाला शिखरिण्युक्ता मर्जिका मार्जिका बुधैः ।
कथ्यन्ते बहुनामानि गुणास्तस्या हि योगतः ॥४५

अथ मोचाफलरसालम् ।

निर्नीरं मथितं घनेन सहितं संभावितं शर्करा-
धूलीभिर्मरिचोद्भवेन रजसा व्यालोडितं किञ्चन ।
जातीचम्पककेतकीसुरभितं मृत्पात्रमध्यस्थितं
जिव्हायां विदधात्युपक्रममिदं मोचाफलैश्चापलम् ॥४६

रसालं रसवद्बल्यं मधुरं पित्तनाशनम् ।
सुहृद्यं कफकृत्स्तोकं किञ्चिद्विष्टम्भकारकम् ॥४७

अथ खार्जुजेयं रसालम् ।

मधुरदधिनि मध्ये शर्करां सन्नियोज्य
शुभविदलितखण्डं प्रक्षिपेत्खार्जुजेयम् ।
करविलुलितमानैर्वासितं चातिगन्धै-
र्जगति भुजरसज्ञं स्थापयत्येव नूनम् ॥४८

रसालं खार्जुजस्येदं विष्टम्भि रुचिकारकम् ।
हृद्यं च कफदं बल्यं पित्तघ्नं मूत्रकृद्गुरम् ॥४९

---

44 a B रोचनी. J, BB omit this stanza.

45 a J, BB मर्जिता (for मर्जिका). BB मार्जितैः (for मार्जिका)

b J योगताः B गुणास्तस्या

46 a Title C - रसालस्य निर्माणविधिर्गुणाश्च, B - मोचाफलरस, BB-मोचाफलरसाला. J मथित

b B विलोलितं

c J, B माली (for जाती). BB चंदन (for चम्पक)

d J, B, BB जिव्हाया. J - श्चापलौ, B चापलं. BB तर्पण (for उपक्रम), संयुतं (for श्चापलम्)

48 a Title C - निर्माणं गुणाश्च, B - खर्बूजेयं, BB - धनंजयरसाला J मधुनिदधिनी BB सन्नियोज्य

b J वायुपेतं (for खार्जुजेयम्). BB सितविविदलितखंडंपेत्वार्जुजेयं corrupt

c J, B, BB गात्रिमगन्धै- B, BB मै(BB में) जै (for मानै) BB-वासितं.

d J तापयेत्

49 a J खार्जूर-

अथाम्ररसालम् ।

सखण्डं स्वार्बुजं खण्डं चन्द्रार्द्रकविमण्डितम् ।
पक्वाम्ररससंयुक्तमत्या राघितवान् रविम् ॥५०
पक्वाम्ररसखण्डाभ्यां संस्कृतं स्वार्बुजं वरम् ।
वातपित्तहरं सर्वरसालेषूत्तमोत्तमम् ॥५१

अथ पानकानि ।

अथापक्वाम्रफलपानकम् ।

आम्रमामं परिस्विन्नं मर्दितं मुष्टिना दृढम् ।
पयसाऽर्धयुते तोये शर्करामरिचान्विते ॥५२
अपक्वाम्ररसोद्भूतं पानकं वातनाशनम् ।
कफपित्तकरं किञ्चित् प्रत्यहं यदि सेवितम् ॥५३

अथ सुपक्वाम्रफलपानकम् ।

सुपक्वमाम्रस्य फलं सुमुष्टिना संमर्दितं शर्करया समन्वितम् ।
एलालवङ्गार्द्रकवासवासितं वर्णान्वितं कस्य न रोचकप्रदम् ॥५४
पानकं त्वाम्रसंभूतं स्वाद्वम्लं गुरु पित्तजित् ।
सुहृद्यं श्लेष्मकृद्बल्यं वर्ण्यं वृष्यं रुचिप्रदम् ॥५५

---

50 a Title B अथाघरसालं, BB अथाम्ररसारसालं, C -ना निर्माणविधिर्गुणाश्च
J, BB स्वार्बुदं B चंद्रार्द्रकृतिमंडितं BB आर्द्रकेनाविमंडितं
b BB मथा (for मत्या). B रंघितवान् रुचिं, BB राघितवानिविं corrupt J विद्रुः (for रविम्)
51 a J, BB स्व (J स्वा) र्बुदं. J जलं.
b J सर्वं B -स्वोत्तमोत्तमं.
52 a Title J अथ पक्वाम्र-, B तत्रादौ पक्वाम्रफलपानकं, C -निर्माणविधिर्गुणाश्च. BB आम्रमाम
b BB चान्वितैः
53 a J -सरसोद्भूत BB आपक्व-
b J omits this line. B सेवयेत्.
54 a Title C -निर्माणविधिर्गुणाश्च. J omits J सुपक्वास्या- BB परं सुपक्वाम्रफलं.
55 a B पानकमाम्रसंभूतं
b J वर्ण्यं (for वृष्यं) रुच्यं बलप्रदं.

अथाम्लिकाफलपानकम् ।

अम्लिकायाः फलं पक्वं मर्दितं वारिणा दृढम् ।
शर्करामरिचोन्मिश्रं लवङ्गेनाधिवासितम् ॥५६
चाञ्चेयं शर्करायुक्तं कर्पूरोदकमर्दितम् ।
फलमार्द्रकसंयुक्तं प्राहुस्तत्पानकान्तरम् ॥५७
अम्लिकाफलसंभूतं पानकं वातनाशनम् ।
कफपित्तहरं किञ्चित्सुरुच्यं वह्निबोधकम् ॥५८

अथ जम्बूफलपानकम् ।

जम्बूफलं व्यस्थिविवर्जितं हि सुमर्दितं शर्करयाऽम्बुनाऽलम् ।
सुवासितं वल्लिजभृङ्गपत्रैः रुचिं विधत्ते विरुचौ जनानाम् ॥५९
जम्बूफलभवं रुच्यं पानकं कफनाशनम् ।
कषायं वातकृत्स्तोकं स्यादम्लं ग्राहिकं वरम् ॥६०

अथ बीजपूरपानकम् ।

मातुलुङ्गरसे योज्यं त्रिगुणं शार्करं जलम् ।
कर्पूरमरिचोन्मिश्रं पानकं स्यादिदं वरम् ॥६१
मातुलुङ्गभवं पानं शूलाजीर्णविनाशनम् ।
श्वासकासारुचौ वातविड्बन्धेषु च पूजितम् ॥६२

---

56 a Title C - निर्माणविधिर्गुणाश्च, J अथाम्लीकपानकं, B अथाम्लीक-, BB -पानंफलं- B, BB अम्लीकायाः
b J नातिवासितं.
57 a BB चाचेयीशार्करीयुक्तं.
b कफ (for फल) BB -त्पानकारकं.
58 a J, B, BB अम्लीक
b B कफहरं J वह्निबोधनं, B वह्निबधनं, BB वह्निवर्धकं.
59 a Title C - निर्माणविधिर्गुणाश्च. J, B, BB जंबूफले स्थूलतरं सुपक्वं संमर्दितं - B शार्करयां - B वुत्तालं (for अम्बुनाऽलम्), BB सुगालितां.
b J सुवासित. J, BB -पात्रे, B रुचिं (for रुचिं)
60 b B स्वादाम्लं, ग्राहकं वरं. BB ग्राहिकावकं.
61 a Title C - निर्माणविधिर्गुणाश्च. J, B शार्करं BB मातुलिंग-, शर्करा.
62 a BB मातुलिंगमेवा
b B -कासे-, BB स्वासकाशा - J reads हितं after रुचौ, omits remaining.

अथ हेमकिरणपानकम् ।

शर्करा नालिकेरं च बीजपूररसप्लुतम् ।
पटपूतं भवेद्धेमकिरणं नाम पानकम् ॥६३
पानकं हेमकिरणं रुच्यं वृष्यं बलप्रदम् ।
सुस्निग्धं वातहृच्छुभ्रं किञ्चित्कफकरं गुरु ॥६४

अथ निम्बूफलपानकम् ।

भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् ।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥६५
निम्बूफलभवं पानमत्यम्लं वातनाशनम् ।
हृद्यं रुचिकरं भव्यं सर्वाहारस्य पाचकम् ॥६६

अथ कारमर्दम् ।

लवङ्गार्द्रकसंयुक्तं सुपिष्टं वारिणा युतम् ।
कारमर्दं करमर्घं सप्तभागसितान्वितम् ॥६७
वातहृद्रुचिदं बल्यं हृद्यमम्लतरं स्मृतम् ।
रक्तपित्तकरं चोक्तमकण्ठ्यं कारमर्दकम् ॥६८

---

63 a Title B, BB-पानं, C-निर्माणविधिर्गुणाश्च BB-सुसंस्कृतं (for-रसप्लुतम्)

64 a BB-किरण

b J-छुभ्रं वातहृच्छुक्रयं.

65 a Title C-निर्माणविधिर्गुणाश्च. J, B, BB अथ निंबुफलजं.

b निंबुकं (for पानकं)

66 a J पानसत्यम्लं

b B हृद्य BB पाचकं

67 a Title C-निर्माणविधिर्गुणाश्च BB-कारामर्धं. J-गार्द्रक- B सुपिष्ठं (for सुपिष्टं)

b J, BB कारमर्द्दं. BB-भागा-

68 a B, BB भव्यं (for बल्यं)

b J रक्तपित्तहरं. J, BB चोष्टमा- B चोक्तं अकण्ठ्यं. BB कारमर्द्दितं.

अथ नारङ्गफलपानकम् ।

सुपक्वनारङ्गफलं सुपीडितं
संयोजितं शर्करयाऽतिशुभ्रया ।
सहार्द्रकं चेन्दुकणेन वासितं
महीतले केन न संस्तुतं क्षणम् ॥६९

नारङ्गफलसंभूतं पानकं वातनाशनम् ।
मधुरं विशदं रुच्यं सुस्निग्धं पित्तहृद्धरम् ॥७०

अथ जम्बीरपानकम् ।

एवं पाकविशेषसौरभरजं जम्बीरनीरांशकं
ग्रावग्रन्थिकदर्थितत्रिलिधरस्रोतोजलांशाष्टकम् ।
सप्तांशैर्मिलितासितावितुलितं कर्पूरचूर्णान्वितं
ख्यातत्पानकमाधितद्रुचिकरं सम्यक्प्रदिष्टं बुधैः ॥७१

पानं जम्बीरसंभूतं तृष्णाशूलकफापहम् ।
वातघ्नं विशदं प्रोक्तं पित्तकृद्रुचिकारकम् ॥७२

अथ बदरफलपानकम् ।

सुस्विन्नं बादरं पक्वं फलं शर्करयाऽन्वितम् ।
जलमिश्रं पटे पूतं चातुर्जातकसंयुतम् ॥७३

पानकं बदरोद्भूतं पित्तघ्नं मधुरं सरम् ।
स्निग्धं रुचिकरं मेध्यं छर्दिदोषविनाशनम् ॥७४

---

69 a Title BB-पानं, C-निर्माणविधिर्गुणाश्च. B,BB निपीडितं BB-नारिंग-
b BB-सुशुभ्रया.
c J करेण (for कणेन) BB हिंगुकणेन.
d J,B,BB पानेभया (for महीतले) B विणो (for क्षणम्) BB संस्तुतक्षणं
70 b J,B पित्तहृद्दं. BB विसदं, पित्तकृद्दं.
71 a Title C-निर्माणविधिर्गुणाश्च, B-जंबीरफलपानकं, BB-जंबीरपाकं J,B,BB एकः (for एवं),
b J-कदर्थिका-, B-मर्दिता-. BB श्वोतोजलांष्टांशकैः corrupt. J-शान्टकौ.
d J,B,BB ए (BB मे) तत् BB-तदिष्टं.
72 a B-समूतं BB पीतं (for पानं) जंबूकं (for संभूतं) corrupt
73 a Title BB-बदरीफलपानं. C-निर्माणविधिर्गुणाश्च.
b J धातुजातक-
74 b B वान्त्यं (for मेध्यं), अर्दि (for छर्दि.

अथ चारोत्थम् ।

चारवृक्षसुफलं सशर्करं मर्दितं शिशिरवारिणा दृढम् ।
एलयाऽऽर्द्रकजलेन सुवासं मेघसिक्थमिलितं कृतहासम् ॥७५

चारस्य फलजं पानं गुरु वृष्यं रुचिप्रदम् ।
कफपित्तहरं श्रेष्ठं हृद्यं मधुरपाकि च ॥७६

परूषाजीरचुक्राम्लद्राक्षादाडिमजं तथा ।
एकैकसंभवं भिन्नं पानकं क्रियते बुधैः ॥७७

एवमम्लस्य पुष्पस्य फलस्याम्लस्य वा तथा ।
शर्करामरिचोन्मिश्रो रसः स्यात्पानकं वरम् ॥७८

एवं हि पानकं कार्यं सुधिया सुष्ठु यत्कृतम् ।
गुणा द्रव्यानुसारेण ज्ञातव्याः पानकेषु च ॥७९

इति पानकानि ।

अथ तक्रम् ।

शशिकुन्दसमुज्ज्वलशङ्खनिभं युवतीकरनिर्मितनिर्मथितम् ।
घृतसैन्धवहिङ्गुयुतं मधुरं पिब तक्रमहो नृप रोगहरम् ॥८०

गव्यदध्नोऽष्टतोयांशैः कृतं तक्रं ससैन्धवम् ।
भृष्टजीरयुतं चाथ दग्धहिङ्गुरजोन्वितम् ॥८१

तक्रं वातहरं रुच्यं शूलाध्मानार्शसां हितम् ।
अग्निसंजननं श्रेष्ठं कफपित्तनिबर्हणम् ॥८२

---

75 a Title C-फलपानकनिर्माणविधिर्गुणाश्च . J, B, BB फलजं (for सुफलं) B शर्करायुतं सुवासितं (for शिशिरवारिणा दृढम्)
b J, B-युतेन, BB-युतं (for जलेन)

76 a B चारकस्य जातं पानं
b J कं (for च). BB पाचकं (for -पाकि च)

77 a J-चुक्राद्या- . B परूषोजीरचुक्राद्यो, BB परूषाजीरचुक्राद्या. Title C-अथ विविधद्रव्यपानकनिर्माणविधिर्गुणाश्च
b BB एकैकं.

78 b J, B रसं BB पनकं.

79 a B सुष्ठया कृतं BB वि (for हि)

80 a Title C-निर्माणविधिर्गुणाश्च. J-करनिर्मथितंमथितं B-शंख-, निर्मल, BB करमल (for निर्मित).
b J तक्रमहान्यरोगहरं, B-महा . BB तक्रमहान्यपि रोगहरं

81 a J-तोयांशैः, B-दध्यो- BB-दध्नाष्टतोयांसैः.
b J च (for वा), सिंधु (for हिङ्गु)

82 a J.B.BB जयेत् (for हितम्) B नोर्शसां

अथ गौरीतक्रम् ।

विश्वामरीचलवणजीरजारङ्गजत्वचाम् ।
चूर्णान्वितं च तत्तक्रं धूपयेद्धृतहिङ्गुना ॥८३

पार्वत्या विहितं तक्रं सर्वदोषनिबर्हणम् ।
सुरुच्यं पाचनं दिव्यं महेशस्य महाप्रियम् ॥८४

वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करम् ।
पिबेत्तक्रं कफे चापि व्योषक्षारसमन्वितम् ॥८५

अमरत्वं यथा स्वर्गे देवानाममृताद्भवेत् ।
तक्राद्भूमौ तथा नृणाममरत्वं हि जायते ॥८६

तस्मात्तक्रं नरैः सेव्यं सर्वदोषनिबर्हणम् ।
क्षयं मूर्च्छां भ्रमं दाहं रक्तपित्तामयं विना ॥८७

अथ अच्छिका ।

गतचिरवासरतक्रं वस्त्रेणागालितं ससैन्धवक्षोदम् ।
रुचिकरधूपप्रधूमैर्धूपितमरिचेण रोचनं भवति ॥८८

---

८३ a Title BB-गौरि, C-निर्माणविधिर्गुणाश्च J, B, BB लवणं मरिचं विश्वं (BB मिश्रं) (for the prior half). J त्वचं, B त्वचा, BB त्वचः.
b J, B, BB एला चूर्णान्वितं तक्रं (for the prior half). J -हिङ्गुना सह hyper-metric. BB हिङ्गुना illegible.

84 a J सत्यं (for सर्व) BB पाद्यमेया (for पार्वत्या), अल्पदाहनिबर्हणं.
b J महत्प्रियम्

८५ a BB वातोम्लं, सशर्करां
b B वापि (for चापि) BB-समन्वित.

८६ a B अमृतं भवेत्
b J दध्नाम् (for नृणाम्) B तक्रं भूमौ, नृणां सामरत्वं.

८७ b J तृष्मूर्छाभ्रमदाह, B अय मूर्छा भ्रमो दाह (for the prior half)
BB नच (for क्षयं), -पित्तमयं

८८ a Title C-निर्माणविधि, J illegible, B-शरि, BB-सुशरि.
J -चर-, B -वर, -BB-चिरं- . J, BB वस्त्रेण- . BB -ओदितं.
b J, B धूम (for धूप). J मरिचेन

अथ काञ्जिकम् ।

धान्याम्लमच्छतरयामुनवारिहारि
शुण्ठीरजोलवणजीरकसंस्कृतं यत् ।
आवासितं सुरभिहिङ्गुकजेन यत्ना-
त्तेनाशुशुभ्रणिकणोऽधिकतां प्रयाति ॥८९

एलामहौषधिविभावितमाणिमन्थ-
संसिद्धमामकरमर्दककाञ्चिकं यत् ।
मन्दं विवर्धयति जाठरकाञ्जिहोत्रं
निर्वाणदीपमिव गन्धकचूर्णयोगः ॥९०

यः काञ्जिकं पिबति योजितसैन्धवं च
निष्पीडिताद्रकरसाश्रितजीरकं च ।
तस्याग्निरोदनघृतेन शमं न याति
प्रास्फारितैर्वडववारिधिवारिपूरैः ॥९१

काञ्जिकं रुचिदं हृद्यं स्वस्थस्याग्निकरं परम् ।
वातहृद्बलदं श्रेष्ठं गुर्वाहारस्य पाचकम् ॥९२

अथ गव्यवासाधिकः ।

उदकरसनिकृत्तं गोमयाग्नौ विपक्वं
नवदलघनसारैर्वासितं बल्कविज्याः ।
पटमिलितसुखण्डं स्थापितं नव्यपात्रे
विगततरसुधांशो गीयते वासधिक्यः ॥९३

---

८९ a Title C-निर्माणविधिः, J अथाछिका, B,BB-अछिका. J,BB-मछ-, Bधन्या- BB-मुनि-
b J शुंठीरसो-
c J आवालितं. B योत्रा (for यत्ना-)
d B-तेनाशुशुभ्रणिकणोधितां BB वह्निण (for शुभ्रणि).

90 a J,BB-महौषध-. BB-माणिमथ्यं
b J मान (for माम) BB रुचि (for यत्)
c J विमर्दयति. J,B वीति (for काञ्जि) B मांद्यं BB omits this line
d BB omits this line..

91 a B योत (for योजित) BB omits this stanza
c B शामे. J यति.

92 a J,B,BB स्वछम (for स्वस्थस्य BB अच्छिका (for काञ्चिकं)

93 a Title C-कस्य निर्माणविधिः, J,B-गव्यवास्यौधी, BB-गव्यमासौधी. B गोग (for गोम)
b B बल्कइव्यः, -र्वासितः
d J नमाणन्कीयते. J,B वासधिक्या BB विगलितरस सुधांशो क्रियते.

अथ माहिषी दुग्धजा ।

क्षीरं माहिषसंभवं घनतरं संपाचितं वह्निना
कारीषेण सुवासितं घुसृणकैः संस्थापितं मृन्मये । ७
पात्रे जप्यतरे सुधूपविहिते भुञ्जन्ति ते मानवाः
वैराराधि सितासितोदकरतैर्भोवे सदा माधवः ॥ ९४

वासाधिका सुमधुरा वृष्या मेदःप्रदा गुरुः ।
सुस्निग्धा बृंहिणी बल्या सुशीता तृप्तिकारिणी ॥ ९५

अथ करम्भकम् ।

सुशीतं क्रियते भक्तं दध्याढ्यं दुग्धकावधि ।
नातिद्रवं नातिसान्द्रं मिश्रितं तत्करम्भकम् ॥ ९६
करम्भसंज्ञा ये भक्ष्या हृद्याः शीतातिपुष्टिदाः ।
अत्यर्थं मनुजैः सेव्याः शरत्कालनिदाघयोः ॥ ९७

अथ भोजनान्ते शुद्धदुग्धम् ।

गव्यं वा माहिषं क्षीरं कारिषानलपाचितम् ।
शोषितं षड्विभागेन कदुष्णं प्राशितं बुधैः ॥ ९८
बहुधा पटसंपूतं नव्ये पात्रे सुपाचितम् ।
सनागरभवा दुग्धं सुसिद्धारुणवर्णकम् ॥ ९९

---

94 a Title C-वासाधिकानिर्माणविधिर्गुणाश्च
b J, B घृ (वृ B) सृकणैः BB संस्थापिते स्रात्मये.
c BB पत्रेतरे, omits भुञ्जन्ति ते submetric
d J येनाराधि BB omits सिता submetric
95 a J मेदप्रदा, B मोदप्रदा, BB मेदकरा J गुरु-
b J सुशीत B ग्राहिणी (for कारिणी J).
96 a Title J-करम्भसंज्ञभक्ष्याः, B-करम्भसंज्ञभक्षा, BB-करतकसंज्ञाभक्ष्या C-निर्माणविधिर्गुणाश्च
B, BB कृयते, B दध्याद्यं, BB वदध्या, -कावधिः.
b J तत्यकरंभकं B omits this line
97 a J, BB कर्मसंज्ञातु B ते (for ये), भक्षाः J, B, BB हृद्या J, BB-पुष्टिदा.
98 a Title C-सेवनविधानम् J, B, BB का (BBका) रीषा - B अनिल (for अनल)
b B प्रशितं BB शशितं.
99 a BB omits this stanza. B नवे.
b B सन्नागार (for सनागर).

गव्यं सुशीतलं क्षीरं स्निग्धं गुरु रसायनम् ।
अल्पाभिष्यन्दकृद्रक्तपित्तघ्नं वातनाशनम् ॥१००
माहिषं मधुरं स्निग्धं सुशीतं बृंहणं गुरु ।
निद्राकरं मतिहरं स्तोकमग्निप्रबोधकम् ॥१०१
आजं लघुतरं क्षीरं कासश्वासनिबर्हणम् ।
दीपनं शोषिणां पथ्यं गव्यदुग्धगुणावरम् ॥१०२
वृष्यं बृंहणमग्निदीपनकरं पूर्वाह्णकाले पयो:
मध्याह्ने बलवर्धनं कफहरं पित्तापहं दीपनम् ।
बाले वृद्धिकरं क्षये क्षयहरं वृद्धेषु रेतोवहं
रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा चाक्षुषम् ॥१०३

अथ खाडवम् ।

कोलामलकजं चूर्णं शुण्ठ्येला शर्करान्वितम् ।
मातुलुङ्गरसेनोक्तं शोषितं सूर्यरश्मिभि: ॥१०४
एवं तु बहुशोऽभ्यक्तं शोषितं च पुन: पुन: ।
ईषल्लवणसंयुक्तं चूर्णं खाडवमुच्यते ॥१०५
खाडवं मुखवैशद्यकारकं रुचिधारकम् ।
हृद्रोगशमनं चेति मुखवैरस्यनाशनम् ॥१०६

---

100 a Title N, B omit, J, BB अथ गुणा:, C-गव्यदुग्धस्य गुणा: B क्षीर, रसायनं
b J-भिष्यंदि-, BB-ष्यंदकृत्यं- B वातनानं.
101 a B सुशीत
b B, BB - प्रबोधनं
102 a B भीरं (for क्षीरं), -निवारणं. BB काशश्वास-
b J, B शोषके, BB शोषकं
103 a B पय:, J पयो.
b J क्षय. J, B, BB क्षयकरं B omits क्षये J बाल्ये, BB वाते.
d J चाक्षुषं.
104 a Title C-खाण्डवनिर्माणविधिर्गुणाश्च, BB-खांडवं. BB-सर्करा-
105 a J तु (for च), बहुशोम्यक्तं B बहुभिर्वारान्
106 a B रुचिकारकं BB-वैसद्य- .

अथ भुक्तोच्छिष्टान्नदानम् ।

मद्भुक्तोच्छिष्टमन्नं तु भुञ्जन्तु पितरोऽधमाः ।
तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु ॥१०७

अथाचमनोच्छिष्टोदकदानवाक्यम् ।

रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् ।
प्राणिनामुदकं ह्येतदक्षय्यमुपतिष्ठतु ॥१०८

अथाचमनोदकम् ।

काले धाराधराणां निपतदतितरां व्योम्नि वारिप्रपूर्णे
स्वच्छं त्वम्भोजवृन्दद्युतिमतिसरसि त्वानवीनाच्च कुम्कुम्भात् ।
पूर्णादानीयमम्भः प्रतिदिनममलं न्यस्तकर्पूरसारं
भुङ्क्ते संसेव्यमानं नृपवरशुचिदं वारि चारोग्यकारि ॥१०९

अथेषिकाखण्डकम् ।

दन्तनिष्कोषणं कार्यं रोहिषस्य शलाकया ।
ततो गण्डूषकरणमास्योच्छिष्टविशुद्धये ॥११०

अथ जानुस्पर्शनम् ।

मा करेण करं पार्थ मा गण्डौ मो च चाक्षुषि ।
जानुनि स्पृश राजेन्द्र मर्तव्या बहवो यदि ॥१११

---

107 a Title C-विधानम्, BB मद् भुक्तोच्छिष्टतद्दानं, B omits. J भुंजंति. B omits this line
b B omits this line J-मन्नं.

108 a Title C-निरूपणम्. B भुक्तोच्छिष्टोच्छिष्टआचमनोदकदानवाक्य J-पद्मार्बुद-निवासिनां, B-वद्मार्बुद-, BB प(?)र्वृंदनिवासिनां.
b N प्राणिनानामुदकं.

109 a Title C-पानविधानं गुणाश्च, B-अथ चमनोदकं J कालधराणां, BB कालोकारोधराणां J-तरा. B व्योम्न, J, BB व्योम.
b J स्वछं त्वंभोजखंडद्युति-, ध्यानवीणाद्यकुंभात्. B, BB खंड (for वृन्द), B-कुभात्
c BB-मंतः (for मम्भः) B-ममाः, BB-मलुः. B-सरं
d B संव्युक्तं (for भुङ्क्ते), -सुदितं.

110 a Title C-स्य विधानं गण्डूषकरणस्य फलञ्च, J अथेषिकाखडिकेति केचित् BB अथेषीकाखंडिकेति केचित्. B निष्कोषार्थं, BB निष्कर्षणं, रोहिकस्य
b J निवृत्तये (for विशुद्धये)

111 a Title C-विधानम्. B करिण. J, B, BB चाक्षुषी.
b J, B, BB जानुनी J, B स्पर्श J मर्तव्या.

अथाचमनान्ते करमर्दचन्दनम् ।

कृष्णागुरुप्रभृतिकैरतिसौरभैश्च
कर्पूरसाररजसाऽऽचमनान्तमुच्चैः ।
आराधितत्रिपुरवैरिपदाम्बुजानां
भुक्तावसानकरमर्दनचन्दनं स्यात् ॥११२

अथ भोजनपरिणामार्थं श्लोकाः ।

भोजनान्ते हि सद्भिप्रस्त्वेतद्वाक्यानि वै पठेत् ।
आहारपरिणामार्थमायुर्वृद्धिकराणि च ॥११३
शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ ।
भोजनान्ते स्मरेद्यस्तु चक्षुस्तस्य न हीयते ॥११४
अगस्त्यं कुम्भकर्णं च शनिं च वडवानलम् ।
आहारपरिणामार्थं संस्मरेच्च वृकोदरम् ॥११५
विष्णुः समस्तेन्द्रियदेहदेही प्रधानभूतो भगवान् यथैकः ।
सत्येन तेनान्नमशेषमेतदारोग्यमन्नं परिणाममेतु ॥११६
इत्यादि बहुवाक्यानि भोजनान्तेषु यः पठेत् ।
स भवेद्बलभीमो राज्ञां राजा चायुरवाप्नुयात् ॥११७

---

112 a Title C-स्य विधानम् B अथाचमनोकरमर्दनचंदनं. J प्रभृति-, B-प्रभुत-
b J-वसनायमुच्चैः, -रजसा वसनायमुच्चैः, BB वसनाय (for ऽऽचमनान्त)
c B आराधितं. J, BB त्रिपुर.

113 a Title C-श्लोकपाठविधानम् BB-मार्थ- B सद्भिप्रैरितद्वाक्यानि. BB सद्भिर्द्यो-रेतद्वाक्यानि वै पठेत्. J-प्रैरेत्
b B-मार्थं. BB वृद्धिं करोति च

J, BB insert:
अथ भोजनान्ते धूपः (BB-भोजनां धूपः) ।
अगुरुमलयभूभूद्दारुकर्पूरसार ।
प्रथितमृगमदाद्यैः साधितां धूपवर्तिं ॥
अनुभवति स नित्यं भोजनान्ते पुराणां ।
शिखरपतिकन्या यस्य नित्यं प्रसन्ना ॥

114 a C Title नेत्रशक्तिवर्धको मन्त्रः J, B सर्यातिं, C श्यातिं B शक्रच्यवनोमाश्विनौ

115 a C Title भोजनस्य परिपाकाय मन्त्रः. B अगस्तिं.
b B-परिपाकार्थं

116 a J देहिदेह, यथैक. B देहिदेहि BB देहिदेहिनां, न्यथैकः
b J, B दंते (for मन्नं) BB-आरोग्यदं

117 b J राज्ञो, B राज्ञां, पुण्यमवाप्नुयात्. BB वायुष्यमाप्नुयात्.

अथ ताम्बूलम् ।

ताम्बूलं स्वर्णवर्णं क्रमुकफलयुतं साङ्गमङ्गं गृहीतं

कर्पूरैर्णाण्डजाभ्यां कृतखदिरवटीसौरभेणातिपूर्णम् ।

चूर्णं ग्रावानुजातं शशधरकिरणप्रोज्ज्वलं तेन साकं

दत्त्वा विप्राय पूर्वं तदनु नरपतिर्भक्षयेदाप्तदत्तम् ॥११८

इति भोजनं समाप्तम् ।

अथाजीर्णोपशमनद्रव्याणि ।

चिरं ह्यध्यशनात्यर्थचिन्ताविण्मूत्रधारणात् ।

असात्म्यभोजनाद्द्वेषात्क्रोधात्स्वप्नविपर्ययात् ॥११९

इत्यादिकारणैर्जन्तोर्यदा त्वन्नं न पच्यते ।

तदाऽन्नपरिपाकार्थमेतद्द्रव्यान्तरं भजेत् ॥१२०

पिष्टान्ने सलिलं प्रियालफलजे पथ्या हिता मांसजे

क्षीरे गव्यमेवं च तक्रमुचितं मोचाफलं सर्पिषि ।

नारङ्गे गुडभक्षणं च कथितं मत्स्योद्भवे काञ्जिकं

गोधूमेऽपि च कर्कटी हिततरा शेषाणि बुद्ध्वा भजेत् ॥१२१

---

118 a Title C - भक्षणविधानम् . J दाप (for फल) , साङ्गमङ्गं , BB मुकुलदलयुतं

b J सौरभैना पूर्णं , B - पूर्णं .

c BB ग्रावानुतातं . J लन साकं (for तेन साकं)

d B भक्षयेदास्य दत्तं B इति भोजनं .

119 a Title B अथ जीर्णो - . J - नात्यर्थ - BB विरुद्धभ्यशनात्यर्थं विना -

b J त्स्वप्न (for त्स्वप्न) BB आमान्न (असात्म्य)

120 a J, BB - करणै - B र्यदा अन्नं

b J, B तदाम (for तदाऽन्नं) B इत्यंतरे . BB भवेत् .

121 a J पिष्टाम्ने . B माषजे . BB - फाल्के

b J, BB गौव्यमेवं , B खंड्युतेपि (for गव्यमेवं च) , तक्रमथितं सर्पिस्तु मोचाफलं .

d J, B, BB हितकरा . BB शोषानि

BB inserts : इति अजीर्णशमनं । शुभमस्तु

अथानं स्नायुरोगस्य पित्तकृत्कफनाशनं ।

अथामलकफलं ।

स्विन्नं धात्रीफलं ज्वलज्वलदनोल शिखासन्निभे ।

स्निग्धपात्रे क्षिप्तं प्रक्षेप्टबाह्लीककणरजनिरज- ।

स्तैलसिंधुत्थव्योषैः संमिश्रं जातपाकं कतिपय दिवसैः ।

रु १ स ८ सौरभाढ्यं तस्य स्वादनुवादं कथमपि ।

वरो भज्ने स्वरः कस्तदेन्यैः मधुर्या गच्छते ।

पित्तं श्लेष्मासिक्तं कषायतः

वायुरम्लप्रतापत्वात्सा त्री दोषत्रयापहः

अग्नि संजनन द्रव्यामुक्त मेधादशोत्सवे

धात्वाग्नि पोषकं यदा और तक्रमथोच्यते ॥ (continued.)

## ग्रन्थकर्तुर्वंशवर्णनम् ।

वंशोऽयं किमु वर्ण्यते सुविमलो नानागुणैरुज्ज्वलो
यत्रैकेन विमिषणश्च भिषजा नीरोगतामाप्तवान् ।
श्रीरामादपरेण या सुविदिता लब्धा ह्यकोलापुरी
ग्रामा द्वादश एव चान्यविदुषा लब्धा हि दिल्लीश्वरात् ॥१२२

पुत्राः क्षेमभिषग्वरस्य षडिमे नानागुणैरुन्नता
गोपालो शिवपालमाधववरौ नारायणस्तद्भुत. ।
रामो लक्ष्मणसंज्ञकः सुविदिताः संवत्सराणां शतं
जीव्यासुः पृथ्वीतलेऽस्ति सुखिनो नित्योत्सवैरुत्सुकाः ॥१२३

प्रजा क्षेमकृता क्षेमशर्मणा वंशपद्धतिः ।
स्वकीया स्वयमावर्ण्य वर्णविन्यासशालिना ॥१२४

---

BB इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्माविनिर्मिते क्षेमकुतूहले ग्रन्थे अनुबोधकवस्तुप्रशंसनोनामैकादशोत्सवः । अथ गौरसायनादिकवर्जं प्रायं क्षीरिका । शुभैश्चत्क्वथिते दुग्धे घृताक्ताश्च तंडुलाॅ न्यसेन । शुभम् । .. ------ . ..→

122 a . J omits the title., -गुणैरुत्तमो B -रुन्नता
 b B omits this line.
 c J हि (for ह्य) B ह्ययोध्यापुरी
 d B ग्राम, द्वादश चान्य एव विदुषा-
123 b J गोपालः ; -स्तद्भुता.
 c J omits this line and insert :
 विश्रामस्य सुतेन सद्गुरुकृपा पीयूषपानार्थिना ।
 d B पृथिवी- J omits this line and inserts:
 ग्रंथादौ गुरुपादपद्मयुगलं नत्वा कृतं मंगलं ।
124 a B वंशवर्धिनी
 b B स्वयमाकर्ण्य J omits this stanza and inserts:
 ग्रंथांतर्गतमंगलं गिरिसुतायाः पादपादपंकेरुहे ।
 ग्रंथांते गदितं द्वयोश्चरणयोः स्युर्मंगलं मंगलम् ॥

इति श्रीमन्मथात्मजविनिर्मिते क्षेमकुतूहलग्रंथसमाप्तमगमत् ॥ ॥श्रीरस्तु ॥ कल्याणमस्तु ॥ शुभं भवतु ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दियते ॥ संवत् १८८५ना शाके १७५० पौषमासे कृष्णपक्षे प्रतिपदायां तिथौ चंद्रवासरे लिखितं याज्ञिक विश्वनाथसुनुना पितांबरेण ॥ श्री गोपीजनवल्लभाय नमः ॥

परदोषकथास्वनादरा बहवः सन्त्यवनौ सुसज्जनाः ।
इति चेतसि सन्निधाय यत्कृतमेवाद्रियतां तदार्यकैः ॥१२५

नन्दतां नीतिभाजः सकलवसुमतीजातयः पान्तु विश्वं
दुर्वृत्ता यान्तु नाशं भवतु वसुमती सस्यसंपन्नदेशा ।
नीरं यच्छन्तु मेघाः कलयतु सुकविः काव्यकौशल्यलीला-
भव्यादव्याजभाजं परिहृतदुरितं क्षेमशर्माणमीशः ॥१२६

बाणाकाशसुते नादे (१६०५) वत्सरे विक्रमाङ्किते ।
ऊर्जे शुक्लत्रयोदश्यां ग्रन्थः पूर्णोऽयमैन्दवे ॥१२७

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविनिर्मिते क्षेमकुतूहले ग्रन्थे गोरसपानकादिप्रशंसनो नाम द्वादशोत्सवः ॥१२॥

---

125 a B सत्यनौ (for सन्त्यवनौ)
J, B, BB omit remaining lines

126 J, B, BB omit this verse

127 J, B, BB omit this verse.

COLOPHON : BB - See 12-121
J See 12-124
B - इति श्रीनरवैद्यमन्मथात्मजगोरसपानकादिप्रशंसनो नाम-द्वादशोत्सवः ॥१२॥ संवत १८३९ वर्षे मार्गशिरमासेकृष्णेपक्षे तीथौ चतुर्थ ४ रविवासरेणमेतत् पुस्तकं संपूर्णं ॥ लिखितं शातिदशपुरब्राम्हणमीश्रदोलतरामेण ग्रामसुनेलमध्ये ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥ आरोग्यमस्तु ॥ जयोस्तु ॥ श्री ॥

—x—x—x—x—x—x—x—x—